Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वामी श्रद्धानन्द कुलपति द्वारा
प्रदत्त पुस्तक संग्रह

श्रीरस्तु

"शुक्लयजुर्वेदीयकाण्वशाखीया मन्त्रसंहिता बृहदारण्यकोपनिषच्च"

आत्मविद्याभूषणं - शास्त्ररत्नाकरः
वे. जगदीश्वरशास्त्रिभिः
रचित प्रस्तावना सहिता
ब्रह्मश्री शिवरामकृष्णघनपाठिवर्यैः
संशोधिता च

श्रीकाञ्चीकामकोटिपीठाधिपतिजगद्गुरुशङ्कराचार्यवर्य
श्रीचन्द्रशेखरेन्द्र सरस्वतीस्वामिनां षष्ट्यब्दपूर्ति ट्रस्ट् द्वारा

220
१६८

षष्ट्यब्दपूर्तिन्यासस्य
रजतजयन्तीमहोत्सवसमये

प्रकाशिता

१९७८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

220/१६८ 103983

220/१६८ पुस्तकालय 103983

गुरुकुल कांगड़ी विश्वविद्यालय

विषय संख्या ______ आगत नं० ______

लेखक वानदीश्वर

शीर्षक ______

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

गुरुकुल काँगड़ी विश्वविद्यालय
कृपया पुस्तक के ऊपर कोई निशान आदि
न लगायें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२०/१६-८

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या.........   आगत संख्या 103983

पुस्तक-विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३०वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए अन्यथा ५० पैसे प्रति दिन के हिसाब से विलम्ब दण्ड लगेगा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

220,169
103983

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रदत्त पुस्तक संग्रह
कुलपति द्वारा
103983

ॐ

श्रीरस्तु

"शुक्लयजुर्वेदीयकाण्वशाखीया मन्त्रसंहिता बृहदारण्यकोपनिषच्च"

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय

आत्मविद्याभूषणं - शास्त्ररत्नाकरैः
वे. जगदीश्वरशास्त्रिभिः
रचित प्रस्तावना सहिता
ब्रह्मश्री शिवरामकृष्णघनपाठिवर्यैः
संशोधिता च

श्रीकाञ्चीकामकोटिपीठाधिपतिजगद्गुरुशङ्कराचार्यवर्य
श्रीमच्चन्द्रशेखरेन्द्र सरस्वतीस्वामिनां षष्ट्यब्दपूर्ति ट्रस्ट् द्वारा

षष्ट्यब्दपूर्तिन्यासस्य
रजतजयन्तीमहोत्सवसमये

प्रकाशिता

१९७८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२०
१६-८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

HIS HOLINESS SRI KANCHI KAMAKOTI PEETADHIPATHY JAGADGURU
SRI SANKARACHARYA CHANDRASEKHARENDRA SARASWATHI SWAMINAH



श्रीचन्द्रशेखरयतीन्द्रसरस्वतीनां शान्तान्तरङ्ग कलिताखिल भावकानाम् ।
काञ्चीपुरीस्थित महोन्नत कामकोटीपीठीमुपाश्रितवतां चरणावुपासे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२०
१६८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

HIS HOLINESS SRI KANCHI KAMAKOTI PEETADHIPATHY JAGADGURU
SRI SANKARACHARYA CHANDRASEKHARENDRA SARASWATHI SWAMINAH



श्रीचन्द्रशेखरयतीन्द्रसरस्वतीनां शान्तान्तरङ्ग कलिताखिल भावकानाम् ।
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar
काञ्चीपुरीस्थित महोन्नत कामकोटीपीठीमुपाश्रितवतां चरणावुपासे ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकाञ्चीकामकोटि पीठाधिपति जगद्गुरु शङ्कराचार्यवर्य-
श्रीमज्जयेन्द्रसरस्वती संयमीन्द्राः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

श्रीयोगीश्वर याज्ञवल्क्य चरणारविन्दाभ्यां नमः

विज्ञापना

वन्दे योगीश्वरं श्रीम्याज्ञवल्क्यमृषीश्वरम् ।
यो रवेराप तपसा यजुः शुक्लं सनातनम् ॥
महिमा याज्ञवल्क्यस्य नहि माति मतौ मम ।
जनको ब्रह्मतामाप क्षत्रियो यदनुग्रहात् ॥
श्रीचन्द्रशेखर जयेन्द्रसरस्वतीभ्यां
श्रीकामकोटिवरपीठ समाश्रिताभ्याम् ।
कारुण्यसारसमुदायनिकेतनाभ्यां
आभ्यां नमोस्तु यतिपुंगव सद्गुरुभ्याम् ॥

विदितचरमिदं विदुषां सर्वेषां यदिष्टानिष्टप्राप्तिपरिहारोपायप्रदर्शनपरो वेद इति । वेदं विना इष्टानिष्टप्राप्तिपरिहारयोः उपायज्ञानाऽसम्भवात् । अत एव अनधिगतार्थज्ञापको वेदः । निखिलपुरुषार्थप्रापकश्च । विदॢ लाभे, विद ज्ञाने इति धातुद्वयनिष्पन्नत्वात् वेदशब्दस्य । अयं च अनादिः अपौरुषेयः नित्यश्च वेदः । वसिष्ठ विश्वामित्रादि महर्षीणां, इन्द्रादि देवतानां सर्वज्ञस्य परमेश्वरस्य च नास्ति वेदे स्वातन्त्र्यम् । उक्तं च वार्तिके—

"यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता" इति ।

पूर्वमीमांसकाः न कदाचिदनीदृशंजगदिति सृष्टिप्रलययोः ईश्वरस्य च अनभ्युपगमेन, रूपात्मकस्य जगत इव नामात्मकस्य वेदस्य अनादित्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपौरुषेयत्वं च अन्यादृशं वर्णयन्ति। वेदान्तिनस्तु "आर्थवादिकयोः सृष्टिप्रलययोः अङ्गीकारात् महाकल्पप्रलये स्वात्मनि अन्तर्हितानि वेदादिविद्यास्थानानि सृष्ट्यादौ स्वेन सृष्टाय ब्रह्मणे हिरण्यगर्भाय सर्वज्ञः परमेश्वरः उपदिदेश। "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेः। वेदांश्चेति चकारः स्मृतिपुराणादिसमुच्चायकः। कल्पादौ पूर्वकल्पसमानजातीयवर्णपदानुपूर्वी विशिष्टतयैव आविर्भावयामास परमेश्वरः। पदभेदे आनुपूर्वीभेदे च ईश्वरस्यापि न स्वातन्त्र्यम्, किमुत अन्येषां महर्षीणाम्। अत एव अनादित्वं अपौरुषेयत्व-नित्यत्वादिकं च वेदस्य इति देवताधिकरणन्यायसिद्धम्" इत्याहुः। उक्तं च भगवत्पादैः-

वेदोऽनादितया वा परमेश्वरप्रणीततया वा।
भवति परमं प्रमाणं बाधो नास्य स्वतश्च परतो वा॥
वेदोनादिरमुष्य व्यञ्जक ईशस्स्वयं प्रकाशात्मा।
तदभिव्यक्तिमुदीक्ष्य प्रोक्तोसौ सूरिभिः प्रमाणमिति॥
रूपाणामवलोके चक्षुरिवान्यन्नकारणं दृष्टम्।
तद्वददृष्टावगतौ वेदवदन्यो न वेदको हेतुः॥ इति॥

प्रत्यक्षादिप्रमाणान्तरानधिगतार्थबोधकत्वमेव स्वतःप्रामाण्यं वेदस्य। अतः सकलप्रमाणमूर्धन्यभूतो वेद इति वैदिकानां मर्यादा। वेदानुसारिणीनामेव स्मृतीनां अन्येषां च प्रामाण्यं। वेदविरुद्धानां तु स्मृतीनां नैव प्रामाण्यम्॥

"या वेदबाह्या स्मृतयः याश्च काश्च कुदृष्टयः।
सर्वास्ताः निष्फलाः प्रेत्य तमोनिष्ठाहि ताः स्मृताः॥" इति स्मृतेः
"श्रुतिस्तु वेदो विज्ञेयः धर्मशास्त्रं तु वै स्मृतिः।
ते उभे तु न हन्तव्ये ताभ्यां धर्मो हि निर्बभौ॥" इति च मनुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स च वेदः ऋग्यजुस्समाथर्वभेदेन चतुर्विधः। ऋगादीनां वेदानां अनन्ताः शाखाः प्रमाणप्रसिद्धाः। तत्र यजुर्वेदस्य एकोत्तरशतंशाखाः इति "यजुर्वेदतरोः शाखाः आसन्नेकोत्तरं शतम्" इति प्रमाणतस्सिद्धम्। यजुर्वेदश्च द्विविधः शुक्लकृष्णभेदेन। शुक्लयजुर्वेदस्य पञ्चदश शाखाः सन्ति। अवशिष्टाः षडशीति शाखाः कृष्ण यजुर्वेदस्य। शुक्लकृष्णयोर्वेदयोः प्रायशः लुप्ताएव शाखाः सन्ति। द्वित्रा एव शाखाः इदानीं विद्यन्ते। "मन्त्रब्राह्मणयोर्वेदनामधेयम्" इत्यापस्तम्बाद्युक्तरीत्या मन्त्रब्राह्मणात्मकत्वं वेदस्य। मन्त्राः कर्मसु विनियोजकप्रमाणेन विनियुज्यन्ते। ते च मन्त्राः गायत्र्यादि छन्दोबद्धाः। ब्राह्मण तु विधि, नामधेय, निषेध, अर्थवाद रूपं भवति। कृष्णयर्जुवेदे मन्त्रब्राह्मणयोः व्यामिश्रता वरीवर्ति। अत एव तस्य वेदस्य कृष्णत्वम्। सा च मन्त्रब्राह्मणयोर्व्यामिश्रता शुक्लयजुर्वेदे नास्ति। अत एव शुक्लत्वमस्य वेदस्य। शुक्लयजुर्वेद ब्राह्मणभागस्य शतपथमिति नाम, शताध्यायात्मकं च तत्। मन्त्रभागस्तु चत्वारिंशदध्यायात्मकः। तत्र अग्निहोत्र दर्शपूर्णमास, चातुर्मास्य, पशुबन्ध, पिण्डपितृयज्ञ, सोमयाग, वाजपेयाग्निचयन-सौत्रामण्यश्वमेध नरमेध प्रवर्ग्यादि कर्मसु विनियुक्ताः मन्त्राः वर्तन्ते। मन्त्रसंहितान्ते ईशावस्योपनिषत् ज्ञानोपदेशपरः विद्यते। ब्राह्मणभागस्यान्ते बृहदारण्यकोपनिषत् ज्ञानोपदेशपरः चकास्ति।

द्विजातीनां वेदाध्ययनं "स्वाध्यायोऽध्येतव्यः" "वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना" इति श्रुतिस्मृतिविहितम्। देवाः महर्षयश्च ईश्वरानुग्रहात् कठिनतपोनिष्ठतया स्वयं प्रतिभातवेदाः।

"युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे पूर्वतपसा ह्यनुज्ञाताः स्वयंभुवा॥ इति।

ईश्वरानुग्रहेण मन्त्रद्रष्टारो महर्षयो भवन्ति। "ऋषयो मन्त्रद्रष्टार" इति नैरुक्तं वचनम्। अयं च शुक्लयजुर्वेदः आदित्यमण्डलान्तर्वर्तिहिरण्यग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भानुग्रहात् वाजसनेयेन योगीश्वर याज्ञवल्क्येन अत्युग्रतपोबलेन बहिः प्रकाशितः । "आदित्यानीमानि शुक्लानियजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायंते" इति शतपथश्रुतिः ॥

पूर्वकाले यादृशः अध्ययनप्रकारोऽभूत् तादृशःअधुना नास्ति । गुरुमुखोच्चारणानूच्चारणरूपाऽध्ययनमेव इदानीं दृश्यते । पूर्वं ताळपत्रलिखितं वेदपुस्तकं अनुसृत्य अध्ययनाध्यापनरीतिरासीत् । पश्चात् अयसाक्षरैः मुद्रित पुस्तकं वीक्ष्य अध्ययनमासीत् । शुक्लयजुर्वेदपुस्तकं तु पूर्वं कुम्भकोण नगरस्थ प्रधानपाठशालायां (Town High School) संस्कृत प्रधानोपाध्याय पदमधिरूढैः पण्डितवर्यैः श्री शिवरामशास्त्रिमहाशयैः दाक्षिणात्यग्रन्थलिप्यां मुद्रितमासीत् । पश्चात् उत्तरदेशेषु देवनागर लिप्यां तत् पुस्तकं प्रकाशितमभूत् । तादृश शुक्ल यजुर्वेद पुस्तकद्वयमपि अधुना अध्येतॄणां माणवकानां नैव लभ्यते । एतादृश परिस्थितिं अनुवीक्ष्य श्रीकाञ्चीकामकोटि पीठाधिपति जगद्गुरु श्री जयेन्द्रसरस्वती श्रीचरणानां सविधे शुक्लयजुर्वेद मन्त्रसंहिताभागस्य पुनर्मुद्रणाय मया विज्ञापना व्यरचि । तेच अस्मदाचार्याः दयाळवः हृदयाळवश्च कृपया तन्मुद्रणाय श्रीत्यागराजमहाशयाय (Shri V. T. Rajan) आज्ञापयामासुः ।

आचार्याज्ञां अनुलङ्घ्यां शिरसा उदूह्य स्वकीये रमणीयन्त्रणालये तैः मुद्रपयित्वा अधुना शुक्लयजुर्वेद मन्त्रसंहिता भागः सस्वर बृहदारण्यक सहितः प्राकाश्यं नीतः इति महदेतत् प्रमोदस्थानं विदुषाम् ।

श्रीत्यागराजार्यस्य एतद्ग्रन्थमुद्रापणाय आज्ञादानेन, रामेश्वर-वैखनल्लूरू-ग्राम-काञ्चीपुरस्थ वेदपाठशालासु ग्रहणाध्ययनं कुर्वतां माणवकानां ब्रह्मयज्ञजपं कुर्वतां अन्येषां ब्राह्मणानां च महतीमुपकृतिं विरचितवतां, वेदभाष्य- वेदरक्षण-वेदधर्मशास्त्र- अद्वैत-सभा संचालनेन आगम शिल्प सदस्सम्मेलनेन च सनातन वैदिक पथस्य पुनरुद्धरणैक बद्धश्रद्धानां, पादन्यासपवित्रित क्षेत्रतीर्थवर्याणां, स्वीय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदुपदेशैः करूणाकरंबितापांगवीक्षणैश्च कलियुगीनानपि कृतयुगीनान् कुर्वाणानां कामकोटिपीठमधितिष्ठतां अस्मदाचार्याणां गुणगणमहिमा वर्णने के वयं वराकाः ।

तेषां श्रीचरणानां निरवग्रहेणानुग्रहेण एतद्ग्रन्थप्राकाश्यं नीतानां सपुत्रकलत्राणां श्रीत्यागराजार्यमहोदयानां आयुरारोग्यैश्वर्यादिकं सर्वं श्रेयः प्रेयश्च भूयोपि भूयादिति मारमणमुमारमणं च सविनयं प्रार्थयामः ।

एतद्ग्रन्थ स्वरवर्णपदेषु सूक्ष्मेक्षिकया शोधनं कृतवतां अस्मदाचार्य प्रतिष्ठापित वेदभाष्यसभायां वितीर्ण शुक्लयजुर्वेद भाष्योत्तीर्णतया अस्मदाचार्यकृत सम्माननानां ब्रह्मश्री शिवरामकृष्णघनपाठिनां कृतज्ञता प्रदर्शनपूर्वकं आयुरारोग्यादिकं भगवदनुग्रहेण भूयादित्याशास्महे । शोधनेकृतेपि स्वरवर्णपदेषु क्वचित् यद्यशुद्धरूपमुपलभ्येत सा गच्छतस्खलनन्यायेन प्रामादिकीति प्रेक्षावद्भिर्विद्वद्भिः क्षन्तव्येति निवेद्यते ॥ इति शिवम् ।

क्षमाक्षेमकृते भिक्षामटते सर्वदिक्षुच ।
त्र्यक्षायभिक्षुवर्याय शिवाय गुरवे नमः ॥
अत्यन्त पापिबहुलेऽत्र कलेर्विलासात्
कल्याणहेतुमवयन् गुरुरेषधर्मम् ।
उद्धर्तुमुत्सुकमनाः दमनादरीणां
मन्ये शिवोयमधितिष्ठति धर्मपीठम् ॥

इत्थम्

विधेयः शङ्करकिङ्करः

वे. जगदीश्वर शास्त्री

शास्त्ररत्नाकरः, आत्मविद्याभूषणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

श्रीगणेशाय नमः ॥ श्रीयाज्ञवल्क्यगुरुभ्यो नमः ॥ हरिः ओम् ॥

॥ श्रीशुक्लयजुर्वेदकाण्वसंहिता ॥

॥ अथ प्रथमदशके प्रथमोऽध्यायः ॥

(प्रथमोऽनुवाकः १)

ॐ इषे त्वोर्जे त्वा वायवःस्थ ।

देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ १ ॥

आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्माः ।

मा वस्स्तेन ईशत माघशꣳसः ॥ २ ॥

ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः ।

यजमानस्य पशून् पाहि वसोः पवित्रमसि ॥ ३ ॥ (१)

(द्वितीयोऽनुवाकः २)

द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि ।

विश्वधाः परमेण धाम्ना ॥ १ ॥

दृꣳहस्व माह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ।

वसोः पवित्रमसि शतधारँ वसोः पवित्रमसि सहस्रधारम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण ।

सुप्वा कामंधुक्षः ॥ ३ ॥

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।

इन्द्रस्य त्वा भागꣳ सोमेनातंनच्मि विष्णो हव्यꣳ रक्षस्व ॥ ४ ॥ (२)

(तृतीयोऽनुवाकः ३)

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ।

इदमहमनृतात् सत्यमुपैमि ॥ १ ॥

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति ।

कर्मणे वां वेषाय वाम् ॥ २ ॥

प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः ।

उर्वन्तरिक्षमन्वेमि ॥ ३ ॥

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति ।

धूर्वतं यं वयं धूर्वामः ॥ ४ ॥

देवानामसि सस्नितमं वह्नितमं पप्रितमं जुष्टतमं देवहूतमम् ।

अहुतमसि हविर्धानं दृꣳहस्व माह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥ ५ ॥

विष्णुस्त्वाक्रमतामुरुवातायापहतꣳ रक्षो यच्छन्तां पञ्च ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि।
भूताय त्वा नारातये स्वरभिविख्येषम् ॥ ७ ॥
दृꣳहन्तां दुर्याः पृथिव्यामुर्वन्तरिक्षमन्वेमि।
पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे।
अग्ने हव्यꣳ रक्षस्व ॥ ८ ॥ (३)

(चतुर्थोऽनुवाकः ४)

पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनामि।
अच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ १ ॥
देवीरापो अग्रे गुवो अग्रे पुवः ॥
अग्र इममद्य यज्ञं नयत सुधातु यज्ञपतिं देवा युवम् ॥ २ ॥
युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिताः स्थ।
अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥ ३ ॥
दैव्याय कर्मणे शुन्धध्वं देवयज्यायै।
यद्वोऽशुद्धः पराजघानैतद्वस्तच्छुन्धामि ॥ ४ ॥ (४)

(पञ्चमोऽनुवाकः ५)

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयः।
अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ॥ १ ॥
अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः।
प्रति त्वादित्यास्त्वग्वेत्तु ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नेस्तनूरसि वाचो विसर्जनम् ।
देववीतये त्वा गृह्णामि ॥ ३ ॥
बृहन् ग्रावासि वानस्पत्यः स इदं देवेभ्यः ।
हव्यꣳशमीष्व सुशमिशमीष्व हविष्कृदेहि ॥ ४ ॥
कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद ।
वयꣳसंघातेसंघाते जेष्म ॥ ५ ॥
वर्षवृद्धमसि प्रति त्वावर्षवृद्धं वेत्तु ।
परापूतꣳरक्षः प्रति पूता अरातयः ॥ ६ ॥
अपहतꣳ रक्षो वायुर्वो विविनक्तु ।
देवो वः सविता प्रतिगृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना ॥७॥ (५)

(षष्ठोऽनुवाकः ६)

धृष्टिरस्यपाग्ने अग्निमामादं जहि ।
निष्क्रव्यादꣳसेधा देवयजं वह ॥ १ ॥
ध्रुवमसि पृथिवीं दृꣳह ।
ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ॥ २ ॥
अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षं दृꣳह ।
ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ।
धर्त्रमसि दिवं दृꣳह ।
ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वाभ्यस्त्वाशाभ्य उपदधामि द्विषतो वधाय ।
चितस्स्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वम् ॥ ४ ॥ (६)

(सप्तमोऽनुवाकः ७)

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयः ।
अदित्यास्त्वगसि प्रतित्वादितिर्वेत्तु ॥ १ ॥
धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु ।
दिवस्स्कम्भनयसि धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु ॥ २ ॥
धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिम् ।
धिनुहि माँ यज्ञन्यम् ॥ ३ ॥
प्राणायत्वोदानाय त्वा व्यानाय त्वा ।
दीर्घामनु प्रसितिमायुषेधां देवो वः सविता प्रतिगृह्णातु,
हिरण्यपाणिरच्छिद्रेण पाणिना ॥ ३ ॥
चक्षुषे त्वा महीनां पयोऽसि ॥ ४ ॥
वेदोऽसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभवः ॥
तेन मह्यं वेदो भव ॥ ५ ॥ (७)

(अष्टमोऽनुवाकः ८)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सँवपामि समाप ओषधीभिः समोषधयो रसेन ॥
सꣳरेवतीर्जगतीभिः संमधुमतीर्मधुमतीभिः पृच्यन्ताम् ।
जनयत्यै त्वा सँयौमि ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदमग्नेरिदमग्नीषोमयोरिषे त्वा ।

घर्मोऽसि विश्वायुरुरुप्रथा उरुप्रथस्वोरुते यज्ञपतिः प्रथताम् ॥ २ ॥

अग्निष्टे त्वचं माहिँसीदन्तरितँरक्षोऽन्तरिता अरातयः ।

देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥ ३ ॥

मा भेर्मा संविक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ।

त्रितायत्वा द्वितायं त्वैकताय त्वा ॥ ४ ॥ (८)

नवमोऽनुवाकः (९)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

आददेऽध्वरकृतं देवेभ्यः ॥

इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाः ।

वायुरसि तिग्मतेजा द्विषतो वधः ॥ १ ॥

पृथिव्यै वर्मासि पृथिवि देवयजनि ।

ओषध्यास्ते मूलं माहिँसिषम् ॥ २ ॥

व्रजं गच्छ गोष्ठानँ वर्षतु ते द्यौर्बधान देवसवितः,

परमस्यां पृथिव्याँशतेन पाशैः ।

योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ ३ ॥

अपाररुँवध्यासं पृथिव्यै देवयजनात् ।

व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देवसवितः,

परमस्यां पृथिव्याँशतेन पाशैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ।
अररो दिवं मापप्तो द्रप्सस्ते द्यां मास्कन् ।
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः,
परमस्यां पृथिव्याᳬ शतेन पाशैः ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥ ४ ॥
गायत्रेण त्वा च्छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा च्छन्दसा परिगृह्णामि,
जागतेन त्वा च्छन्दसा परिगृह्णामि ।
सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चासि ।
ऊर्जस्वती चासि पयस्वती च ॥ ५ ॥
पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम् ।
यामैरयᳬश्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदिश्य यजन्ते ।
द्विषतो वधोऽसि ॥ ६ ॥ (९)

(दशमोऽनुवाकः १०)

प्रत्युष्टᳬ रक्षः प्रत्युष्टा अरातयो निष्टप्तᳬरक्षो निष्टप्ता अरातयः ।
अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि ।
प्रत्युष्टᳬ रक्षः प्रत्युष्टा अरातयो निष्टप्तᳬरक्षो निष्टप्ता अरातयः ।
अनिशितासि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै संमार्ज्मि ॥ १ ॥
अदित्यै रास्नासीन्द्राण्यै सन्नहनम् ।
विष्णोर्वेष्पोऽस्यूर्जे त्वादब्धेन त्वा चक्षुषावपश्यामि ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नेर्जिह्वासिं सुभूर्देवेभ्यः ।

धाम्ने धाम्ने भव यजुंषे यजुषे ॥

सवितुस्त्वा प्रसव उत्पुंनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।

सवितुर्वः प्रसव उत्पुंनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ ३ ॥

तेजोऽसि शुक्रमंस्यमृतंमसि धाम नामासि ।

प्रियं देवानामनाधृष्टं देवयजंनम् ॥ ४ ॥

यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे ।

आत्मन्वान्त्सोमघृतवान् हि भूत्वाग्निं गच्छ स्वर्यजमानाय विन्द॥९॥(१०)

हरिः ॐम्,

इषेत्वा तिस्रः ॥ ३ ॥ द्यौरसि चतस्रः ॥ ४ ॥
अग्ने व्रतपते ऽष्ट ॥ ८ ॥ पवित्रे स्थश्चतस्रः ॥४॥ शर्मासि सप्त ॥ ७ ॥
धृष्टिरसि चतस्रः ॥ ४ ॥ शर्म पञ्च ॥ ५ ॥ देवस्य त्वा चतस्रः ॥ ४ ॥
द्वितीयो देवस्य त्वा षट् ॥ ६ ॥ प्रत्युष्टं पञ्च ॥ ५ ॥ दशानुवाकेषु
पञ्चाशत् । इषे देवस्य समाः पञ्चाशत् ॥ ५० ॥

इति शुक्लयजुर्वेदकाण्वसंहितायाँ प्रथमदशके प्रथमोऽध्यायः (१)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

प्रथमदशके द्वितीयोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओं । कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि,
वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि ।
बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि ॥ १ ॥
अदित्यै व्युन्दनमसि विष्णोः स्तुपोऽसि ।
ऊर्णम्रदसन्त्वा स्तृणामि स्वासस्थान्देवेभ्यः ॥ २ ॥
भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा ।
गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै ॥ ३ ॥
यजमानस्य परिधिरस्यग्निरिळ ईळितः ।
इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै ।
यजमानस्य परिधिरस्यग्निरिळ ईळितः ।
मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै ।
यजमानस्य परिधिरस्यग्निरिळ ईळितः ॥ ४ ॥
वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि ।
अग्ने बृहन्तमध्वरे ॥ ५ ॥
समिदसि सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै ।
सवितुर्बाहूस्थः ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊर्णम्रदसन्त्वा स्तृणामि स्वासस्थं देवेभ्यः ।
आ त्वा वसवो रुद्रा आदित्याः सदन्तु ॥ ७ ॥
घृताच्यसि जुहूर्नाम सेदं प्रियेण धाम्ना प्रिये सदसि सीद ।
घृताच्यस्युपभृन्नाम सेदं प्रियेण धाम्ना प्रिये सदसि सीद ।
घृताच्यसि ध्रुवा नाम सेदं प्रियेण धाम्ना प्रिये सदसि सीद,
प्रियेण धाम्ना प्रिये सदसि सीद ॥ ८ ॥
ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहि ।
पाहि यज्ञं पाहि यज्ञपतिं पाहि माँ यज्ञन्यम् ॥ ९ ॥ (१)

(द्वितीयोऽवाकः २)

अग्ने वाजजिद् वाजं त्वा सरिष्यन्तं वाजजितँ संमार्ज्मि ।
नमो देवेभ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तम् ॥ १ ॥
अस्कन्नमद्याज्यं देवेभ्यः संभ्रियासम् ।
अङ्घ्रिणा विष्णो मा त्ववक्रमिषम् ॥ २ ॥
वसुमतीमग्ने ते च्छायामुपस्थेषँ विष्णोः स्थानमसि ।
इत इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर आस्थात् ॥ ३ ॥
अग्ने वेर्होत्रँ वेर्दूत्यम् ।
अवतान्त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषाभूत् स्वाहा ।
सं ज्योतिषां ज्योतिः ॥ ५ ॥
अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् ।
अमी मदन्त पितरो यथाभागमावृषायिषत ॥ ६ ॥
उपहूता पृथिवी मातोपमां पृथिवी माताह्वयताम् ।
अग्निराग्नीध्रात् स्वाहा ॥ ७ ॥
उपहूतो द्यौष्पितोपमां द्यौष्पिताह्वयताम् ।
अग्निराग्नीध्रात् स्वाहा ॥ ८ ॥
मयीदमिन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् ।
अस्माकꣳसन्त्वाशिषः सत्या नः सन्त्वाशिषः ।
अग्ने वाजजिद् वाजं त्वा ससृवाꣳसं,
वाजजितꣳसंमार्ज्मि ॥ ९ ॥ (२)

(तृतीयोऽनुवाकः ३)

देवंसवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणम् ।
तदहं मनसे प्रब्रवीमि ॥ १ ॥
मनो गायत्र्यै गायात्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे ।
अनुष्टुप् प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम् ।
भूर्भुवः स्वर्निरस्तः पाप्मेदमहं बृहस्पतेः सदसि सीदामि ॥ ३ ॥
मित्रस्य त्वा चक्षुषा प्रतीक्षे ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
प्रतिगृह्णामि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ ४ ॥
आददेऽग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन ।
या अप्स्वन्तर्देवतास्ता इदꣳ शमयन्तु ॥ ५ ॥
स्वाहाकृतं जठरमिन्द्रस्य गच्छ ।
घसिना मे मा संपृक्था ऊर्ध्वं मे नाभेः सीद ॥ ६ ॥
इन्द्रस्य त्वा जठरे सादयामि ।
प्रजापतेर्भागोस्यूर्जस्वान् पयस्वान् ॥ ७ ॥
प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाहि ।
ऊर्गस्यूर्जं मयि धेह्यक्षितिरसि मा मे क्षेष्ठा,
अमुत्रामुष्मिंल्लोक इह च ॥ ८ ॥
एषा ते अग्ने समित्तया वर्धस्व चा च प्यायस्व ।
वर्धिषीमहि च वयमा च प्यासिषीमहि ॥ ९ ॥
एतत्ते देवसवितुर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे ।
ते न यज्ञमव तेन यज्ञपतिं तेन मामव ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनो ज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु ।
अरिष्टं यज्ञꣳ समिमं दधातु विश्वेदेवास इह,
मादयन्तामों ३ प्रतिष्ठ ॥ ११ ॥ (३)

———

(चतुर्थोऽनुवाकः ४)

अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि ।
अग्नीषोमौ तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो,
वाजस्यैनं प्रसवेनापोहामि ।
इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि ।
इन्द्राग्नी तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो,
वाजस्यैनं प्रसवेनापोहामि ॥ १ ॥
वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा ।
संजानाथान्द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम् ॥ २ ॥
व्यन्तु वयोरिप्तो रिहाणा मरुतां पृषतीं गच्छ ।
वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टि मावह ॥ ३ ॥
चक्षुष्पा असि चक्षुर्मे पाहि ।
यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः ॥ ४ ॥
तं त एतमनुजोषं भराम्येष नेत्वदपचेतयातै ।
अग्नेः प्रियं पाथोऽपीतम् ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सꣳस्रवभागाः स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधयश्च देवाः ।
इमाꣳवाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि,
मादयध्वꣳ स्वाहा वाट् ।
घृताची स्थो धुर्यौपातꣳ सुम्ने स्थः सुम्ने माधत्तम् ॥ ६ ॥ (४)

(पञ्चमोऽनुवाकः ५)

अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै,
पाहि दुरिष्ट्यै पाहि दुरद्मन्यै ।
अविषन्नः पितुं कृणु सुषदा योनौ स्वाहा वाट् ॥ १ ॥
अग्नये संवेशपतये स्वाहा सरस्वत्यै यशो भगिन्यै स्वाहा ।
उलूखले मुसले यच्च शूर्पे आशिश्लेष दृषदि यत्कपाले ॥ २ ॥
उत्प्रुषो विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहा ।
आप्यायतां ध्रुवा हविषा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः ।
सूर्याया ऊधो अदित्या उपस्थ उरु धारा पृथिवी यज्ञे अस्मिन् ॥ ३ ॥
देवा गातुविदो गातुमित्वा गातुमित ।
मनसस्पत इमं देवयज्ञꣳ स्वाहा वाते धाः ॥ ४ ॥
संबर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः ।
समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्त्वा विमुंञ्चति स त्वा विमुंञ्चति कस्मैं त्वा,
विमुंञ्चति तस्मैं त्वा विमुंञ्चति ।
पोषाय रक्षंसां भागोऽसि ॥ ६ ॥
वेषोऽस्युपवेषो द्विपतो ग्रीवा उपं वेविद्धि ।
वेशांऽअग्नेसुभग धारयेह ॥ ७ ॥
ऋद्धाः कर्मण्या अनंपायिनो यथासंन् ।
जुहोमिं त्वा सुभग सौभंगाय पुरूतमं पुरुहूतश्रवस्यन् ॥ ८ ॥ (५)

(षष्ठोऽनुवाकः ६)

सं वर्चसा पयंसा सं तनूभिरगंन्महि मनंसा सऽशिवेनं ।
त्वष्टा सुदत्रो विदंधातु रायोऽनुंमार्ष्टु तन्वो यद् विलिंष्टम् ॥ १ ॥
यज्ञ शं च त उपं च ।
शिवे मे संतिंष्ठस्वारिष्टे मे संतिंष्ठस्व स्विंष्टे मे सं तिंष्ठस्व ॥ २ ॥
दिवि विष्णु र्व्यक्रंऽस्त जागंतेन च्छन्दंसा ततो निर्भक्तः ।
योऽस्मान्द्वेष्टि यं चं वयं द्विष्मः ।
अन्तरिंक्षे विष्णुर्व्यक्रंऽस्त त्रैष्टुंभेन च्छन्दंसा ततो निर्भक्तः ।
योऽस्मान् द्वेष्टि यं चं वयं द्विष्मः ।
पृथिव्याः विष्णुर्व्यक्रंऽस्त गायत्रेण च्छन्दंसा ततो निर्भक्तः ।
योऽस्मान् द्वेष्टि यं चं वयं द्विष्मः ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मादन्नादस्यै प्रतिष्ठाया अगन्म स्वः ।
सं ज्योतिषाभूम ॥ ४ ॥
स्वयंभूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि ।
सूर्यस्यावृतमन्वावर्ते ॥ ५ ॥
अग्ने गृहपते सुगृहपतिरहं त्वया गृहपत्या भूयासम् ।
सुगृहपतिस्त्वं मया गृहपत्या भूयाः ॥ ६ ॥
अस्थूरिणो गार्हपत्यानि सन्तु शतꣳ हि माः ।
तिग्मेन नस्तेजसा सꣳशिशाधि सूर्यस्यावृतमन्वावर्ते ॥ ७ ॥
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्रप्रयज्ञपतिं तिर ॥ ८ ॥
ततोऽसि तन्तुरस्य नु मा तनुहि ।
अस्मिन् यज्ञे स्याꣳ साधु कृत्यायामस्मिन्नन्नेऽस्मिंल्लोके ॥ ९ ॥
इदं मे कर्मेदं वीर्यं पुत्रोऽनु संतनोतु ।
अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे राधि ।
इदमहꣳ य एवास्मि स एवास्मि ॥ १० ॥ (६)

(सप्तमोऽनुवाकः ७)

अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा ।
अपहता असुरा रक्षाꣳसि वेदिषदः ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये रूपाणि प्रति मुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।
परा पुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात् प्रणुदात्यस्मात् ॥ २ ॥
अत्र पितरो मादयध्वं यथा भागमावृषायध्वम् ।
अमी मदन्त पितरो यथा भागमावृषायिषत ॥ ३ ॥
नमो वः पितरः शुष्माय नमो वः पितरस्तपसे ।
नमो वः पितरो यज्जीवं तस्मै नमो वः पितरो रसाय ।
नमो वः पितरो घोराय मन्यवे स्वधायै वः पितरो नमः ।
एतद्वः पितरो वासो गृहान्नः पितरो दत्त ॥ ४ ॥
उदायुषा स्वायुषोत्पर्जन्यस्य धामभिः ।
उदस्थाममृताँऽअनु ॥ ५ ॥
आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषोऽसत् ॥ ६ ॥
ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ।
स्वधास्थ तर्पयत मे पितॄन् ॥ ७ ॥ हरिः ओम् ॥

कृष्णोऽसि (९) अग्ने वाजजिच्च (९) देवसवितरेकादश (११)
अग्नीषोमयोः षट् (६) अग्नेऽदब्धायोऽष्ट (८)
संवर्चसा दश (१०) अग्नये कव्यवाहनाय सप्त (७)
सप्तानुवाकेषु षष्टिः । कृष्ण इमं मे षष्टिः (६०)

इति शुक्लयजुर्वेदकाण्वसंहितायां प्रथमदशके द्वितीयोऽध्यायः (२)

— ० —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

प्रथमदशके तृतीयोऽध्यायः

(प्रथमोऽनुवाकः १)

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् ।
आस्मिन् हव्या जुहोतन ॥ १ ॥
सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ।
अग्नये जातवेदसे ॥ २ ॥
तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।
बृहच्छोचा यविष्ठ्य ॥ ३ ॥
उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत ।
जुषस्व समिधो मम ॥ ४ ॥
भूर्भुवः स्वर्द्यौरिव भूम्ना भूमिरिव वरिम्णा ।
तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्ना-
द्यायादधे ॥ ५ ॥
आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्स्वः ॥ ६ ॥
अन्तश्चरति रोचनास्य प्राणादपानती ।
व्यख्यन् महिषो दिवम् ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिंशद्धाम विराजति वाक् पतङ्गाय धीयते ।
प्रति वस्तोरहद्युभिः ॥ ८ ॥ (१)

(द्वितीयो ऽनुवाकः २)

अग्निर्ज्योतिषं त्वा वायुमतीं प्राणवंतीम् ।
स्वर्ग्यां स्वर्गायोपदधामि भास्वंतीम् ।
अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ १ ॥
सूर्यंज्योतिषं त्वा वायुमतीं प्राणवंतीम् ।
स्वर्ग्यां स्वर्गायोपदधामि भास्वंतीम् ।
सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ २ ॥
सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या ।
जुषाणो अग्निर्वेतु स्वाहा ॥ ३ ॥
सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या ।
जुषाणः सूर्यो वेतु स्वाहा ॥ ४ ॥
इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजां रमयतु प्रजापतिः ।
अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा ।
अग्नयेऽन्नादायान्नपतये स्वाहा ॥ ५ ॥
अनमित्रं मे अधरागनमित्रमुदक् कृधि ।
इन्द्रानमित्रं पश्चान्मे ऽनमित्रं पुरस्कृधि ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्मा२ अभि पातु विश्वतः ।
इन्द्रो जिघांसतां मनांसि विषूचीनाव्यस्यतात् ॥ ७ ॥
समिदसि समिद्धो मे अग्ने दीदिहि ।
समेद्धा ते अग्ने दीद्यासम् ॥ ८ ॥ (२)

(तृतीयोऽनुवाकः ३)

उप प्रयन्तो अध्वरं मन्त्रं वोचे माग्नये ।
आरे अस्मे च शृण्वते ॥ १ ॥
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति ॥ २ ॥
उभावामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दातारा इषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥ ३ ॥
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोहाथा नो वर्धया रयिम् ॥ ४ ॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे ॥ ५ ॥
अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः ।
पयः सहस्रसामृषिम् ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तनूपा अंग्नेऽसि तन्वं मे पाह्यायुर्दा अंग्ने स्यायुर्मे देहि ।
वर्चोदा अंग्नेऽसि वर्चो मे देहि ॥ ७ ॥
अग्ने यन्मे तन्वा ऊनं तन्म आपृंण ।

103983

इन्धानास्त्वा शतं हि मा द्युमन्तं समिंधीमहि ॥ ८ ॥
वयंस्वन्तो वयस्कृतं सहंस्वन्तः सहस्कृतंम् ।
अग्ने सपत्नदम्भंनमदंब्धासो अदाभ्यम् ॥ ९ ॥
चित्रा वसो स्वस्ति ते पारमंशीय ।
सं त्वमंग्ने सूर्यस्य वर्चसाऽगथाः समृंषीणां स्तुतेनं ॥ १० ॥
सं प्रियेण धाम्ना समहमायुंषा संवर्चसा,

220/१६-८

सं प्रजया संरायस्पोषेणग्मिषीय ।
अन्धः स्थान्धो वो भक्षीय महः स्थ महो वो भक्षीय ॥ ११ ॥
ऊर्जः स्थोर्जं वो भक्षीय रायस्पोषंः स्थ रायस्पोषं वो भक्षीय।
रेवंती रमंध्वमस्मिन् योनां अस्मिन् गोष्ठेऽस्मिन् क्षयेऽस्मिंल्लोके ॥१२॥
इहैवस्तेतो मापंगात ।
संहितासि विश्वरूप्यूर्जामाविंश गौपत्येनं ॥ १३ ॥
उपं त्वाग्ने दिवे दिंवे दोषावस्तर्धिया वयम् ।
नमो भरंन्त एमंसि ॥ १४ ॥
राजंन्तमध्वराणां गोपामृतस्य दीदिविम् ।
वर्धमानं स्वे दमें ॥ १५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स नः पितेव सूनवेऽग्ने सूपायनो भव ।

स चं स्वानः स्वस्तये ॥ १६ ॥

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।

वसुरग्निर्वसुश्रवा अच्छानक्षिद्युमत्तमꣳ रयिं दाः ॥ १७ ॥

तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।

स नो बोधि श्रुधीहवमुरुष्याणो अघायतः समस्मात् ॥ १८ ॥

इळ एह्यदित एहि काम्य एहि ।

मयि वः कामधरणं भूयात् ॥ १९ ॥

सोमानꣳ स्वरणं कृणु हि ब्रह्मणस्पते ।

कक्षीवन्तं य औशिजः ॥ २० ॥

यो रेवान्यो अमीवहा वसुवित् पुष्टिवर्धनः ।

स नः सिषक्तु यस्तुरः ॥ २१ ॥

मा नः शꣳसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य ।

रक्षाणो ब्रह्मणस्पते ॥ २२ ॥

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः ।

दुराधर्षं वरुणस्य ॥ २३ ॥

न हि तेषाममा चनना ध्वसु वारणेषु ।

ईशे रिपुरघशꣳसः ॥ २४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते हि पुत्रासो अदितेः प्रजीवसे मर्त्याय ।
ज्योतिर्यच्छन्त्यजस्रम् ।। २५ ।।
कदाचनस्तरीरसि नेन्द्रसश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ।। २६ ।।
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।। २७ ।।
परि ते दूळभो रथोऽस्माँ २ अश्नोतु विश्वतः ।
येन रक्षसि दाशुषः ।
समिद्धोमा समर्धय प्रजया च धनेन च ।। २८ ।।

———

(चतुर्थो ऽनुवाकः ४)

भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम् ।
सुवीरो वीरैः सुपोषः पोषैः ।। १ ।।
नर्य प्रजां मे पाहि शंस्य पशून् मे पाहि ।
आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् ।। २ ।।
अग्ने सम्राळभि द्युम्नमभि सह आयच्छस्व ।
अयमग्निर्गृहपतिर्गार्हपत्यः प्रजावान् वसुवित्तमः ।। ३ ।।
अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्व ।
गृहामाबिभीतमावेपध्वमूर्जं बिभ्रत एमसि ।। ४ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहा नैमि मनसा मोदमानः ।
येषामध्येति प्रवसन् येषु सौमनसो बहुः ॥ ५ ॥
गृहानुपह्वयामहे ते नो जानन्तु जानतः ।
उपहूता इह गाव उपहूता अजावयः ॥ ६ ॥
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ।
क्षेमाय वः शान्त्यै प्रपद्ये ।
शिवः शग्मः शंयोः शंयोः ॥ ७ ॥ (४)

———

(पञ्चमो ऽनुवाकः ५)

प्रघासिनो हवामहे मरुतश्चरिशादसः ।
करम्भेण सजोषसः ॥ १ ॥
यद् ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये ।
यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा ॥ २ ॥
मोषूणं इन्द्रात्र पृत्सु देवैरस्ति हिष्मा ते शुष्मिन्न वयाः ।
महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥ २ ॥
अक्रन् कर्म कर्मकृतः सह वाचा मयो भुवा ।
देवेभ्यः कर्म कृत्वास्तं प्रेतं स चा भुवः ॥ ४ ॥
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुण ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं,
पुरुराव्णो देवरिषस्पाहि ॥ ५ ॥ (५)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(षष्ठोऽनुवाकः ६)

पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो ॥ १ ॥
देहि मे ददामि ते नि मे धेहि नि ते दधौ ।
निहारं निहरामि ते निहारं निहरासि मे स्वाहा ॥ २ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥ १ ॥
सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि ।
प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशाँ २ अनु योजान्विन्द्र ते हरी ॥२॥
मनोन्वाहुवामहे नाराशंसेन स्तोमेन ।
पितॄणां च मन्मभिः ॥ ३ ॥
आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे ।
ज्योक् च सूर्यं दृशे ॥ ४ ॥
पुनर्नः पितरो मनो ददातु दैव्यो जनः ।
जीवं व्रातं सचेमहि ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वयꣳसोम व्रते तव मनस्तनूषु बिभ्रतः ।
प्रजावन्तः सचेमहि ॥ ६ ॥ (७)

(अष्टमोऽनुवाकः ८)

एष ते रुद्र भागः सहस्वस्राम्बिकया तं जुषस्व स्वाहा ।
एष ते रुद्र भाग आखुस्ते पशुः ॥ १ ॥
अव रुद्र मदीमह्यव देवं त्र्यम्बकम् ।
यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥ २ ॥
भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम् ।
सुगं मेषाय मेष्यै ॥ ३ ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ४ ॥
त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥ ४ ॥
एतेन रुद्रावसेन परो मूजवतोऽतीहि ।
अवततधन्वा पिनाकावसः कृत्तिवासा अहिꣳसन्नः,
शिवः शान्तोऽतीहि ॥ ६ ॥ (८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

वाजिनां वाजोऽवतु भक्षो अस्मान् रेतः सिक्तममृतं बलाय ।
विश्वे देवा अभि यत् संबभूवुस्तन्मा धिनोतु प्रजया धनेन ॥ १ ॥
वाज्यहं वाजिनस्योपहूत उपहूतस्य भक्षयामि ।
वाजे वाजी भूयासम् ॥ २ ॥
सवित्रा प्रसूता दैव्य आप उन्दन्तु ते तनूम् ।
दीर्घायुत्वाय वर्चसे ॥ ३ ॥
कश्यपस्य त्र्यायुषं जमदग्नेस्त्र्यायुषम् ।
यद् देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् ॥ ४ ॥
येन धाता बृहस्पतेरिन्द्रस्य चायुषे वपत् ।
तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय ॥ ५ ॥
दीर्घायुत्वाय बलाय वर्चसे ।
सुप्रजास्त्वाय चासा अथो जीव शरदः शतम् ॥ ६ ॥ (९) हरिः ओम् ॥

समिधाग्निमष्ट (८) अग्निर्ज्योतिषं त्वाष्ट (८)
उप प्रयन्तोऽष्टाविंशतिः (२८) भूर्भुवः सप्त (७)
प्रघासिनः पञ्च (५) पूर्णा दर्वि द्वे (२) अक्षन्न-
मीमदन्त षट् (६) एष ते षट् (६) वाजिनां
वाजश्च षट् (८) नवानुवाकेषु षट्सप्ततिः (७६)

इति शुक्लयजुर्वेदकाण्वसंहितायां प्रथमदशके तृतीयोऽध्यायः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

प्रथमदशके चतुर्थोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओम् ॥ एदमंगन्म देवयजनं पृथिव्या यत्र देवासो अजुंषन्त विश्वे

ऋक्सामाभ्यां संतरन्तो यजुंर्भी रायस्पोषेण समिषा मदेम ॥ १ ॥

इमा आपः शमु मे सन्तु देवीरोषधे त्रायस्व स्वधिते मैनं हिंसीः ।

आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ २ ॥

विश्वंहि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ।

दीक्षा तपसोस्तनूरसि तां त्वा शिवां शग्मां,

परिदधे भद्रं वर्णं पुष्यन् ॥ ३ ॥ (१)

———

(द्वितीयोऽनुवाकः २)

महीनां पयोऽसि वर्चोदा असि वर्चो मे देहि ।

वृत्रस्य कनीनंकासि चक्षुर्दा असि चक्षुर्मे देहि ॥ १ ॥

चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा,

सविता पुंनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।

तस्यं ते पवित्रपते पवित्रंपूतस्य यत्कामः पुने तच्छंकेयम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आ वो देवास ईमहे वामं प्रयत्यध्वरे ।
आ वो देवास आशिषो यज्ञियासो हवामहे ॥ ३ ॥
स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात् ।
स्वाहा द्यावापृथिवीभ्याᳪं स्वाहा वातादारभे ॥ ४ ॥ (२)

(तृतीयोऽनुवाकः ३)

आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा,
दीक्षायै तपसेऽग्नये स्वाहासरस्वत्यै पूष्णेऽग्नये स्वाहा ॥ १ ॥
आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वन्तरिक्ष ।
बृहस्पतये हविषा विधेम स्वाहा ॥ १ ॥
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥ २ ॥ (३)

(चतुर्थोऽनुवाकः ४)

ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातम् ।
आस्य यज्ञस्योदृचः ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शर्मा॑सि शर्म॑ मे यच्छ नम॑स्ते अस्तु मा मा॑ हिꣳसीः ।
ऊर्ग॑स्याङ्गिरस्यूर्ण॑म्रदा ऊर्ज॑ मे यच्छ ॥ २ ॥
सोम॑स्य नीविर॑सि विष्णोः शर्मा॑सि शर्म यज॑मानस्य ।
इन्द्र॑स्य योनि॑रसि सुसस्याः कृषीस्कृ॑धि ॥ ३ ॥
उच्छ्र॑यस्व वनस्पत ऊर्ध्वो मा॑ पाह्यꣳहसः ।
आस्य यज्ञस्योदृचः ॥ ४ ॥ (४)

(पञ्चमोऽनुवाकः ५)

व्रतं कृ॑णुत व्रतं कृ॑णुत व्रतं कृ॑णुत ।
अग्निर्ब्रह्माग्निर्यज्ञो वनस्पति॑र्यज्ञियः ॥ १ ॥
दैवीं धियं॑ मनामहे सुमृळीकामभिष्ट॑ये ।
वर्चोदां विश्वधा॑यसꣳ सुतीर्था नो॑ असद्वशे ॥ २ ॥
ये देवा मनो॑जाता मनोयुजो द॑क्षक्रतवः ।
ते नो॑ऽवन्तु ते नः पान्तु तेभ्यः स्वाहा॑ ॥ ३ ॥
श्वात्राः पीता भ॑वत यूयमा॑पो अस्माक॑मन्तरुदरे॑ सुशेवाः ।
ता अस्मभ्यं॑मयक्ष्मा अ॑नमीवा अना॑गसः स्वद॑न्तु देवीरमृ॑ता ऋतावृधः ।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं ते यज्ञिया तनूरपो मुञ्चामि न प्रजाम् ।

अंहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्या संभव ॥ ५ ॥

अग्ने त्वंसु जागृहि वयंसु मन्दिषीमहि ।

रक्षा णो अप्रयच्छन् प्रबुधे नः पुनस्कृधि ॥ ६ ॥

पुनर्मनः पुनरायुर्म आगात् पुनश्चक्षुः पुनः श्रोत्रं म आगात् ।

पुनः प्राणः पुनरात्मा म आगात् ।

वैश्वानरो अदब्धस्तनूपा अग्निर्मा पातु दुरितादवद्यात् ॥ ७ ॥

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा ।

त्वं यज्ञेष्वीड्यः ॥ ८ ॥

रास्वेयत् सोमा भूयो भर ।

देवो नः सविता वसोर्दाता वस्वदात् ॥ ९ ॥ (५)

(षष्ठोऽनुवाकः ६)

एषा ते शुक्र तनूरेतद्वर्चस्तया संभव भ्राजं गच्छ ।

जूरसि धृता मनसा जुष्टा विष्णवे ॥ १ ॥

तस्यास्ते सत्यसवसः प्रसवे तनुयन्त्रमशीय स्वाहा ।

चन्द्रमसि शुक्रमस्यमृतमसि वैश्वदेवमसि ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिदंसि मनासि धीरंसि दक्षिणासि क्षत्रियासि,

यज्ञियास्यदिंतिरस्युभयतः शीर्ष्णी ।

सा नः सुप्राची सुप्रंतीची भव ॥ ३ ॥

मित्रस्त्वां पदि बंध्नीतां पूषाध्वंनस्पात्विन्द्रायाध्यंक्षाय ।

अनुं त्वा माता मंन्यतामनुं पितानु भ्राता,

सगर्भ्योऽनु सखा सयूंथ्यः ॥ ४ ॥

सा देंवि देवमच्छेहीन्द्राय सोमंम् ।

रुद्रस्त्वावंर्तयतु स्वस्ति सोमंसखा पुनरेहिं ॥ ५ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

वस्व्यस्यदिंतिरस्यादित्यासिं रुद्रासिं चन्द्रासिं ।

बृहस्पतिष्ट्वा सुम्ने रंम्णा तु रुद्रो वसुंभिराचंके ॥ १ ॥

अदिंत्यास्त्वा मूर्धन्नाजिंघर्मि देवयजंने पृथिव्याः ।

इळायास्पदमंसि घृतवत् स्वाहा ॥ २ ॥

अस्मे रंमस्वास्मे ते बन्धुः ।

त्वे रायो अस्मे रायः ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मावयꣳरायस्पोषेणवियौष्मतोतोरायः ।

समंरण्येदेव्याधियासंदक्षिणयोरुचंक्षसा ।

माम आयुः प्रमोषीर्मो अहंतवंवीरान्-

विंदेय तवंदेविसंदृशि ॥ ४ ॥ (११)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अष्टमोऽनुवाकः ८)

एषतै गाय त्रोभाग इति मेसोमाय ब्रूतात् ।

एषतेत्रैष्टुंभोभाग इति मेसोमाय ब्रूतात् ।

एषतेजागंतो भाग इति मेसोमाय ब्रूताच्छंदोमानानाᳬ-

साम्राज्यंगच्छतादितिमेसोमायब्रूतात् ॥ १ ॥

आस्माकोंऽसिशुक्रस्ते ग्रह्यः ।

विचितंस्त्वाविचिन्वन्तु ॥ २ ॥

अभित्यंदेवᳬसंवितारंमोण्योः कविक्रंतु-

मर्चामिसत्यसंवᳬरत्नधामभिप्रियंमतिंकविं ।

ऊर्ध्वाःयस्यामति र्भाः अदि द्युततत्सवीमनि-

हिरंण्यपाणिरमिमीतसुक्रतुः कृपा स्वः ॥ ३ ॥

प्रजाभ्यंस्त्वा प्रजास्त्वाऽनु प्राणंन्तु ।

प्रजास्त्वमंनु प्राणिं हि ॥ ४ ॥ ॥ अनुवाकः ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नवमोऽनुवाकः ९)

चन्द्रं त्वा चन्द्रेणं क्रीणामि शुक्रꣳ शुक्रेणामृतममृतेन ।
सग्मे ते गोरस्मे ते चन्द्राणि ॥ १ ॥
तपसस्तनूरसि प्रजापतेर्वर्णः ।
परमेणं पशुना क्रीयसे सहस्रपोषं पुषेयम् ॥ २ ॥
मित्रो न एहि सुमित्रध इन्द्रस्योरुमाविश दक्षिणम् ।
उशन्नुशन्तꣳस्योनः स्योनम् ॥ ३ ॥
स्वानभ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानो ।
एते वः सोमक्रयणास्तान् रक्षध्वं मा वो दभन् ॥ ४ ॥
परिमाग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज ।
उदायुषा स्वायुषोदस्थाममृताँ २ अनु ॥ ५ ॥
प्रति पन्थामपद्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥ ६ ॥ (९)

—०—

(दशमोऽनुवाकः १०)

अदित्यास्त्वगस्यदित्यै सद आसीद ।
अस्तभ्नाद्द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयं उस्रियासु ।

हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ ॥ २ ॥

सूर्यस्य चक्षुरारोहाग्नेरक्ष्णः कनीनकाम् ।

यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता ॥ ३ ॥

उस्रा एतं धूर्षाहौ युज्येथामनश्रू अवीरहणौ ब्रह्म चोदनौ ।

स्वस्ति यजमानस्य गृहान् गच्छतम् ॥ ४ ॥

भद्रो मेऽसि प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि ।

मा त्वा परिपरिणो विदन् मा त्वा परिपन्थिनो विदन्,

मा त्वा वृका अघायवो विदन् ।

श्येनो भूत्वा परापत यजमानस्य गृहान् गच्छ तन्नौ संस्कृतम् ॥ ५ ॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।

दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥ ६ ॥

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थः ।

वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि,

वरुणस्य ऋतसदनी मासीद ॥ ७ ॥

याते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।

गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ॥ ८ ॥ (१०)

हरिः ओम् ॥

—*—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एदमगन्मतिस्रः (३) महीनां चतस्रः (४)
आकूत्यै द्वे (२) ऋक्सामयोश्चतस्रः (४)
व्रतं कृणुत नव (९) एषा ते पञ्च (५)
वस्व्यसि चतस्रः (४) एष ते चतस्रः (४)
चन्द्रं त्वा षट् (६) अदित्यास्त्वगष्ट (८)
दशानुवाकेष्वेकोनपञ्चाशत् (४९)

इति शुक्लयजुर्वेदकाण्वसंहितायां प्रथमदशके चतुर्थोऽध्यायः (४)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

प्रथमदशके पञ्चमोऽध्यायः

(प्रथमोऽनुपाकः १)

अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वा ।
अतिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते,
विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥ १ ॥

अग्नेर्जनित्रमसि वृषणौ स्थः ।
उर्वश्यस्यायुरसि पुरूरवा असि ।
गायत्रेण त्वा च्छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि,
जागतेन त्वा च्छन्दसा मन्थामि ॥ २ ॥

भवतं नः समनसौ सचेतसा अरेपसौ ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ,
शिवौ भवतमद्य नः ॥ ३ ॥

अग्ना अग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपावा ।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ॥ ४ ॥

(द्वितीयोऽनुवाकः २)

आपतये त्वा गृह्णामि परिपतये त्वा गृह्णामि ।
तनूनप्त्रे शाक्वराय शक्मन्नोजिष्ठाय ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनाधृष्टमस्यनाधृष्यं देवानामोजः ।
अनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यम् ॥ २ ॥
अञ्जसा सत्यमुपगेषं सुविते मा धाः ।
अग्ने व्रतपास्त्वे व्रतपाः ॥ ३ ॥
या तव तनूरियं सा मयि या मम तनूरेषा सा त्वयि ।
सह नौ व्रतपते व्रतान्यनु मे दीक्षां
दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः ॥ ४ ॥
अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व ॥ ५ ॥
आप्याययास्मान्त्सखीन्त्सन्या मेधया ।
स्वस्ति ते देवसोम सुत्यामुदृचमशीय ॥ ६ ॥
एष्टा रायः प्रेषे भगाय ।
ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्यै ॥ ७ ॥
या ते अग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचो अपावधीत्त्वेषं वचो अपावधीत् स्वाहा ॥ ८ ॥
या ते अग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचो अपावधीत्त्वेषं वचो अपावधीत्स्वाहा ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या ते अग्ने हरीशया तनूर्वर्षिष्ठा गृह्वरेष्ठा ।

उग्रं वचो अपावधीत् त्वेषं वचो अपावधीत् स्वाहा ॥ ८ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

तप्तायनी मेऽसि वित्तायनी मेऽसि ।

अवतान्मा व्यथितमवतान्मा नाथितम् ॥

विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि ।

योऽस्यां पृथिव्यामसि यत्तेनाधृष्टं,

नाम यज्ञियं तेन त्वाऽऽदधे ।

विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि।

यो द्वितीयस्यां पृथिव्यामसि यत्तेनाधृष्टं

नाम यज्ञियं तेन त्वाऽऽदधे ॥

विदेरग्नेर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि ।

यस्तृतीयस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वाऽऽदधे ।

अनु त्वा देववीतये सिꣳहासि सपत्नसाही देवेभ्यः कल्पस्व,

सिꣳहासि सपत्नसाही देवेभ्यः शुन्धस्व सिꣳहासि,

सपत्नसाही देवेभ्यः शुम्भस्व ॥ २ ॥ (३)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(चतुर्थोऽनुवाकः ४)

इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु,
प्रचेतास्त्वा रुद्रैः पश्चात् पातु ।
मनोजवास्त्वा पितृभिर्दक्षिणतः पातु
विश्वकर्मा त्वाऽऽदित्यैरुत्तरतः पातु ॥ १ ॥
इदमहं तप्तं वार्बहिर्धा यज्ञान्निः सृजामि ।
सिꣳह्यसि स्वाहा सिꣳह्यस्यादित्यवनिः स्वाहा ॥ २ ॥
सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा सिꣳह्यसि सुप्रजावनी,
रायस्पोषवनिः स्वाहा ।
सिꣳह्यस्यावह देवान् यजमानाय स्वाहा भूतेभ्यस्त्वा ॥ ३ ॥
ध्रुवोऽसि पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳह ।
अच्युतक्षिदसि दिवं दृꣳहाग्नेर्भस्मास्यग्नेः पुरीषमसि ॥ ४ ॥

(पञ्चमोऽनुवाकः ५)

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
विहोत्रा दधे वयुना विदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ १ ॥
इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् ।
समूढमस्य पाꣳसुरे स्वाहा ॥ २ ॥
इरावती धेनुमतीह भूतꣳ सूयवसिनी मनवे दशस्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यस्कभ्ना रोदसी विष्ण एते दाधर्थ-

पृथिवीमभितो मयूखैः स्वाहा ॥ ३ ॥

देव श्रुतौ देवेष्वाघोषतम् ।

प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम् ॥ ४ ॥

स्वं गोष्ठमावदतं देवी दुर्ये आयुर्मानिर्वादिष्टं प्रजां मा निर्वादिष्टम् ।

अत्र रमेथां वर्ष्मन् पृथिव्याः ॥ ५ ॥

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाᳬसि ।

यो अस्कभायदुत्तरᳬ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥६॥

दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात् ।

उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद् विष्णवे त्वा ॥

प्र तद्विष्णुस्तव ते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ ८ ॥

विष्णो रराटमसि विष्णो श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि ।

वैष्णवमसि विष्णवे त्वा ॥ ९ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

आददे नार्यसीदमहᳬरक्षसो ग्रीवा अपिकृन्तामि ।

बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचं वद ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षोहणं बलगहनं वैष्णवीम् ।। १ ।।

इदमहं तं बलगमुद्वपामि यं नो निष्ट्यो यममात्यो निचखानं ।

इदमहं तं बलगमुद्वपामि यं नः समानो यमसमानो निचखानं ॥

इदमहं तं बलगमुद्वपामि यं नः सबन्धुर्यमसबन्धुर्निचखानं ।

इदमहं तं बलगमुद्वपामि यं नः सजातो,

यमसंजातो निचखानोत्कृत्यां किरामि ।। २ ।।

स्वराळसि सपत्नहा सत्रराळस्यभिमातिहा ।

जनराळसि रक्षोहा सर्वराळस्यमित्रहा ।। ३ ।।

रक्षोहणो बलगहनः प्रोक्षामि वैष्णवान्,

रक्षोहणो बलगहनोऽवनयामि वैष्णवान् ।

रक्षोहणो बलगहनोऽवस्तृणामि वैष्णवान् ।। ४ ।।

रक्षोहणौ बलगहना उपदधामि वैष्णवी,

रक्षोहणौ बलगहनौ पर्यूहामि वैष्णवी ।

वैष्णवमसि वैष्णवा स्थ ।। ५ ।। (६)

—— ० ——

(सप्तमोऽनुवाकः ७)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

आददे नार्यसीदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि ।।

6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यवोऽसि यवयास्मद् द्वेषो यवयारातीः ।

दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा ॥ १ ॥

शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ।

उद्दिवंस्तभानान्तरिक्षं पृण दृंहस्व पृथिव्याम् ॥ २ ॥

द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्मणा ।

ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि ॥ ३ ॥

ब्रह्म दृंह क्षत्रं दृंहायुर्दृंह प्रजां दृंह ।

ध्रुवासि ध्रुवोऽस्मिन् यजमान आयतने भूयात् ॥

घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया ॥४॥

परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।

वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥ ५ ॥

इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽसि ।

ऐन्द्रमसि वैश्वदेवमसि ॥ ६ ॥ (७)

—०—

(अष्टमोऽनुवाकः ८)

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः ।

श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदाः ॥ १ ॥

उशिगसि कविरङ्घारिरसि बम्भारिः ।

अवस्यूरसि दुवस्वाञ्छुन्ध्यूरसि मार्जालीयः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतधामासि स्वर्ज्योतिः समुद्रोऽसि विश्वव्यचाः ।
अजोऽस्येकपादहिरसि बुध्न्यः ॥ ३ ॥
सम्राळसि कृशानुः परिषद्योऽसि पवमानः ।
नभोऽसि प्रतक्वा मृष्टोऽसि हव्यसूदनः ॥ ४ ॥
समूह्योऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठा ।
अग्नयः सगराः सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन ।
पातमाग्नयः पिपृतमाग्नयो नमो वोऽस्तु मा मा हिंसिष्ट ॥ ५ ॥ (८)

—०—

(नवमोऽनुवाकः ९)

ज्योतिरसि विश्वरूपं विश्वेषां देवानांसमित् ।
त्वं सोम तनूकृद्भ्यो द्वेषोभ्यो ऽन्यकृतेभ्यः ।
उरु यन्तासि वरूथं स्वाहा ।
जुषाणो अप्तुराज्यस्य वेतु स्वाहा ॥ १ ॥
अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ २ ॥
अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयं वाजाञ्जयतु वाजसाता,
अयंशत्रूञ्जयतु जर्हृषाणः स्वाहा ।
ऊरु विष्णो विक्रमस्वोरुक्षयाय न स्कृधि ।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वहा ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवसवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ।

एतत्वं देव सोम देवो देवाँ २ उपागाः ॥ ५ ॥

इदमहं मनुष्यान्त्सह रायस्पोषेण स्वाहा निर्वरुणस्य पाशान्मुच्ये ।

अग्ने व्रतपास्त्वे व्रतपाः ॥ ६ ॥

या तव तनूर्मय्यभूदेषा सा त्वयि या मम,

तनूस्त्वय्यभूदियꣳ सा मयि ।

यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां,

दीक्षापतिरमꣳस्तानु तपस्तपस्पतिः ॥ ७ ॥ (९)

—०—

(दशमोऽनुवाकः १०)

उरु विष्णो विक्रमस्वोरुक्षयाय नस्कृधि ।

घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥ १ ॥

अत्यन्याँ २अगां नान्याँ२ उपागाम् ।

अर्वाक्त्वा परेभ्यः परो ऽवरेभ्यः ॥ २ ॥

तं त्वा जुषामहे देववनस्पते देवयज्यायै ।

देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा ॥ ३ ॥

ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ।

दिवं मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या संभव ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयꣳहि त्वा स्वधितिस्तेतिजानः प्रणिनायं महते सौभंगाय ।
अतस्त्वं देव वनस्पते शतवंल्शो विरोह,
सहस्रंवल्शा वि॒वयꣳ रुहेम ॥ ५ ॥ (१०)

अग्नेस्तनूरसि चतस्रः (४) आपतयेऽष्ट (८)
तप्तायनी द्वे (२) इन्द्रघोषाश्चतस्रः (४)
युञ्जते नव (९) देवस्य त्वा पञ्च (५)
द्वितीयदेवस्य त्वा षट् (६) विभूरसि पञ्च (५)
ज्योतिरसि सप्त (७) उरु विष्णो पञ्च (५)
दशानुवाकेषु पञ्चपञ्चाशत् (५५)
अग्नेस्तनूरसि पञ्चपञ्चाशत् ॥

इति शुक्लयजुर्वेदकाण्वसंहितायां प्रथमदशके पञ्चमोऽध्यायः (५)

— * —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

प्रथमदशके षष्ठो ऽध्यायः

(प्रथमोऽनुवाकः १)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आददे नार्यसीदमहꣳरक्षसो ग्रीवा अपि कृन्तामि ।
यवोऽसि यवयास्मद् द्वेषो यवयारातीः ।
दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा ।
शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥ १ ॥
अग्रेणीरसि स्वावेश उन्नेतॄणामेतस्य वित्तादधि त्वा स्थास्यति ।
देवस्त्वा सविता मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधीभ्यः ।
दिवमग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳहीः ॥ २ ॥
या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राहैतदुरुगायस्य विष्णोः परमं पदमवभारि भूरि ॥ ३ ॥
ब्रह्मवनि त्वा क्षत्रवनिं रायस्पोषवनि पर्यूहामि ।
ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ॥ ४ ॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥ ६ ॥
परि वीरसि परि त्वा दैवीर्विशो व्ययन्ताम् ।
परीमं यजमानꣳ रायो मनुष्याणाम् ।
दिवः सूनुरस्येष ते पृथिव्याँल्लोक आरण्यस्ते पशुः ॥ ७ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

उपावीरस्युप देवान् दैवीर्विशः प्रागुरुशिजो वह्नितमान् ।
देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ॥ १ ॥
रेवती रमध्वं बृहस्पते धारया वसूनि ।
ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि धर्षा मानुषः ॥ २ ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अग्नीषोमाभ्यां जुष्टं नियुनज्मि ।
अद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यनु त्वा माता मन्यतामनु पितानु,
भ्राता सगर्भ्योऽनु सखा सयूथ्यः ।
अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥ ३ ॥
अपां पेरुरस्यापो देवीः स्वदन्तु ।
स्वात्तं चित्सदेवहविः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सं ते॑ प्राणो वाते॑न गच्छता॒ꣳ समङ्गा॑नि॒ यज॑त्रैः ।
सं य॑जमान आ॒शिषा॑ ॥ ५ ॥
घृतेना॒क्तौ प॒शुं त्रा॑येथा॒ꣳ रेव॑ति॒ यज॑माने ।
प्रि॒यं धा आ वि॑श ॥ ६ ॥
उ॒रोर॒न्तरि॑क्षात् स॒जूर्दे॒वेन॒ वाते॑न ।
अ॒स्य ह॒वि॒ष॒स्त्मना॑ य॒ज समस्य त॒न्वा॑ भव ॥ ७ ॥
वर्षो॒ वर्षी॑यसि य॒ज्ञे य॒ज्ञप॑तिं धाः ।
स्वाहा॑ दे॒वेभ्यो॑ दे॒वेभ्यः॑ स्वाहा॑ ।
माहि॑र्भू॒र्मा पृदा॑कुः ॥ ८ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

नम॑स्त आतानान॒र्वा प्रेहि॑ ।
घृ॒तस्य॑ कु॒ल्या उप॒ ऋ॒तस्य॒ पथ्या॒ उप॑ ॥ १ ॥
दे॒वीरापः॑ शु॒द्धा वो॑ढ्व॒ꣳ सुप॑रिविष्टा दे॒वेषु॑ ।
सुप॑रिविष्टा व॒यं प॑रिवे॒ष्टारो॑ भूया स्म ॥ २ ॥
वाचं॑ ते शुन्धामि प्रा॒णं ते॑ शुन्धा॒मि,
चक्षुं॑स्ते शुन्धा॒मि श्रोत्रं॑ ते शुन्धामि ।
नाभिं॑ ते शुन्धा॒मि मेढ्रं॑ ते शुन्धामि,
पा॒युं ते॑ शुन्धामि च॒रित्रा॒ꣳस्ते शुन्धामि ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनस्त आप्यायतां वाक्त आप्यायतां प्राणस्त आप्यायतां,
चक्षुस्त आप्यायताꣳ श्रोत्रं त आप्यायताम् ।
यत्ते क्रूरं यदास्थितं तत्त आप्यायतां तत्ते,
निष्ठ्यायतां तत्ते शुध्यतु शमहोभ्यः ॥ ४ ॥
ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ।
रक्षसां भागोऽसि निरस्तꣳ रक्षः ॥ ५ ॥
इदमहꣳ रक्षोऽभितिष्ठामीदमहꣳ रक्षोऽवबाधे ।
इदमहꣳ रक्षोऽधमं तमो नयामि ॥ ६ ॥
घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वे स्तोकानाम् ।
जुषाणो अग्निराज्यस्य वेतु स्वाहा ।
स्वाहाकृते ऊर्ध्वनभसं मारुतं गच्छतम् ॥ ७ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

सं ते मनो मनसा सं प्राणः प्राणेन गच्छताम् ।
रेळस्यग्निष्ट्वा श्रीणात्वापस्त्वा समरिणन् ॥ १ ॥
वातस्य त्वा ध्राज्यै पूष्णो रꣳह्या ऊष्मणो व्यथिषत् ।
प्रयुतं द्वेषः ॥ २ ॥
घृतं घृतपावानः पिबत वसां वसापावानः पिबत ।
अन्तरिक्षस्य हविरसि स्वाहा ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।
ऐन्द्रः प्राणो अङ्गे अङ्गे निधीत ऐन्द्र उदानो अङ्गे अङ्गे निदीधे ॥ ४ ॥
देव त्वष्टर्भूरि ते सꣳसमेतु स लक्ष्मा यद्विषुरूपं भवाति ।
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥ ५ ॥

(पञ्चमोऽनुवाकः ५)

समुद्रं गच्छ स्वाहा देवꣳ सवितारं गच्छ स्वाहा ।
अन्तरिक्षं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा ।
अहोरात्रे गच्छ स्वाहा च्छन्दाꣳसि गच्छ स्वाहा ।
द्यावापृथिवी गच्छ स्वाहा सोमं गच्छ स्वाहा ।
यज्ञं गच्छ स्वाहा नभो दिव्यं गच्छ स्वाहा ।
अग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ ॥ १ ॥
दिवं ते धूमो गच्छत्वन्तरिक्षं ज्योतिः ।
पृथिवीं भस्मनापृण स्वाहा ॥ २ ॥
मापो मौषधीर्हिꣳसीर्धाम्नो धाम्नो राजꣳस्ततो वरुण नो मुञ्च ।
यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ ३ ॥
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदमापः प्रवहत यत् किं चं दुरितं मयिं ।

यद्वाहमंभिदुद्रोह यद्वा शेप उतानृतम् ॥ ५ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

हविष्मंतीरिमा आपो हविष्माँ ३ आविंवासति ।

हविष्मान् देवो अंध्वरो हविष्माँ ३ अस्तु सूर्यः ॥ १ ॥

अग्नेर्वोऽपन्नगृहस्य सदंसि सादयामि ।

इन्द्राग्न्योर्भागधेयीं स्थ मित्रावरुंणयोर्भागधेयीं स्थ ।

विश्वेषां देवानां भागधेयीं स्थ ॥ २ ॥

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह ।

ता नो हिन्वन्त्वध्वरम् ॥ ३ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

हृदे त्वा मनंसे त्वा दिवे त्वा सूर्याय त्वा ।

ऊर्ध्वो अंध्वरं दिवि देवेषु होत्रां यच्छ ॥ १ ॥

सोमं राजन् विश्वास्त्वं प्रजा उपावंरोह ।

विश्वास्त्वां प्रजा उपावंरोहन्तु ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः ।

श्रोता ग्रावाणो विदुषो न यज्ञꣳशृणोतु देवः सविता हवं मे स्वाहा ॥३॥

देवीरापो अपां नपाद्यो वं ऊर्मिर्हविष्यः ।

इन्द्रियावान् मदिन्तमः ॥ ४ ॥

तं देवेभ्यो देवत्रा दात शुक्रपेभ्यः ।

येषां भाग स्थ स्वाहा ॥ ५ ॥

कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि ।

समापो अद्भिरग्मत समोषधीभिरोषधीः ॥ ६ ॥

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः ।

स यन्ता शश्वतीरिषः स्वाहा ॥ ७ ॥ (७)

—०—

(अष्टमोऽनुवाकः ८)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

आददे रावासि गभीरमिममध्वरं कृधीन्द्राय सुषूतमम् ।

उत्तमेन पविनोर्जस्वन्तं मधुमन्तं पयस्वन्तम् ।

निग्राभ्या स्थ देवश्रुतस्तर्पयत मा ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनों मे तर्पयत वाचंमे तर्पयत प्राणं मे तर्पयत,

चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत।

आत्मानं मे तर्पयत प्रजां मे तर्पयत पशून् मे तर्पयत,

गणान् मे तर्पयत गणा मे मा वितृषन् ॥ २ ॥

इन्द्राय त्वा वसुमते रुद्रवंत इन्द्राय त्वादित्यवंते ।

इन्द्राय त्वाभिमातिघ्ने श्येनायं त्वा सोमभृतेऽग्नये,

त्वा रायस्पोषदे ॥ ३ ॥

यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरा अन्तरिक्षे ।

तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वोचः ॥ ४ ॥

श्वात्रा स्थ वृत्रतुरो राधो गूर्ता अमृतस्य पत्नीः ।

ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य पिबत ॥ ५ ॥

मा भेर्मा संविक्था ऊर्जं धत्स्व धिषणे वीड्वी सती,

वीडयेथामूर्जं दधाथाम् ।

पाप्मा हतो न सोमः ॥ ६ ॥

प्रागपागुदगधराक् सर्वतस्त्वा दिश आधावन्तु ।

अम्ब निष्पर समरीर्विदाम् ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वमङ्ग प्रशंसिषो देवः शविष्ठ मर्त्यम् ।

न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ ८ ॥ (८)

देवस्य त्वा सप्त (७) उपावीरस्यष्ट (८) नमस्ते सप्त (७)
सन्ते पञ्च (५) समुद्रं पञ्च (५) हविष्मतीस्तिस्रः (३)
हृदे त्वा सप्त (७) देवस्य त्वाष्ट (८) अष्टानुवाकेषु
पञ्चाचत् (५०) इषे देवस्य समाः पञ्चाशत् ॥

इति शुक्लयजुर्वेदकाण्वसंहितायां प्रथमदशके षष्ठोऽध्यायः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

प्रथमदशके सप्तमोऽध्यायः

(प्रथमो ऽनुवाकः १)

वाचस्पतये पवस्व वृष्णो अंशुभ्यां गभस्तिपूतः ।
देवो देवेभ्यः पवस्व येषां भागोऽसि मधुमतीर्न इषस्कृधि ॥ १ ॥
यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा ।
स्वाहोर्वन्तरिक्षमन्वेमि स्वाङ्कृतोऽसि विश्वेभ्य,
इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः ॥ २ ॥
मनस्त्वाष्टु स्वाहा त्वा स्वभवः सूर्याय ।
देवेभ्यस्त्वा मरीचिपेभ्यो देवांशो यस्मै त्वेळे ।
तत्सत्यमुपरिप्लुता भङ्गेन हतोऽसौ फट् ।
प्राणय त्वा व्यानाय त्वा ॥ ३ ॥ (१)

—o—

(द्वितीयोऽनुवाकः २)

उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोमम् ।
उरुष्य रायोवेषो यजस्व ॥ १ ॥
अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन् मादयस्व ।
स्वाहोर्वन्तरिक्षमन्वेमि स्वाङ्कृतोऽसि विश्वेभ्य,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः ।

मनस्त्वाष्टु स्वाहा त्वा स्वभवः सूर्याय ।

देवेभ्यस्त्वा मरीचिपेभ्य उदानाय त्वा ॥ २ ॥ (२)

—*—

(तृतीयोऽनुवाकः ३)

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।

उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा ॥ १ ॥

इन्द्रवायू इमे सुता उप प्रयोभिरागतम् ।

इन्दवो वामुशन्ति हि ।

उपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वैष ते योनिः

सजोषोभ्यां त्वा ॥ २ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।

ममेदिह श्रुतꣳ हवम् ।

उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वा ॥ १ ॥

राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तां धेनुं मित्रावरुणा युवं नो विश्वहा धत्तमनपस्फुरन्तीम् ।

एष ते योनिर्ऋतायुभ्यां त्वा ॥ २ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

या वां कशा मधुमत्यश्विना सूनृतावती ।

तया यज्ञं मिमिक्षतम् ।

उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥ १ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ।

प्रतीचीनं वृजिनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे ।

उपयामगृहीतोऽसि शण्डाय त्वा ॥ १ ॥

एष ते योनिर्वीरतां पाह्यपमृष्टः शण्डो देवस्त्वा,

शुक्रपाः प्रणयन्त्वनाधृष्टासि ।

सुवीरो वीरान् प्रजनयन् परीह्यभि रायस्पोषेण यजमानम् ।

सं जग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा निरस्तः,

शण्डः शुक्रस्याधिष्ठानमसि ॥ २ ॥

8

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।

सा प्रथमा सꣳस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥ ३ ॥

स प्रथमो बृहस्पतिश्चिकित्वाꣳस्तस्मा इन्द्राय सुतमा जुहोत स्वाहा ।

तृम्पन्तु होत्रा मधोर्यत्स्विष्टँ यत्सुभृतं यत् स्वाहा ॥ ४ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।

इममपाꣳ संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ।

उपयामगृहीतोऽसि मर्काय त्वा ॥ १ ॥

मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।

आ यः शर्याभिस्तुविनृम्णो अस्याऽऽश्रीणीताऽऽदिशं गभस्तौ ॥ २ ॥

एष ते योनिः प्रजाः पाह्यपमृष्टो मर्को देवास्त्वा,

मन्थिपाः प्रणयन्त्वनाधृष्टासि ।

सुप्रजाः प्रजाः प्रजनयन् परी ह्यभि रायस्पोषेण यजमानम् ।

सं जग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो,

मर्को मन्थिनोऽधिष्ठानमसि ॥ ३ ॥

अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।

सा प्रथमा सꣳस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इन्द्राय सुतमा जुहोत स्वाहा ।
तृम्पन्तु होत्रा मधोर्यत्स्विष्टं यत्सुभृतं यत् स्वाहा ॥ ५ ॥ (७)

—०—

(अष्टमोऽनुवाकः ८)

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सु क्षितौ महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ १ ॥
उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः ।
पाहि यज्ञं पाहि यज्ञपतिम् ॥ २ ॥
विष्णुस्त्वामिन्द्रियेण पातु विष्णु त्वं पाह्यभि सवनानि पाहि ।
सोमः पवते सोमः पवते सोमः पवते ॥ ३ ॥
अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सुन्वते यजमानाय पवते ।
इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते,
सुभूताय पवते ब्रह्मवर्चसाय पवते ।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ ४ ॥ (८)

—०—

(नवमोऽनुवाकः ९)

उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवं गृह्णामि ।
यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरुक्थेभ्यस्त्वा ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवेभ्यस्त्वा देवायुवं गृह्णामि यज्ञस्यायुषे मित्रावरुणभ्यां त्वा,

देवायुवं गृह्णामि यज्ञस्यायुषे ॥

इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राग्निभ्यां त्वा,

देवायुवं गृह्णामि यज्ञस्यायुषे ॥

इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्रावरुणाभ्यां त्वा,

देवायुवं गृह्णामि यज्ञस्यायुषे ।

इन्द्राबृहस्पतिभ्यां त्वा देवायुवं गृह्णामि यज्ञस्पायुष इन्द्राविष्णुभ्यां त्वा,

देवायुवं गृह्णामि यज्ञस्यायुषे ॥ २ ॥ (९)

—०—

(दशमोऽनुवाकः १०)

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।

कविंꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ १ ॥

उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां,

ध्रुवतमोऽच्युतानामच्युतक्षित्तमः ।

एष ते योनिर्वैश्वानराय त्वा ॥ २ ॥

ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि ।

अथा न इन्द्र इद्विशो सपत्नाः समनसस्करत् ॥ ३ ॥ (१०)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(एकादशोऽनुवाकः ११)

यस्ते द्रप्स स्कन्दति यस्ते अꣳशुर्ग्रावच्युतो धिषणयोरुपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा,
वषट्कृतꣳ स्वाहा देवानामुत्क्रमणमसि ॥ १ ॥ (१)

—०—

(द्वादशोऽनुवाकः १२)

उपयामगृहीतोऽसि मधवे त्वोपयामगृहीतोऽसि माधवाय त्वा ।
उपयामगृहीतोऽसि शुक्राय त्वोपयामगृहीतोऽसि शुचये त्वा ।
उपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽसि नभस्याय त्वा ।
उपयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्यूर्जे त्वा ।
उपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्याय त्वा ।
उपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वा ।
उपयामगृहीतोऽस्यꣳहसस्पतये त्वा ॥ १ ॥ (१२)

—०—

(त्रयोदशोऽनुवाकः १३)

इन्द्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरेण्यम् ।
अस्य पातं धियेषिता ।
उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥१॥ (३१)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवेभ्यस्त्वा देवायुवं गृह्णामि यज्ञस्यायुषे मित्रावरुणाभ्यां त्वा,

देवायुवं गृह्णामि यज्ञस्यायुषे ॥

इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राग्निभ्यां त्वा,

देवायुवं गृह्णामि यज्ञस्यायुषे ॥

इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्रावरुणाभ्यां त्वा,

देवायुवं गृह्णामि यज्ञस्यायुषे ।

इन्द्राबृहस्पतिभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राविष्णुभ्यां त्वा,

देवायुवं गृह्णामि यज्ञस्यायुषे ॥ २ ॥ (९)

—०—

(दशमोऽनुवाकः १०)

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।

कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ १ ॥

उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां,

ध्रुवतमोऽच्युतानामच्युतक्षित्तमः ।

एष ते योनिर्वैश्वानराय त्वा ॥ २ ॥

ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि ।

अथा न इन्द्र इद्विशो सपत्नाः समनसस्करत् ॥ ३ ॥ (१०)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(एकादशोऽनुवाकः ११)

यस्ते॑ द्र॒प्स स्कन्द॑ति यस्ते॑ अ॒ꣳशुर्ग्रावच्युतो धिषणयोरुपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते॑ जुहोमि मन॑सा,
वषट्कृतꣳ स्वाहा देवानामुत्क्रमणमसि ॥ १ ॥ (१)

—०—

(द्वादशोऽनुवाकः १२)

उपयामगृहीतोऽसि मध॑वे त्वोपयामगृहीतोऽसि माध॑वाय त्वा ।
उपयामगृहीतोऽसि शुक्राय॑ त्वोपयामगृहीतोऽसि शुच॑ये त्वा ।
उपयामगृहीतोऽसि नभ॑से त्वोपयामगृहीतोऽसि नभस्याय त्वा ।
उपयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्यूर्जे त्वा ।
उपयामगृहीतोऽसि सह॑से त्वोपयामगृहीतोऽसि सहस्याय त्वा ।
उपयामगृहीतोऽसि तप॑से त्वोपयामगृहीतोऽसि तपस्याय॑ त्वा ।
उपयामगृहीतोऽस्यꣳहसस्पतये॑ त्वा ॥ १ ॥ (१२)

—०—

(त्रयोदशोऽनुवाकः १३)

इन्द्राग्नी आगतꣳ सुतं गीर्भिर्नमो वरे॑ण्यम् ।
अस्य पातं धियेषिता ।
उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥१॥ (३१)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(चतुर्दशोऽनुवाकः १४)

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।

येषामिन्द्रो युवा सखा ।

उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वैष ते त्योनिरग्नीन्द्राभ्यां वा ॥१॥ (१४

———

(पञ्चदशोऽधुवाकः १५)

ओमासश्चर्षणीधृतो विश्वे देवास आ गंत ।

दाश्वाꣳसो दाशुषः सुतम् ।

उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यं,

एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ १ ॥ (१५)

———

(षोडशोऽनुवाकः १६)

विश्वे देवास आगंत शृणुता मं इमꣳ हवंम् ।

एदं बर्हिर्निषीदत ।

उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यं,

एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ १ ॥ (१६)

—०—

(सप्तदशोऽनुवाकः १७)

इन्द्रं मरुत्व इह पाहि सोमं यथा शार्याते अपिंबः सुतस्यं ।

तव प्रणीती तवं शूर शर्मन्नाविवासन्ति कवयंः सुयज्ञाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वंत,

एष ते योनिरिन्द्राय त्वा मरुत्वंते ॥ १ ॥ (१७)

मरुत्वंन्तं वृषभं वावृधानमकंवारिं दिव्यंᳪ शासमिन्द्रंम् ।

विश्वासाहमवंसे नूतंनायोग्रंᳪ संहोदामिह तᳪ हुंवेम ।

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वंत,

एष ते योनिरिन्द्राय त्वा मरुत्वंते ॥ १ ॥ (१८)

—०—

(एकोनविंशोऽनुवाकः १९)

उपयामगृहीतोऽसि मरुतं । ओजंसे त्वा ॥ १ ॥ (१९)

—०—

(विंशोऽनुवाकः २०)

सजोषा इन्द्र सगंणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।

जहि शत्रूᳪ रप मृधो नुदस्वाथाभंयं कृणुहि विश्वतो नः ।

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वंत,

एष ते योनिरिन्द्राय त्वा मरुत्वंते ॥ १ ॥ (२०)

—०—

(एकविंशोऽनुवाकः २१)

महाँ ३ इन्द्रो नृवदा चंर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।

अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृंतः कर्तृभिर्भूत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपयामगृहीतोऽसि महेन्द्रायं त्वैष ते,

योनिर्महेन्द्राय त्वा ॥ १ ॥ (२१)

—०—

(द्वाविंशोऽनुवाकः २२)

महाँ ३ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ ३ इव,

स्तोमैर्वत्सस्य वावृधे ।

उपयामगृहीतोऽसि महेन्द्राय त्वैष ते,

योनिर्महेन्द्राय त्वा ॥ १ ॥ (२२)

वाचस्पतये तिस्रः (३) उपयामगृहीतोऽसि द्वे (२) आ वायो द्वे (२) अयं वा द्वे (२) या वामेके (१) तं प्रत्नथा चतस्रः (४) अयं वेनः पञ्च (५) ये देवासश्चतस्रः (४) इन्द्राय त्वा द्वे (२) मूर्धानं तिस्रः (३) यस्त एका (१) मघव एका (१) इन्द्राग्नी आगतमेका (१) आ घा य एका (१) ओमासश्चर्षणीधृत एका (१) विश्वे देवास एका (१) इन्द्र मरुत्व एका (१) मरुत्वन्तं वृषभमेका (१) मरुतामोजस एका (१) सजोषा इन्द्र एका (१) महाँ इन्द्र एका (१) महाँ इन्द्रेत्येका (१) द्वाविंशत्यनुवाकेषु चत्वारिंशत् (४०)

इति शुक्लयजुर्वेदकाण्वसंहितायां प्रथमदशके सप्तमोऽध्यायः

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

प्रथमदशकेऽष्टमोऽध्यायः

(प्रथमोऽनुवाकः १)

कदा च नस्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यत आदित्येभ्यस्त्वा ॥१॥
कदा च न प्रयुच्छस्युभे निपासि जन्मनी ।
तुरीयादित्य सवनं त इन्द्रियमातस्था,
अमृतं दिव्यादित्येभ्यस्त्वा ॥ २ ॥
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा ।
विवस्वाँ ३ आदित्यैष ते सोम पीथस्तस्मिन् मत्स्व ॥ ३ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः ।
पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारप एधते गृहे ॥ १ ॥ (२)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

वाममद्य संवितर्वाममु श्वो दिवे दिंवे वाममस्मभ्यंᳪ सावीः ।
वामस्य हि क्षयंस्य देव भूरैरया धिया वामभाजंः स्याम ॥१॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

उपयामगृंहीतो ऽसि सावित्रोऽसि च नोधाश्च नो मयिं धेहि ।
जिन्वं यज्ञं जिन्वं यज्ञपंतिं भगाय सवित्रे त्वा ॥ १ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

उपयामगृंहीतोऽसि सुशर्मासि सुप्रतिष्ठानो बृहदुंक्षाय नमः ।
विश्वैभ्यस्त्वा देवेभ्यं एष ते योनिर्विश्वैभ्यस्त्वा देवेभ्यः ॥ १ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

उपयामगृंहीतोऽसि बृहस्पतिंसुतस्य ते देव सोम ।
इन्दं इन्द्रियावंतः पत्नीवतो ग्रहाँ ३ ऋध्यासम् ॥ १ ॥
अहं परस्तादहमवस्ताद्यदन्तरिक्षं तदुंमे पितासं ।
अहँᳪसूर्यंमुभयतो ददर्शाहं देवानां परमं गुहा यत् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्ने वाक्पतिं सजूर्देवेन त्वष्ट्रा।
सोमं पिब स्वाहा ॥ ३ ॥
प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहि।
प्रजापतेस्ते वृष्णो रेतोधसो रेतोधामशीय ॥ ४ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वा ।
हर्योर्धाना स्थ सहसोमा इन्द्राय ॥ १ ॥
यस्ते देव सोमाश्वसनिर्भक्षो योनिं गोसनिः ।
तस्य त इष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्योपहूत,
उपहूतस्य भक्षयामि ॥ २ ॥ (७)

—०—

(अष्टमोऽनुवाकः ८)

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ।
उपयामगृहीतो ऽसीन्द्राय त्वा षोळशिनं एष ते,
योनिरिन्द्राय त्वा षोळशिने ॥ १ ॥ (८)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नववोऽनुवाकः ९)

आतिष्ठ वृत्रहन् रथँ युक्ता ते ब्रह्मणा हरी ।

अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना ।

उपयामगृहीतोऽसीन्द्राय त्वा षोळशिनं एष ते,

योनिरिन्द्राय त्वा षोळशिनें ॥ १ ॥ (९)

—०—

(दशयोऽनुवाकः १०)

इन्द्रमिद्धरी वहतो ऽप्रतिधृष्टशवसम् ।

ऋषींणां च स्तुतीरुपं यज्ञं च मानुंषाणाम् ।

उपयामगृहीतोऽसीन्द्राय त्वा षोळशिनं एष ते,

योनिरिन्द्राय त्वा षोळशिनें ॥ १ ॥ (१०)

—०—

(एकादशोऽनुकवाकः ११)

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा ।

प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतींꣳषि स च ते स षोळशी ॥ १ ॥

इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्रं एतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तयोरहमनुं भक्षं भंक्षयामि वाग्देवी जुंषाणा सोमंस्य,

तृप्यतु सह प्राणेन स्वाहा ॥ २ ॥ (११)

—०—

(द्वादशोऽनुवाकः १२)

अग्न आयूंषि पवस आसुवोर्जमिषं च नः ।

आरे बाधस्व दुच्छुनाम् ।

उपयामगृंहीतोऽस्यग्नये त्वा वर्चस एष ते,

योनिंरग्नये त्वा वर्चसे ।

अग्ने वर्चस्वन् वर्चस्वाँस्त्वं देवेष्वसिं ।

वर्चस्वानहं मंनुष्येषु भूयासम् ॥ १ ॥ (१२)

—०—

(त्रयोदशोऽनुवाकः १३)

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।

दधंद्रयिं मयि पोषम् ।

उपयामगृंहीतोऽस्यग्नये त्वा वर्चस,

एष ते योनिंरग्नये त्वा वर्चसे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्ने॑ वर्च॑स्वन् वर्च॑स्वा॑ᳪंस्त्वं दे॒वेष्व॑सि॑ ।

वर्च॑स्वान॒हं म॑नु॒ष्ये॑षु भूयासम् ॥ १ ॥ (१३)

—०—

(चतुर्दशोऽनुवाकः १४)

उ॒त्ति॒ष्ठन्नोज॑सा स॒ह पी॒त्वी शिप्रे॑ अवेपयः ।

सोम॑मिन्द्र च॒मू सु॒तम् ।

उ॒प॒याम॒गृ॑हीतो॒ऽसीन्द्रा॑य॒ त्वौज॑स,

ए॒ष ते॒ योनि॒रिन्द्रा॑य॒ त्वौज॑से ।

इन्द्रौ॑जस्व॒न्नोज॑स्वा॒ᳪंस्त्वं दे॒वेष्व॑सि॑ ।

ओज॑स्वान॒हं म॑नु॒ष्ये॑षु भूयासम् ॥ १ ॥ (१४)

—०—

(पञ्चदशोऽनुवाकः १५)

अदृ॑श्रमस्य के॒त॒वो॒ वि र॒श्मयो॒ जना॒ँ ३ अनु॑ ।

भ्राज॑न्तो अ॒ग्नयो॑ यथा ।

उ॒प॒याम॒गृ॑हीतो॒ऽसि॒ सूर्या॑य त्वा भ्रा॒ज,

ए॒ष ते॒ योनि॒ः सूर्या॑य त्वा भ्रा॒जे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्यभ्राजस्वन् भ्राजस्वाꣳस्त्वं देवेष्वसि ।

भ्राजस्वानहं मनुष्येषु भूयासम् ॥ १ ॥ (१५)

—०—

(षोडशोऽनुवाकः १६)

उदु त्यं जातवेदसं देवं वहन्ति केतवः ।

दृशे विश्वाय सूर्यम् ।

उपयामगृहीतोऽसि सूर्याय त्वा भ्राज,

एष ते योनिः सूर्याय त्वा भ्राजे ।

सूर्य भ्राजस्वन् भ्राजस्वाꣳस्त्वं देवेष्वसि ।

भ्राजस्वानहं मनुष्येषु भूयासम् ॥ १ ॥ (१६)

—०—

(सप्तदशोऽनुवाकः १७)

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य, वरुणस्याग्नेः ।

आ प्रा द्यावापृथिवी अन्तरिक्षꣳ,

सूर्य आत्मा जगतस्तस्थुषश्च ।

उपयामगृहीतोऽसि सूर्याय त्वा भ्राज,

एष ते योनिः सूर्याय त्वा भ्राजे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्यं भ्राजस्वन् भ्राजस्वाँस्त्वं देवेष्वसि ।

भ्राजस्वानहं मनुष्येषु भूयासम् ॥ १ ॥ (१८)

—०—

(अष्टादशोऽनुवाकः १८)

वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।

यो अस्माँ ३ अभिदासत्यधरं गमया तमः ।

उपयामगृहीतोऽसीन्द्राय त्वा विमृधं,

एष ते योनिरिन्द्राय त्वा विमृधे ॥ १ ॥ (१८)

—०—

(एकोनविंशोऽनुवाकः १९)

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं,

वाजे अद्या हुवेम ।

स नो विश्वानि हवनानि जोषद् ,

विश्वशंभूरवसे साधु कर्मा ।

उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण,

एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥ १९ ॥ (१९)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(विंशोऽनुवाकः २०)

विश्वकर्मन् हविषा वावृधानः स्वयं,

यजस्व पृथिवीमुत द्याम् ।

मुह्यन्त्वन्ये अभितः सपत्ना,

इहास्माकं मघवा सूरिरस्तु ।

उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण,

एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥ १ ॥ (२०)

—०—

(एकविंशोऽनुवाकः २१)

विश्वकर्मन् हविषा वर्धनेन,

त्रातारमिन्द्रमकृणोरवध्यम् ।

तस्मै विशः समनमन्त पूर्वीरयमुग्रो,

विहव्यो यथासत् ।

उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण,

एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥ १ ॥ (२१)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(द्वाविंशोऽनुवाकः २२)

उपयामगृहीतोऽस्यग्नये त्वा गायत्रछंन्दसं,

गृह्णामीन्द्राय त्वा त्रिष्टुप्छंन्दसं गृह्णामि ।

विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्जसं,

गृह्णाम्यनुष्टुपूतेऽभिगरः ॥ १ ॥

व्रेशीनां त्वा पत्मन्नाधूंनोमि कुकूननानां,

त्वा पत्मन्नाधूंनोमि ।

भन्दनानां त्वा पत्मन्नाधूंनोमि मध्वंन्तमानां,

त्वा पत्मन्नाधूंनोमि ।

शुक्रं त्वा शुक्र आधूंनोम्यह्नो,

रूपे सूर्यस्य रश्मिषु ॥ २ ॥

ककुहꣳरूपं वृंषभस्यं रोचते बृहत्सोमः,

सोमस्य पुरोगाः शुक्रःशुक्रस्यं पुरोगाः ।

यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा,

गृह्णामि तस्मै ते सोम सोमाय स्वहा ॥ ३ ॥

उशिक् त्वं देव सोमाग्नेः प्रियं पाथोऽपीहि,

वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपीहि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मत् संखा त्वं देव सोम विश्वेषां
देवानां प्रियं पाथोऽपीहि ॥ ४ ॥ (२२)

कदाचन तिस्रः (३) अदस्मयैका (१) वाममद्यैका
सावित्र एका (१) सुशर्मेत्येका (बृहस्पतिश्चतस्रः(१)
(४) हरिरसि द्वे (२) युक्ष्वा ह्येका (१) आतिष्ठैका (१)
इन्द्रमित्यैकैका (१) यस्मान्नजात इति द्वे (२)
अग्न आयूंष्येका (१) अग्ने पवस्वै का (१) उत्तिष्ठन्नेका (१)
अदश्रमेका (१) उदुत्यमेका (१) चित्रमेका (१) वि न
एका (१) वा च स्प तिमेका (१) विश्वकर्मन्नित्येका (१)
अग्नये त्वा चतस्रः (४) द्वावि शत्यनुवाकेषु द्वात्रिंशत् (३२)

इति शुक्लयजुर्वेदकाण्वसंहितामां प्रथमदशके अष्टमोऽध्यायः (८)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

प्रथमदशके नवमोऽध्यायः

(प्रथमोऽनुवाकः १)

प्राणायं मे वर्चोदा वर्चसे पवस्व,
व्यानायं मे वर्चोदा वर्चसे पवस्व ।
उदानायं मे वर्चोदा वर्चसे पवस्व,
वाचे मे वर्चोदा वर्चसे पवस्व ॥ १ ॥
क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व,
श्रोत्राय मे वर्चोदा वर्चसे पवस्व ।
चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ॥ २ ॥
आत्मने मे वर्चोदावर्चसे पवस्वौजसे मे वर्चोदा वर्चसे
पवस्वायुषे मे वर्चोदा वर्जसे पवस्व ।
विश्वाभ्यो मे प्रजाभ्यो वर्चोदासौ वर्चसे पवेथाम् ॥ ३ ॥
कोऽसि कतमोऽसि कस्यासि कोनामासि ।
यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम ॥ ४ ॥
भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम् ।
सुवीरो वीरैः सुपोषः पोषैः ॥ ५ ॥ (१)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(द्वितीयोऽनुवाकः २)

उदु॒त्यं जा॒तवे॑दसं दे॒वं व॑हन्ति के॒तवः॑ ।

दृ॒शे विश्वा॑य॒ सूर्य॑म् ॥ १ ॥

चि॒त्रं दे॒वाना॒मुद॑गा॒दनी॑कं॒,

चक्षु॑र्मि॒त्रस्य॒ वरु॑णस्या॒ग्नेः ।

आ प्रा॒ द्यावा॑पृथि॒वी अ॒न्तरि॑क्षँ॒

सूर्य॑ आ॒त्मा जग॑तस्त॒स्थुष॑श्च ॥ २ ॥

अग्ने॒ नय॑ सु॒पथा॑ रा॒ये अ॒स्मान् विश्वा॑नि

देव व॒युना॑नि वि॒द्वान् ।

यु॒यो॒ध्य॒स्मज्जु॑हुरा॒णमेनो॒,

भूयि॑ष्ठां ते॒ नम॑ उक्तिं विधेम ॥ ३ ॥

अ॒यं नो॑ अ॒ग्निर्वरि॑वस्कृणोत्व॒यं

मृधः॑ पु॒र ए॑तु॒ प्र॒भि॒न्दन् ।

अ॒यं वाजा॑ञ्जयतु॒ वाज॑साता अ॒यँ॒ शत्रू॑-

ञ्जयतु॒ जर्हृ॑षाणः॒ स्वाहा॑ ॥ ४ ॥

रू॒पेण॑ वो रू॒पम॒भ्यागां॑ तु॒थो वो॑ वि॒श्ववे॑दा॒ विभ॑जतु ।

ऋ॒तस्य॑ प॒था प्रेत॑ च॒न्द्रद॑क्षिणाः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वि स्वः पश्यव्यन्तरिक्षं यतस्व सदस्यैः ।

ब्राह्मणमद्य विदेय पितृमन्तं

पैतृमत्यमृषिमार्षेयꣳ सुधातुदक्षिणम् ॥ ६ ॥

अस्मद्राता देवत्रा गच्छ प्रदातारमाविश ।

अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमश्यात् ॥ ७ ॥

आयुर्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ।

रुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमश्यात् ।

प्राणो दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ।

बृहस्पतये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमश्यात् ।

त्वग्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ।

यमाय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमश्यात् ।

वयो दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ॥ ८ ॥

कोऽदात् कस्मा अदात् कामोऽदात् कामायादात् ।

कामो दाता कामः प्रतिग्रहीता,

कामैतत्ते तव काम सत्ता भुंनजामहै ॥ ९ ॥ (२)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

समिन्द्र णो मनसा नेषि गोभिः,
सः सूरिभिर्मघवन्त्सं स्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति
सं देवानां सुमतौ यज्ञियानाम् ॥ १ ॥
सं वर्चसा पयसा सं तनूभिरगन्महि,
मनसा संशिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु,
तन्वो यद्विलिष्टम् ॥ २ ॥
धाता रातिः सवितेदं जुषन्तां
प्रजापतिर्निधिपा देवो अग्निः ।
त्वष्टा विष्णुः प्रजया संरराणो,
यजमानाय द्रविणं दधातु ॥ ३ ॥
सुगा वो देवाः सदना अकर्म य,
आजग्मेदं सवनं जुषाणाः ।
भरमाणा वहमाना हवींष्यस्मे,
धत्त वसवो वसूनि ॥ ४ ॥
याँ ३ आवह उशतो देव देवांस्तान्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेरय स्वे अग्ने सधस्थे ।
अक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽसुं,
घर्मꣳ स्वरातिष्ठतानु ॥ ५ ॥
वयꣳ हि त्वा प्रयति यज्ञे अस्मिन्नग्ने,
होतारमवृणीमहीह ।
ऋधगया ऋधगुताशमिष्ठाः,
प्रजानन् यज्ञमुपयाहि विद्वान् ॥ ६ ॥
देवा गातुविदो गातुमित्वा गातुमित ।
मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ॥ ७ ॥
यज्ञं यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ।
एष ते यज्ञो यज्ञप ते सहसूक्तवाकः,
सर्ववीरस्तं जुषस्व स्वाहा ॥ ८ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

माहिर्भूर्मा पृदाकुः ।
उरुꣳ हि राजा वरुणश्चकार सूर्याय,
पन्थामन्वेत वा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ।
नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नेरनीकमप आविवेशापां नपात् प्रतिरक्षन्नसुर्यम् ।
दमे दमे समिधं यक्ष्यग्ने प्रति ते,
जिह्वा घृतमुच्चरण्यत् स्वाहा ॥ २ ॥
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्योषधीरुतापः ।
यज्ञस्य त्वा यज्ञपते सूक्तो क्तौ
नमोवाके विधेम यत् स्वाहा ॥ ३ ॥
देवीराप एष वो गर्भस्तः सुप्रीतः सुभृतं बिभृत ।
देव सोमैष ते लोकः परि च वक्षि शं च यक्षि ।
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुण ।
अव देवैर्देवकृतमेनोऽयासिषमव,
मर्त्यैर्मर्त्यैः कृतं पुरुराव्णो देव रिषस्पाहि ।
देवानां समिदसि ॥ ४ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

एजतु दशमास्यो गर्भो जरायुणासह ।
यथायं वायुरेजति यथा समुद्र,
एजत्ये वायं दशमास्यो अस्रज्जरायुणा सह ॥ १ ॥
यस्यास्ते यज्ञियो गर्भो यस्या योनिर्हिरण्ययी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्गान्यहुता यस्य तं मात्रा समंजीगमः स्वाहा ॥ २ ॥

पुरुदस्मो विषुरूप इन्दुरन्तर्महिमानमानञ्जधीरः ।

एकंपदीं द्विपदीं त्रिपदीं चतुंष्पदीं

मष्टापदीं भुवनानु प्रथन्ताः स्वाहा ॥ ३ ॥

मरुतो यस्य हि क्षये पाथा दिवो विमहसः ।

स सुगोपातमो जनः ॥ ४ ॥

मही द्यौः पृथिवी चं न इमं यज्ञं मिमिक्षताम् ।

पिपृतां नो भरीमभिः ॥ ५ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः ।

पुनरूर्जा निवर्तस्व सा नः सहस्रं,

धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ॥ १ ॥

हव्ये काम्ये इळे रन्ते चन्द्रे ज्यो तेऽदिते,

सरस्वति महि विश्रुति ।

एता ते अघ्न्ये नामानि देवेषु मा सुकृतं ब्रूतात् ॥ २ ॥

इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपसृजं धरुणं मात्रे धरुणो मातरं-
धयन् रायस्पोषमस्वासु दीधरत् स्वाहा ॥ ३ ॥

अगन्म ज्योतिरमृता अभूम दिवं पृथिव्या अध्यारुहाम ।
अविदाम देवाँत्स्वर्ज्योतिः ॥ ४ ॥

युवं तमिन्द्रापर्वता पुरोयुधा यो नः,
पृतन्यादपतं तमिद्धतं वज्रेणतं तमिद्धतम् ।
दूरे चत्ताय छन्त्सद्गहनं यदिनक्षदस्माकं शत्रून्,
परि शूर विश्वतो दर्मा दर्शीष्ट विश्वतः ॥ ५ ॥

भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम् ।
सुवीरो वीरैः सुपोषः पोषैः ॥ ६ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

परमेष्ठ्यभिधीतः प्रजापतिर्वाचि,
व्याहृतायामन्धो अच्छेतः सविता सन्याम् ।
विश्वकर्मा दीक्षायां पूषा सोमक्रयण्याम् ॥ १ ॥

इन्द्रश्च मरुतश्च क्रयायोपोत्थितः ।
असुरः पण्यमानो मित्रः क्रीतः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुः शिपिविष्ट ऊरा आसन्नो,
विष्णुर्नरन्धिषः प्रोह्यमाणः ।
सोम आगतो वरुण आसन्द्यामासन्नः ॥ ३ ॥
अग्निराग्नीध्र इन्द्रो हविर्धाने ।
अथर्वोपावह्नियमाणो विश्वे देवा,
अꣳशुषु न्युप्यमानेषु ॥ ४ ॥
विष्णुराप्रीतपा आप्याय्यमानो यमः,
सूयमानो विष्णुः संभ्रियमाणः
वायुः पूयमानः शुक्रः पूतः ॥ ५ ॥
शुक्रः क्षीरं श्रीमन्थी सक्तुश्रीः ।
विश्वे देवाश्चमसेषून्नीतोऽसुर्होमायोद्यतः ॥ ६ ॥
रुद्रो हूयमानो वातोऽभ्यावृत्तो नृचक्षाः,
प्रतिख्यातो भक्षः पीतः पितरो नाराशꣳसाः साद्यमानः ।
सिन्धुरवभृथायोद्यतः समुद्रोऽभ्यवह्नियमाणः,
सलिलः प्रप्लुतः ॥ ७ ॥
ययोरोजसा स्कभितारजाꣳसि वीर्येभिर्वीरतमा शविष्ठा ।
या पत्येते अप्रती ता सहोभिर्विष्णू,
अगन् वरुणा पूर्व हूतौ ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवान् दिवमगमन् यज्ञस्ततो मा द्रविणमष्टु,
मनुष्या नन्तरिक्षमगन् यज्ञस्ततो मा द्रविणमष्टु ॥
पितृन् पृथिवीमगन् यज्ञस्ततो मा द्रविणमष्टु,
यं कं च लोकमगन् यज्ञस्ततो मे भद्रमभूत् ॥ ९ ॥ (७)

—०—

प्राणाय मे पञ्च (५) उदुत्यं नव (९) समिन्द्र णोष्ट (८)
माहिश्वतस्रः (४) एजतु दशमास्यः पञ्च (५) अजिघ्र षट् (६)
परमेष्ठी नव (९ सप्तानुवाकेषु षट् च त्वारिंशत् (४६)

इति शुक्लयजुर्वेदकाण्वसंहितायां प्रथमदशके नवमोऽध्यायः (९)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

प्रथमदशके दशमोऽध्यायः

(प्रथमोऽनुवाकः १)

देव सवितः प्रसुव यज्ञं प्रसुवेमं भगाय ।
दिव्यो गन्धर्वः केतपाः केतं नः पुनातु,
वाचस्पतिर्नो अद्य वाजं स्वदतु ॥ १ ॥
ध्रुवसदं त्वा नृषदं मनः सदम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष,
ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ २ ॥
अप्सुषदं त्वा घृतसदं व्योमसदम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष,
ते योनिरिन्द्राय त्वा जुष्टतमम् ।
पृथिविसदं त्वान्तरिक्षसदं दिविसदं देवसदं नाकसदम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष,
ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ३ ॥
अपां रसमुद्वयसं सूर्येसन्तं समाहितम् ।
अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तमम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष,
ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ४ ॥
ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां विशिंप्रियाणां वोऽहमिषमूर्जं समग्रभम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष,
ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ५ ॥
सं पृचं स्थ सं मा भद्रेणं पृङ्क्त ।
विपृचं स्थ वि मा पापेनं पृङ्क्त ॥ ६ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

इन्द्रंस्य वज्रोऽसि वाजसास्त्वया यं वाजं सेत् ।
वाजंस्य नु प्रसवे मातरं महीमदितिं,
नाम वचंसा करामहे ।
यस्यामिदं विश्वं भुवंनमाविवेश,
तस्यां नो देवः संविता धर्मं साविषक् ॥ १ ॥
देवीरापो अपांनपाद्यो वं ऊर्मिः प्रतूर्तिः ।
ककुन्मान् वाजसास्तेनायं वाजं सेत् ॥ २ ॥
अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशंस्तिभिः ।
अश्वा भवत वाजिनः ॥ ३ ॥
वातो वा वो मनो वा गन्धर्वाः सप्तविंशतिः ।
ते अग्रेऽश्वमयुञ्जंस्ते अस्मिन् जवमादधुः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वातंरंःहा भव वाजिन् युज्यमान,

इन्द्रस्येव दक्षिणः श्रियैधिं ।

युञ्जन्तुं त्वा मरुतो विश्ववेंदस,

आ ते त्वष्टा पत्सु जवं दंधातु ॥ ५ ॥

जवो यस्तें वाजिन् निहिंतो गुहा यः,

श्येने परींतो अचरच्च वाते ।

तेनं नो वाजिन् बलंवान् बलेंन,

वाजजिच्चैधि समने च पारयिष्णुः ॥ ६ ॥

वाजिंनो वा जजितो वाजंः सरिष्यन्तः ।

बृहस्पतेर्भागमवंजिघ्रत ॥ ७ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

देवस्यं वयःसंवितुः सवे सत्यसंवसः ।

बृहस्यतेरुत्तमं नाकंः रूहेमेन्द्रस्योत्तमं नाकंः रुहेम ।

देवस्यं वयःसंवितुः सवे सत्यसंवसः ।

बृहस्यतेरूत्तमं नाकमरुहामेन्द्रस्योत्तमं,

नाकंमरुहाम ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बृहस्पते वाजं जय बृहस्पतये वाचं वदत।
बृहस्पतिं वाजं जापयत ॥ २॥
इन्द्र वाजं जयेन्द्राय वा चं वदत।
इन्द्रं वाजं जापयत ॥ ३ ॥
एषा वः सा सत्या संवागंभूद्यया,
बृहस्पतिं वाजमजीजपत ।
आजीजपत बृहस्पतिं वा चं वनस्पतयो,
विमुंच्यध्वम् ॥ ४ ॥
देवस्यं वयः संवितुः सवे सत्यसंवसः ।
बृहस्पतेर्वाजजितो वाजं जेष्म ॥ ५ ॥
वाजिनो वाजं जयताध्वन स्कभ्रन्तः ।
योजना मिमानाः काष्ठां गच्छत ॥ ६ ॥
एष स्य वाजी क्षिपणिं तुरण्यति,
ग्रीवायां बद्धो अंपिकक्ष आसनिं ।
क्रतुं दधिक्रा अनुं सन्तवीत्वत्पथा-
मङ्काः स्यन्वापनींफणत् ॥ ७ ॥
उतस्मास्य द्रवंतस्तुरण्यतः पर्णं,
न वेरनुवाति प्रगर्धिनः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्येनस्येव ध्रजतो अङ्कसं परि,

दधिक्राव्णः सहोर्जा तरित्रतः ॥ ८ ॥

शं नो भवन्तु वाजिनो हवेषु देवताता,

मितद्रवः स्वर्काः ।

जम्भयन्तोऽहिं वृकं रक्षांसि, सनेम्यस्मद्युयवन्नमीवाः ॥ ९ ॥

तेनो अर्वन्तो हवनश्रुतो हवं विश्वे,

शृण्वन्तु वाजिनो मितद्रवः ।

सहस्रसा मेधसाता इव त्मना महो,

ये धनं समिथेषु जभ्रिरे ॥ १० ॥

वाजे वाजेऽवत वाजिनो नो धनेषु,

विप्रा अमृता ऋतज्ञाः ।

अस्य मध्वः पिबत मादयध्वं तृप्ता,

यात पथिभिर्देवयानैः ॥ ११ ॥

आ मा वाजस्य प्रसवो जगम्यादेमे,

द्यावापृथिवी विश्वरूपे ।

आ मा गन्तं पितरा मातरा युवमा,

मा सोमो अमृतत्वाय गम्यात् ॥ १२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाजिनो वाजजितो वाजंँ सस्रृवांँसः ।
बृहस्पतेर्भागमवजिघ्रत निमृजानाः ॥ १३ ॥

—o—

(चतुर्थोऽनुवाकः ४)

आपये स्वाहा स्वापये स्वाहाऽपिजाय स्वाहा
क्रतवे स्वाहा ।
वसवे स्वाहाऽहर्पतये स्वाहा
अह्ने मुग्धाय स्वाहा मुग्धाय वैनंँ शिनाय स्वाहा,
विनंँ शिनं आन्त्यायनाय स्वाहान्त्याय,
भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपयतये स्वाहा ॥ ७ ॥
आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां,
चक्षुर्यज्ञेन कल्पताँ श्रोत्रं यज्ञेन कल्पताम् ।
पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ २ ॥
जाय एहि स्वो रोहाय ।
प्रजापतेः प्रजा अभूम स्वर्देवा अगन्मामृता अभूम ॥ ३ ॥
अस्मे वो अस्त्विन्द्रियमस्मे नृम्णमुत क्रतुः ।
अस्मे वर्चांँसि सन्तु वः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमो मात्रे पृथिव्या इयं ते राडयन्तासि यमनः ।

ध्रुवोऽसि धरुणः कृष्यै क्षेमाय रय्यै पोषाय ॥ ५ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

वाजस्येमं प्रसवः सुषुवेऽग्ने, सोमꣳ राजानमोषधीष्वप्सु ।

ता अस्मभ्यं मधुमतीर्भवन्तु, वयꣳ राष्ट्रे जागृयाम पुरोहिताः ॥ १ ॥

वाजस्येदं प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः ।

सनेमि राजा परियाति विद्वान् रयिं पुष्टिं वर्धयमानो अस्मे ॥ २ ॥

वाजस्येमां प्रसवः शिश्रिये दिवमिमा च,

विश्वा भुवनानि सम्राट् ।

आदित्सन्तं दापयति प्रजानन्त्स नो,

रयिꣳ सर्ववीरं नियच्छतु ॥ ३ ॥

अग्ने अच्छा वदेह नः प्रति नः सुमना भव ।

प्र नो यच्छ सहस्रजित्त्वꣳ हि धनदा असि ॥ ४ ॥

सोमꣳ राजानमवसेऽग्निमन्वारभामहे ।

आदित्यं विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ ५ ॥

प्र नो यच्छत्वर्यमा प्र पूषा प्र सरस्वती ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र वाग्देवी दंदातु नः ॥ ६ ॥

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय ।

वाचं विष्णुꣳ सरंस्वतीꣳ सवितारं च वाजिनंम् ॥ ७ ॥

देवस्यं त्वा सवितुः प्रंसवेऽश्विनोर्बाहुभ्यां,

पूष्णो हस्ताभ्याम् ।

सरंस्वत्यै वाचो यन्तुर्यं तुर्यं दधामि ।

बृहस्पतैष्ट्वा साम्रा ज्येनाभिषिं ञ्चामीन्द्रंस्य त्वा,

साम्राज्येनाभिषिंञ्चामि ॥ ८ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

अग्निरेकाक्षरेण प्राणमुदंजयत् तमुज्जेषमश्विनौ,

द्व्यंक्षरेण द्विपदो मनुष्यानुदंजयतां तानुज्जेषम् ।

विष्णुस्त्र्यंक्षरेण त्रीनिमाँ ल्लोकानुदंजयत्,

तानुज्जेषꣳ सोमश्चतुंरक्षरेण,

चतुंष्पदः पशूनुदंजयत्ता नुज्जेषम् ॥ १ ॥

पूषा पञ्चाक्षरेण पञ्च ऋतूनुदंजयत्,

तानुज्जेषꣳ सविता षळंक्षरेण षट्टतूनुदंजयत्,

तानुज्जेषम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुतः सप्ताक्षरेण सप्त ग्राम्यान् पशूनुदजयः स्तानुज्जैषं,

बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत् तामुज्जैषम् ॥ २ ॥

मित्रो नवाक्षरेण त्रिवृतः स्तोममुदजयत् तमुज्जैषं,

वरुणो दशाक्षरेण विराजमुदजयत् तामुज्जैषम् ।

इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत् तामुज्जैषं,

विश्वे देवा द्वादशाक्षरेण जगतीमुदजयःस्तामुज्जैषम् ॥ ३ ॥

वसवस्त्रयोदशाक्षरेण त्रयोदशः स्तोममुदजयःस्तमुज्जेषंः

रुद्राश्चतुर्दशाक्षरेण चतुर्दशः स्तोममुदजयः स्तमुज्जेषम् ॥

आदित्याः पञ्चदशक्षरेण पञ्चदशः स्तोममुदजयः स्तमुज्जेष-

मदितिः षोळशाक्षरेण षोळशः स्तोममुदजय त्तमुज्जेषम् ।

प्रजापतिः सप्तदशाक्षरेण सप्तदशः स्तोममुदजयत्

तमुज्जेषम् ॥ ४ ॥ (६)

—०—

देवसवितः षट् (६) इन्द्रस्य यज्ञः सप्त (७)

देवस्य वयं त्रयोदश (१३) आपये पञ्च (५)

वाजस्येममष्ट (८) अग्निरेकाक्षरेण चतसः (४)

षळनु वाकेषु त्रयश्चत्वारिंशत् (४३)

इति शुक्लयजुर्वदस्काण्वसंहितायां प्रथमदशके दशमोऽध्यायः (६)

प्रथमं दशकं संपूर्णम् हरिः ओम्

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयं दशकम् (२)

अथद्वितीयदशके प्रथमोऽध्यायः

प्रथमोऽनुवाकः (१)

एष ते निर्ऋते भागन्तं जुषस्व,

स्वाहाग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा,

यमनेत्रेभ्यो देवेभ्यो दक्षिणसद्भ्यः स्वाहा ।

विश्वेदेवनेत्रेभ्यो देवेभ्यः पश्चात् सद्भ्यः

स्वाहा मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा

देवेभ्य उत्तरसद्भ्यः स्वाहा ।

सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो,

दुवस्वद्भ्यः स्वाहा ॥ १ ॥

ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा,

ये देवा यमनेत्रा दक्षिणसदस्तेभ्यः स्वाहा ।

ये देवा विश्वेदेवनेत्राः पश्चात् सदस्तेभ्यः स्वाहा,

ये देवा मित्रावरुणनेत्राः वा मरुन्नेत्रा

वोत्तर संदस्तेभ्यः स्वाहा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये देवा स्सोमनेत्रा उपरिसदो,

दुवस्वन्तस्तेभ्यः स्वाहा ॥ २ ॥

अग्ने सहस्व पृतना अभिमातीरपास्य ।

दुष्टरस्तरन्नरातीर्वर्चोधा यज्ञवाहसि ।

देवस्य त्वा सवितुः प्रसवेऽश्विनो

र्बाहुभ्यां पूष्णोहस्ताभ्याम् ॥ ३ ॥

उपांशोर्वीर्येण जुहोमि हतंरक्षः स्वाहा ।

रक्षसां त्वा वधायावधिष्म,

रक्षोऽमुष्य त्वा वधायामुमवधिष्म ।

जुषाणोऽध्वाज्यस्य वेतु स्वाहा ॥ ४ ॥ (१)

—०—

द्वितीयोऽनुवाकः (२)

अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती,

राजस्वश्चितानाः ।

याभिर्मित्रावरुणा अभ्यषिञ्चन्याभि-

रिन्द्रमनयन्नत्यरातीः ॥ १ ॥

वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा,

वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा,
वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥ २ ॥
अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त,
स्वाहार्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
ओजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त,
स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
आपः परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त,
स्वाहापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
अपां पतिरसि राष्ट्रदा राष्ट्रं मे देहि,
स्वाहापां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देहि ।
अपां गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि,
स्वाहापां गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ।
सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,
सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
सूर्यत्वच स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,
सूर्यत्वच स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,
व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,

वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

मांदा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,

मांदा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,

शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,

जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,

विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

शैष्टा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा,

शैष्टा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

आपः स्वाराज्ञी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ॥ ३ ॥

सं मधुमतीर्मधुमतीभिः पृच्यन्तां

महिं क्षत्रं क्षत्रियाय वन्वानाः ।

अनाधृष्टाः सीदत सहौजसा महिं,

क्षत्रं क्षत्रियाय दधतीः ॥ ४ ॥ (२)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

—०—

सविता त्वा प्रसवानां सुवतामग्नि-

र्गृहपतीनां सोमो वनस्पतीनाम् ।

बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशूनां

मित्रःसत्याय वरुणो धर्मपतीनाम् ॥ १ ॥

इमं देवा असपत्नं सुवध्वं

महते क्षत्राय महते ज्यैष्ठ्याय ।

इमममुष्य पुत्रममुष्याः पुत्रमस्यै विशे ॥ २ ॥

एष वः कुरवो राजैष वः पञ्चला राजा ।

सोमोऽस्माकं ब्राह्मणानां राजा ॥ ३ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

सोमस्य त्विषिरस्यग्नये स्वाहा-

सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा ।

पूष्णे स्वाहा बृहस्पतये स्वाहा ॥ १ ॥

इन्द्राय स्वाहांशाय स्वाहा श्लोकाय स्वाहा,

घोषाय स्वाहा भगाय स्वाहार्यम्णे स्वाहा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण,

पवित्रेण सूर्यस्य रश्मिभिः ।

अनिभृष्टमसि वाचो बन्धुस्तपोजाः,

सोमस्य दात्रमसि स्वाहा राजस्वः ॥ २ ॥

सधमादो द्युम्निनीराप एता,

अनाधृष्टा अपस्यो वसानाः ।

पस्त्यासु चक्रे वरुणः सधस्थ-

मपां शिशुर्मातृतमास्वन्तः ॥ ३ ॥

क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि,

क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि ।

इन्द्रस्य वार्त्रघ्नमसि त्वयायं वृत्रं,

वध्यान्मित्रस्यासि वरुणस्यासि ॥ ४ ॥

रुजासि द्रुवासि क्षुपासि ।

पातैनं प्राञ्चं पातैनं प्रत्यञ्चं

पातैनं तिर्यञ्चं दिग्भ्यः पात ॥ ५ ॥

आविर्मर्या आवित्तो अग्निर्गृहपति-

रावित्त इन्द्रो वृद्धश्रवा,

आवित्तः पूषा विश्ववेदा आवित्तौ,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रावरुणौ धृतव्रतौ ।

आविंत्ते द्यावापृथिवी विश्वशंभू,

आविंत्तादितिरुरुशर्मा ॥ ६ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु ।

रथन्तरꣳ साम त्रिवृत्स्तोमो वसन्तऋतुर्ब्रह्म द्रविणम् ॥ १ ॥

दक्षिणामारोह त्रिष्टुप् त्वावतु ।

बृहत्साम पञ्चदश स्तोमो ग्रीष्मऋतुः क्षत्रं द्रविणम् ॥ २ ॥

प्रतीचीमारोह जगती त्वावतु ।

वैरूपꣳ साम सप्तदश स्तोमो वर्षा ऋतुर्विड्द्रविणम् ॥ ३ ॥

उदीचीमारोहानुष्टुप् त्वावतु ।

वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फलं द्रविणम् ॥ ४ ॥

ऊर्ध्वामारोह पङ्क्तिस्त्वावतु ।

शाक्वररैवते सामनीत्रिणवत्रयस्त्रिꣳशौ स्तोमौ,

हेमन्तशिशिरा ऋतू वर्चो द्रविणम् ॥

प्रत्यस्त नमुचेः शिरः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात् ।

मृत्योः पाह्योजोऽसि सहोऽस्यमृतमसि ॥ ६ ॥

हिरण्यरूपा उषसो विरोक उभा इन्द्रा उदितः सूर्यश्च ।

आरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च ।

मित्रोऽसि वरुणोऽसि ॥ ७ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसा ।

इन्द्रस्येन्द्रियेण मरुतामोजसा क्षत्राणां,

क्षत्रपतिरेध्यति दिद्यून् पाहि ॥ १ ॥

इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय,

महते ज्यैष्ठ्याय महते जानराज्याय ।

इममग्गुमग्गुष्यं पुत्रमग्गुष्याः पुत्रमस्यै विशे ॥ २ ॥

एष वः कुरवो राजैष वः पञ्चाला राजा

सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥ ३ ॥

प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति,

स्वसिचं इयानाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ता आवंवृत्रन्नधरागुदक्ता अहिं बुध्न्यमनु रीयंमाणाः ।

विष्णोः विक्रमंणमसि विष्णोर्विक्रान्तमसि,

विष्णोः क्रान्तमंसि ॥ ४ ॥

प्रजापते न त्वदेतान्यन्यो विश्वा, रूपाणि परि ता बंभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु,

वयः स्याम पतंयो रयीणाम् ॥ ५ ॥

रुद्र यत्ते क्रवि परं नामं ।

तस्मैं हुतमंस्यमेष्टमंसि स्वाहा ॥ ६ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

इन्द्रंस्य वज्रोंऽसि मित्रावरुंणयोस्त्वा,

प्रशास्त्रोः प्रशिषा युनज्मि ।

अव्यंथायै त्वा स्वधायै त्वारिष्टः फल्गुंनः ।

मरुतां प्रसवेनं जयापाम मनंसा समिंन्द्रियेणं ॥ १ ॥

मा तं इन्द्र ते वयं तुराषाळयुक्तासो

अब्रह्मता विदंसाम ।

तिष्ठा रथमधि यद्वज्रहस्ता रश्मीम्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देव युवसे स्वश्वान् ॥ २ ॥

अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा ।

इन्द्रस्येन्द्रियाय स्वाहा मरुतामोजसे स्वाहा ।

पृथिवि मातर्मा मा हिंसीर्मो अहं त्वाम् ॥ ३ ॥

हंसः शुचिषद् वसुरन्तरिक्षसद्धोता

वेदिषदतिथिर्दुरोणसत्

नृषद्वरसदृतसद्व्योमसदब्जा गोजा,

ऋतजा अद्रिजा ऋतं बृहत् ॥ ४ ॥

इयद स्यायुरस्यायुर्मे देहि,

युङसि वर्चोऽसि वर्चो मे देहि ।

ऊर्गस्यूर्ज मयि धेहीन्द्रस्य वां,

बाहू वीर्यकृता उपावहरामि ॥ ५ ॥ ७ ॥

—०—

(अष्टमोऽनुवाकः ८)

स्योनासि सुषदासि क्षत्रस्य योनिरसि ।

स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ॥ १ ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा ।

साम्राज्याय सुक्रतुः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिभूरस्ययानामेतास्ते पञ्च दिशः कल्पन्ताम् ।

ब्रह्मंस्त्वं ब्रह्मासि ॥ ३ ॥

सवितासि सत्यप्रसवो वरुणोऽसि सत्यौजाः ।

इन्द्रोऽसि विशौजा रुद्रोऽसि सुशेवः ॥ ४ ॥

प्रियंकर श्रेयस्कर भूयस्कर ।

इन्द्रस्य वज्रोऽसि तेन मे रध्य ॥ ५ ॥

अग्निः पृथुर्धर्मणस्पतिर्जुषाणो,

अग्निः पृथुर्धर्मणस्पतिः ।

आज्यस्य हविषो वेतु स्वाहा ।

स्वाहाकृताः सूर्यस्य रश्मिभिर्यतध्वं,

सजातानां मध्यमेष्ठ्याय ॥ ६ ॥ (८)

—०—

(नवमोऽनुवाकः ९)

सवित्रा प्रसवित्रा सरस्वत्या वाचा ।

त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मै ॥ १ ॥

बृहस्पतिना ब्रह्मणा वरुणेनौजसाग्निना,

तेजसा सोमेन राज्ञा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुना देवतया दशम्येमं यज्ञं

विष्णुमाप्नवानि ॥ २ ॥ (९)

(दशमोऽनुवाकः १०)

—०—

अश्विभ्यां पच्यस्व सरस्वत्यै,

पच्यस्वेन्द्राय सुत्राम्णेपच्यस्व ।

वायोः पूतः पवित्रेण प्रत्यङ्ङ् सोमो अतिस्रुतः ।

इन्द्रस्य युज्यः सखा ॥ १ ॥

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।

इहेहैषां कृणुहि भोजनानि ये,

बर्हिषो नम उक्तिं न जग्मुः ।

उपयामगृहीतोऽस्यश्विभ्यां त्वा,

सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥ २ ॥

युवꣳ सुराममश्विना नमुचा आसुरे सचा ।

विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥ ३ ॥

पुत्रमिव पितरा अश्विनोभेन्द्रावथुः,

काव्यैर्दꣳ सनाभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्सुरामं व्यपिंबः शचींभिः,

सरंस्ती त्वा मघवन्नभिष्णक् ॥ ४ ॥ (१०)

हरि ओं

—०—

एष ते चतस्रः (४) अपो देवाश्चतस्रः (४)
सवितात्वा तिस्रः (३) सोमस्य त्विषि षट् (६)
अवेष्टा सप्त (७) सोमस्य त्वा षट् (६) इन्द्रस्य
वध्रः पञ्च (५) स्योनासि षट् (६) सवित्रा
द्व (२) अश्विभ्यां चतस्रः (४) दशानुवाकेषु
संप्तचत्वारिंशत् (४७)

इति शुक्लयजुर्वेदकाण्वसंहितायां द्वितीयदशके प्रथमोध्यायः (१)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

द्वितीयदशके द्वितीयोऽध्यायः (२)

प्रथमोऽनुवाकः (१)

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥
युक्तेन मनसा वयं देवस्य सवितुः सवे ।
स्वर्ग्याय शक्त्या ॥ २ ॥
युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवम् ।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥ ३ ॥
युञ्जते मन उत युञ्जते धियो विप्रा, विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुना विदेक इन्मही, देवस्य सवितुः परिष्टुतिः ॥ ४ ॥
युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये,
धामानि दिव्यानि तस्थुः ॥ ५ ॥
यस्य प्रयाणमन्वन् य इद्ययुर्देवा,
देवस्य महिमानमोजसा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः पार्थिवानि विममे स एतशोरजांऽसि,

देवः सविता महित्वना ॥ ६ ॥

देवसवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।

दिव्यो गन्धर्वः केतपूः केतं नः पुनातु,

वाचस्पतिर्वाचं नः स्वदतु ॥ ७ ॥

इमे नो देव सवितर्यज्ञं प्रणय देवाव्यंऽ,

सखिविदंऽसत्राजितं धनजितंऽस्वर्जितम् ।

ऋचा स्तोमंऽ समर्धय गायत्रेण रथन्तरं,

बृहद्गायत्रवर्तनि स्वाहा ॥ ८ ॥

देवस्य त्वा सवितुः प्रसवे श्विनो-

र्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

आददे गायत्रेण च्छन्दसाङ्गिरस्वत्

पृथिव्याः सधस्थादग्निं पुरीष्य मङ्गिरस्वदाभर ।

त्रैष्टुभेन च्छन्दसाङ्गिरस्वत् ॥ ९ ॥

अभ्रिरसि नार्यसि त्वया वयमग्निंऽ शकेम खनितुम् ।

सधस्थ आ जागतेन च्छन्दसाङ्गिरस्वत् ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्तं आधाय सवित बिभ्रदभ्रिं हिरण्ययीम् ।
अग्नेज्योतिर्निचाय्य पृथिव्या
अध्याभरदानुष्टुभेत च्छन्दसाङ्गिरस्वत् ॥ ११ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु संवतम् ।
दिवि ते जन्म परममन्तरिक्षे तव नाभिः,
पृथिव्यामधि योनिरित् ॥ १ ॥
युञ्जाथां रासभं युवमस्मिन् यामे वृषण्वसू ।
अग्निं भरन्तमस्मयुम् ॥ २ ॥
योगे योगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रमूतये ॥ ३ ॥
प्रतूर्वं नेह्य वक्रामन्नशस्ती रुद्रस्य,
गाणपत्यं मयोभूरेहि ।
उर्वन्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि,
कृण्वन् पूष्णा सयुजा सह ॥ ४ ॥
पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं,

पुरीष्यमङ्गिरस्वम्द्भरिष्यामः ॥ ५ ॥

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।

अनु सूर्यस्य पुरुत्रा च रश्मीननु,

द्यावापृथिवी आततन्थ ॥ ६ ॥

आगत्यं वाज्यध्वानः सर्वा मृधो विधूनुते ।

अग्निः सधस्थे महति चक्षुषा निचिकीषते ॥ ७ ॥

आक्रम्यं वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम् ।

भूम्या वृत्वायं नो ब्रूहि यतः खनेम तं वयम् ॥ ८ ॥

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षः समुद्रो योनिः ।

विख्याय चक्षुषा त्वमभि तिष्ठ पृतन्यतः ॥ ९ ॥

उत्क्राम महते सौभगयास्मादास्थानाद् द्रविणोदा वाजिन् ।

वयंस्याम सुमतौ पृथिव्या अग्निं, खनन्त उपस्थे अस्याः ॥ १० ॥

उदक्रमीद् द्रविणोदा वाज्यर्वाकः, सुलोकः सुकृतं पृथिव्याम् ।

ततः खनेम सुप्रतीकमग्निंस्वो,

रुहाणा अधि नाकमुत्तमम् ॥ ११ ॥

आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।

पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥ १२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।

मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः ॥ १३ ॥

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।

दधद्रत्नानि दाशुषे ॥ १४ ॥

परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।

धृषद्वर्णं दिवे दिवे भेत्तारं भङ्गुरावताम् ॥ १५ ॥

त्वमग्ने द्युभिस्त्वमाशुशुक्षणि-

स्त्वमद्भ्यस्त्वमश्मनस्परि ।

त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं,

नृणां नृपते जायसे शुचिः ॥ १६ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां,

पूष्णो हस्ताभ्यां ।

पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत् खनामि ।

ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यतम् ।

शिवं प्रजाभ्योऽहिंसन्तं पृथिव्यास्सधस्था,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दग्निं पुरीष्यं मङ्गिरस्वत् खनामः ॥ १ ॥

अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।

वर्धमानो महाँ आ च पुष्करे दिवो,

मात्रया वरिम्णा प्रथस्व ॥ २ ॥

शर्म च स्थो वर्म चस्थोऽच्छिद्रे बहुले उभे ।

व्यचस्वती संवसाथां भृतमग्निं पुरीष्यम् ॥ ३ ॥

संवसाथाः स्वर्विदा समीची उरसा त्मना ।

अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् ॥

पुरीष्योऽसि विश्वभरा अथर्वा त्वा, प्रथमो निरमन्थदग्ने ॥ ४ ॥

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत ।

मूर्ध्नो विश्वस्य वाघतः ॥ ५ ॥

तमु त्वा दध्यङ् ऋषिः पुत्र ईधे अथर्वणः ।

वृत्रहणं पुरंदरम् ॥ ६ ॥

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् ।

धनंजयः रणेरणे ॥ ७ ॥

सीद होतः स्व उ लोके चिकित्वान्त्सादया,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञꣳसुकृतस्य योनौ ।

देवावीर्देवान् हविषा यजास्यग्ने,

बृहद्यजं माने वयो धाः ॥ ८ ॥

नि होता होतृषदने विदानस्त्वेषो,

दीदिवाँ असदत्सुदक्षः ।

अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः,

शुचिजिह्वो अग्निः ॥ ९ ॥

सꣳसीदस्व महाँ २ असि शोचस्व देववीतमः ।

विधूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥ १० ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः ।

तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ १ ॥

सं ते वायुर्मातरिश्वा दधा तूत्तानाया, हृदयं यद्विकस्तम् ।

यो देवानां चरसि प्राणथेन कस्मै देव वषळस्तु तुभ्यम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः ।
वासो अग्ने विश्वरूपं संव्ययस्व विभावसो ॥ ३ ॥
उदु तिष्ठ स्वध्वरावा नो देव्या धिया ।
दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः ॥ ४ ॥
ऊर्ध्व ऊषुणं ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ५ ॥
सजातोगर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमांस्यक्तून् प्र मातृभ्यो,
अधि कनिक्रदद्गाः ॥ ६ ॥
स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥ ७ ॥
शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
माद्यावापृथिवी अभि शोचीर्मान्तरिक्षं मा वनस्पतीन् ॥ ८ ॥
प्रैतु वाजी कनिक्रदन्नानदद्रा संभस्यत्वा ।
भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ॥ ९ ॥
वृषाग्निं वृषणं भरन्नपां गर्भं समुद्रियम् ।
अग्न आ याहि वीतये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतꣳ सत्यमृतꣳ सत्यमग्निं पुरीष्यमङ्गिरस्वद्भरामः ॥ १० ॥

ओषधयः प्रतिमोदध्व मग्निमेतꣳ शिवमायन्तमभ्यत्र युष्माः ।

व्यस्यन्, विश्वा अनिरा अमीवा, निषीदन्नो अपदुर्मतिं जहि ॥ ११ ॥

ओषधयः प्रतिगृभ्णीत पुष्पवतीः सुपिप्पलाः ।

अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदत् ॥ १२ ॥

वि पाजसा पृथुना शोशुचानो बाधस्व,

द्विषो रक्षसो अमीवाः ।

सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ

सुहवस्य प्रणीतौ ॥ १३ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

आपो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन ।

महे रणाय च क्षसे ॥ १ ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः ।

उशतीरिव मातरः ॥ २ ॥

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।

आपो जनयथा च नः ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रः संसृज्यं पृथिवीं भूमिं च ज्योतिषासह ।
सुजातं जातवेदसमयक्ष्मायं त्वा, सः सृंजामि प्रजाभ्यः ॥ ४ ॥

रुद्राः संसृज्यं पृथिवीं बृहज्योतिः समीधिरे ।
तेषां भानुरजंस्र इच्छुक्रो देवेषु रोचते ॥ ५ ॥

संसृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् ।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ॥ ६ ॥

सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा ।
सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥ ७ ॥

उखां कृणोतु शक्त्या बाहुभ्या मदिति धिया ।
माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भ आ ॥ ८ ॥

मखस्य शिरोऽसि वसंवस्त्वा कृण्वन्तु,
गायत्रेण छन्दसाङ्गिरस्वद् ध्रुवासि पृथिव्यसि ।
धारया मयि प्रजाः रायस्पोषं गौपत्यः,
सुवीर्यः सजातान् यजमानाय ।
रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वद्,
ध्रुवास्यन्तरिक्षमसि ।
धारया मयि प्रजाः रायस्पोषं गौपत्यः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुवीर्यं॑ सजातान् यज॑मानाय ।
आदित्यास्त्वा कृण्वन्तु जाग॑तेन,
छन्दंसाङ्गिरस्वद् ध्रुवासि द्यौर॑सि ।
धारया मयि प्रजा॑ रायस्पोषं, गौपत्य॑,
सुवीर्यं॑ सजातान् यज॑मानाय ।
विश्वे॑ त्वा देवा वैश्वानराः कृण्वन्त्वानु॑ष्टुभेन,
च्छन्दंसाङ्गिरस्वद् ध्रुवासि दिशोऽसि ।
धारया मयि प्रजा॑ रायस्पोषं गौपत्य॑,
सुवीर्यं॑ सजातान् यज॑मानाय ।
अदि॑त्यै रास्ना स्यदि॑तिष्टे बिलं गृभ्णातु ॥ ९ ॥
कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये ।
पुत्रेभ्यः प्राय॑च्छददि॑तिः श्रपयानिति ॥ १० ॥
वसंवस्त्वा धूपयन्तु गायत्रेण
छन्दंसाङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन,
छन्दंसाङ्गिरस्वत् ।
आदित्यास्त्वा धूपयन्तु जाग॑तेन,
छन्दंसाङ्गिरस्वद् विश्वे॑ त्वा देवा वैश्वानरा,
धूपयन्त्वानु॑ष्टुभेन छन्दंसाङ्गिरस्वत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु,
विष्णुस्त्वा धूपयतु ॥ ११ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

अदितिष्ट्वा देवी विश्वदेव्यावती ।
पृथिव्याः सधस्थे अङ्गिरस्वत् खनत्ववट ॥ १ ॥
देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः ।
पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखे ।
धिषणास्त्वा देवीर्विश्वदेव्यावतीः ।
पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धतामुखे ।
वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः ।
पृथिव्याः सधस्थे अङ्गिरस्वच्छ्रपयन्तूखे ।
ग्नास्त्वा देवीर्विश्वदेव्यावतीः ।
पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखे ।
जनयस्त्वा च्छिन्नपत्रा देवीर्विश्वदेव्यावतीः
पृथिव्याः सधस्थे अङ्गिरस्वत्प चन्तूखे ॥ २ ॥
मित्रस्य चर्षणीधृतोऽवो देवस्य सानसी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्युम्नं चित्रश्रवस्तमम् ॥ ३ ॥

देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः,

सुबाहुरुत शक्त्या

अव्यथमाना पृथिव्यामाशा दिश आपृण ॥ ४ ॥

उत्थाय बृहती भवोदुतिष्ठ ध्रुवा त्वम् ।

मित्रैतां त उखां परिददाम्यभित्त्या एषा मा भेदि ।

वसवस्त्वा, च्छृन्दन्तु गायत्रेण छन्दसाङ्गिरस्वद्,

रुद्रास्त्वाच्छृन्दन्तु, त्रैष्टुभेनच्छन्दसाङ्गिरस्वत् ।

आदित्यास्त्वाच्छृन्दन्तु जागतेनच्छन्दसाङ्गिरस्वद्,

विश्वे त्वा देवा वैश्वानराः आच्छृन्दन्त्वानुष्टुभेन,

छन्दसाङ्गिरस्वत् ॥ ५ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

आकूतिमग्निं प्रयुजः स्वाहा मनो,

मेधामग्निं प्रयुजः स्वाहा ।

चित्तं विज्ञातमग्निं प्रयुजः स्वाहा,

वाचो विधृतिमग्निं प्रयुजः स्वाहा ।

प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहा ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वो॑ दे॒वस्य॑ ने॒तुर्मर्तो॑ वुरीत स॒ख्यम् ।

विश्वो॑ रा॒य इ॑षुध्यति द्यु॒म्नं वृ॑णीत पु॒ष्यसे॒ स्वाहा॑ ॥ २ ॥

मा सु भि॑त्था॒ मा सु रि॑षो॒ऽम्ब॑ धृ॒ष्णु वी॒रय॑स्व॒ सु ।

अ॒ग्निश्चे॒दं क॑रिष्यथः ॥ ३ ॥

दृ॒ꣳह॑स्व दे॒वि पृ॑थिवि स्व॒स्तय॑ आसु॒री-

मा॒या स्व॒धया॑ कृ॒तासि॑ ।

जुष्टं॑ दे॒वेभ्य॑ इ॒दम॑स्तु ह॒व्यमरि॑ष्टा,

त्वमुदि॑हि य॒ज्ञे अ॒स्मिन् ॥ ४ ॥

द्वन्नः॑ स॒र्पिरा॑सुतिः प्र॒त्नो होता॒ वरे॑ण्यः ।

सह॑सस्पु॒त्रो अद्भु॑तः ॥ ५ ॥

पर॑स्या॒ अधि॑ सं॒वतोऽव॑राँ २ अ॒भ्यात॑र ।

य॒त्राहम॒स्मि ता २ अ॑व ॥ ६ ॥

प॒र॒मस्याः॑ परा॒वतो॑ रो॒हिद॑श्व इ॒हाग॑हि ।

पु॒री॒ष्यः॑ पुरु॒ प्रि॒यो॒ऽग्ने त्वं त॑रा॒ मृधः॑ ॥ ७ ॥

यद॑ग्ने॒ कानि॒कानि॑ चि॒दा ते॒ दारू॑णि द॒ध्मसि॑ ।

सर्वं॑ तद॑स्तु ते घृ॒तं तज्जु॑षस्व यविष्ठ्य ॥ ८ ॥

यदत्त्यु॑पजि॒ह्वि॒का यद्व॒म्रो अ॑ति॒सर्प॑ति ।

सर्वं॑ तद॑स्तु ते घृ॒तं तज्जु॑षस्व यविष्ठ्य ॥ ९ ॥

16

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहरहरप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥ १० ॥
नाभा पृथिव्याः समिधाने अग्नौ रायस्पोषाय बृहते हवामहे ।
इरंमदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥ ११ ॥
याः सेना अभीत्वरीराव्याधिनीरुगणा उत ।
ये स्तेना ये च तस्करास्ताँ स्ते अग्नेऽपिदधाम्यास्ये ॥ १२ ॥
दंष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्कराँ उत ।
हनुभ्याँ स्तेनान् भगवस्ताँ स्त्वं खाद सुखादितान् ॥ १३ ॥
ये जनेषु मलिम्लवस्तेनासस्तस्करा वने ।
ये कक्षेष्वघायवस्ताँ स्ते दधामि जम्भयोः ॥ १४ ॥
यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्यो अस्मान् धिप्साच्च सर्वं तं मस्मसा कुरु ॥ १५ ॥
सँ शितं मे ब्रह्म सँ शितं वीर्यं बलम् ।
सँ शितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥ १६ ॥
उदेषां बाहू अतिरमुद्वर्चो अथो बलम् ।
क्षिणोमि ब्रह्मणा मित्रा नुन्नयामि स्वाँ २ अहम् ॥ १७ ॥
अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वकर्मणे स्वाहा ॥ १८ ॥

पुनंस्त्वादित्या रुद्रा वसंवः समिन्धतां पुनं ब्रह्माणों वसुनीथ यज्ञैः ।

घृतेनत्वं तन्वं वर्धयस्व सत्याः संन्तु यजंमानस्य

कामाः स्वाहा ॥ १९ ॥

—०—

युञ्जान एकादश (११) प्रतूर्तं वाजिन् षोळश (१६)

देवस्य त्वा दश (१०) अपो देवा स्त्रयोदश (१३)

आपो ह्येकादश (११) अदितिष्टवा पञ्च (५) आकूति-

मेकोनविं शतिः १९) सप्तानुवाकेषु पञ्चाशीतिः (८५)

इति शुक्लयजुर्वेदकाण्वसंहितायां द्वितीयदशके द्वितीयोऽध्यायः (२)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

द्वितीयदशके तृतीयोऽध्यायः (३)

(प्रथमोऽनुवाकः १)

दृशानो रुक्म उर्व्या व्यंद्यौद् दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद् वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥ १ ॥

नक्तोषासा समनसा विरूपे, धापयेते शिशुमेकं समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति, देवा अग्निं धारयन् द्रविणोदाः ॥ २ ॥

विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद् भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत् सविता वरेण्योऽनु, प्रयाणमुषसो विराजति ॥ ३ ॥

सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरः ।
गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ ॥ ४ ॥

स्तोम आत्मा छन्दांस्यङ्गानि यजूंषि नाम ।
साम ते तनुर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः ॥ ५ ॥

सुपर्णोऽसि गरुत्मान् दिवं गच्छ स्वः पत ।
विष्णोः क्रमोऽसि सपत्नहा गायत्रं च्छन्द आरोह ।
पृथिवीमनु विक्रमस्व ।
विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्द आरोह ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्तरिक्षमनु विक्रमस्व ।

विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आरोह ।

दिवमनु विक्रमस्व ।

विष्णोः क्रमोऽसि शत्रूयतो हन्तानुष्टुभं छन्द आरोह ।

दिशोऽनु विक्रमस्व ॥ ६ ॥

अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।

सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ।

अग्नेऽभ्यावर्तिन्नभि मा निवर्त स्वायुषा वर्चसा प्रजयाधनेन ।

सन्या मेधया रय्या पोषेण ॥ ८ ॥

अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः ।

अधा पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि ॥ ९ ॥

पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा ।

पुनर्नः पाह्यंहसः ॥ १० ॥

सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया ।

विश्वप्स्न्या विश्वतस्परि ॥ ११ ॥

आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाऽविचाचलिः ।

विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत् ॥ १२ ॥

उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमंश्रथाय ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ १३ ॥

अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषागात् ।

अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ॥ १४ ॥

हꣳसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।

नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ १५ ॥

सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।

मैनां तपसा मार्चिषाभिशोचीरन्तरस्याꣳ शुक्रज्योतिर्विभाहि ॥ १६ ॥

अन्तरग्ने रुचा त्वमुखायाः सदने स्वे ।

तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव ॥ १७ ॥

शिवो भूत्वा मह्यमग्ने अथो सीद शिवस्त्वम् ।

शिवाः कृत्वा दिशः सर्वास्वं योनिमिहासदः ॥ १८ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परिजातवेदाः ।

तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥ १ ॥

विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।

विद्मा ते नाम परमं गुहा यद् विद्मा तमुत्सं यत आजगन्थ ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुद्रे त्वा नृमणा अप्स्वन्तर्नृचाक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन् ॥ ३ ॥
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ ४ ॥
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः ॥ ५ ॥
विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः ।
वीळुं चिदद्रिमभिनत् परायञ्जना यदग्निमयजन्त पञ्च ॥ ६ ॥
उशिक् पावको अरतिः सुमेधा मर्त्येष्वग्निरमृतो नि धायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥ ७ ॥
दृशानो रुक्म उर्व्या व्यद्यौद् दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद् वयोभिर्यदेनं द्यौरजनयत् सुरेताः ॥ ८ ॥
यस्ते अद्य कृणवद् भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥ ९ ॥
आ तं भज सौश्रवसेष्वग्न उक्थ उक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥ १० ॥
त्वामग्ने यजमाना अनु द्यून् विश्वा वसु दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्ताव्यग्निं नराः सुशोवों वैश्वानरऋषिभिः सोमंगोपाः ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥ १२ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

सामिधाग्निं दुवस्यत घृतैर्बोधय तातिथिम् ।
आस्मिन् हव्या जुहोतन ॥ १ ॥
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ॥ २ ॥
प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिष्टवम् ।
बृहद्भिर्भानुभिभसिन्मा हिꣳसीस्तन्वा प्रजाः ॥ ३ ॥
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहत् वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा,
रोदसी भानुना भात्यन्तः ॥ ४ ॥
प्र प्रायमनिर्भरतस्य शृण्वे, वि, यत् सूर्यो नरोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ,
दीदाय दैव्यो अतिथिः शिवो नः ॥ ५ ॥
आपो देवीः प्रतिगृभ्णीत भस्मैतत्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्योने कृणुध्वः सुरभा उं लोके।
तस्मैं नमन्तां जनंयः सुपत्नी-
र्मातेवं पुत्रं विंभृताप्स्वैनत् ॥ ६ ॥
अप्स्वंग्ने सधिष्टव सौषंधीरनुं रुध्यसे ।
गर्भे संजायसे पुनः ॥ ७ ॥
गर्भो अस्योषंधीनां गर्भो वनस्पतीनाम् ।
गर्भो विश्वंस्य भूतस्याग्ने गर्भो अपामंसि ॥ ८ ॥
प्रसद्य भस्मंना योनिंमपश्चं पृथिवीमंग्ने ।
सः सृज्यं मातृभिष्ट्वं ज्योतिंष्मान् पुनरासंदः ॥ ९ ॥
पुनंरासद्य सदंनमपश्चं पृथिवीमंग्ने।
शेषें मातुर्यथोपस्थेऽन्तरंस्याः शिवतंमः ॥ १० ॥
पुनंरूर्जा निवंर्तस्व पुनरग्ने इषायुंषा ।
पुनंर्नः पाह्यः हंसः ॥ ११ ॥
सह रय्या निवंर्तस्वाग्ने पिन्वंस्य धारंय ।
विश्वप्स्न्या विश्वतस्परिं ॥ १२ ॥
बोधा मे अस्य वचंसो यविष्ठ,
मंःहिंष्ठस्य प्रभृंतस्य स्वधावः ।
पीयंति त्वो अनुं त्वो गृणाति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दारुष्टे तन्वं वन्दे अग्ने ॥ १३ ॥

स बोधि सूरिर्मघवा वसुपते वसुदावन् ।

युयोध्यस्मद् द्वेषांऽसि विश्वकर्मणे स्वाहा ॥ १४ ॥

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां,

पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।

घृतेन त्वं तन्वं वर्धस्व सत्याः सन्तु,

यजमानस्य कामाः स्वाहा ॥ १५ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

अपेत वीत वि च सर्पतातो येऽत्रस्थ,

पुराणा ये च नूतनाः ।

अदाद्यमोऽवसानं पृथिव्या अक्रन्निम,

पितरो लोकमस्मै ॥ १ ॥

संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् ।

अग्नेर्भस्मास्यग्नेः पुरीषमसि ।

चितः स्थ परिचित ऊर्ध्वचितः श्रयध्वम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अय॒ꣳ सो अ॒ग्निर्यस्मि॒न्त्सोम॒मिन्द्रः॑ सु॒तं द॒धे ज॒ठरे॑ वावशा॒नः ।
स॒ह॒स्रियं॒ वाज॒मत्यं॒ न सप्ति॒ꣳ स॒स॒वान्त्सन्त्स्तू॑यसे जातवेदः ॥ ३ ॥

अग्ने॒ यत्ते॑ दि॒वि वर्चः॑ पृथि॒व्यां यदोष॑धीष्व॒प्स्वा य॑जत्र ।
येना॒न्तरि॑क्षमु॒र्वा॒त॒तन्थ॑ त्वे॒षः स भा॒नुर॑र्ण॒वो नृ॒चक्षाः॑ ॥ ४ ॥

अग्ने॑ दि॒वो अर्ण॒मच्छा॑ जिगा॒स्यच्छा॑ दे॒वाँ२ ऊ॑चिषे॒ धिष्ण्या॒ ये ।
या रो॑च॒ने प॒रस्ता॒त् सूर्य॑स्य,
याश्चा॒वस्ता॑दु॒प॒तिष्ठ॑न्त॒ आपः॑ ॥ ५ ॥

पु॒री॒ष्या॑सो अ॒ग्नयः॑ प्राव॒णेभिः॑ स॒जोष॑सः ।
जु॒षन्तां॑ य॒ज्ञम॒द्रु॒हो॑ऽनमी॒वा इषो॑ म॒हीः ॥ ६ ॥

इळा॑मग्ने पु॒रु॒दꣳस॒ꣳ स॒निं गोः,
शश्व॒त्तम॒ꣳ हव॑मानाय साध ।
स्यान्नः॑ सू॒नुस्तन॑यो वि॒जावा॒ग्ने,
सा ते॑ सुम॒तिर्भू॒त्व॒स्मे ॥ ७ ॥

अ॒यं ते॒ योनि॑र्ऋ॒त्वियो॒ यतो॑ जा॒तो अरो॑चथाः ।
तं जा॒नन्न॑ग्न॒ आ रो॒हाथा॑ नो वर्धया र॒यिम् ॥ ८ ॥

चिद॑सि॒ तया॑ दे॒वत॑याङ्गिर॒स्वद् ध्रु॒वा सी॑द ।
प॒रि॒चिद॑सि॒ तया॑ दे॒वत॑याङ्गिर॒स्वद् ध्रु॒वा सी॑द ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् ।

इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन् ॥ १० ॥

ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः ।

जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः ॥ ११ ॥

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।

रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥ १२ ॥

समितꣳ संकल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ ।

इषमूर्जमभि संवसानौ ॥ १३ ॥

सं वां मनाꣳसि सं व्रता समु चित्तान्याकरम् ।

अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि ॥ १४ ॥

अग्ने त्वं पुरीष्यो रयिमान् पुष्टिमाँ असि ।

शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः ॥ १५ ॥

भवतं नः समनसौ सचेतसावरेपसौ ।

मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं,

जातवेदसौ शिवौ भवतमद्य नः ॥ १६ ॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा ।

तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्,

विश्वकर्मा विमुञ्चतु ॥ १७ ॥ (४)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(पञ्चमोऽनुवाकः ५)

असुंन्वन्तमयंजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।

अन्यमस्मदिच्छ सा तं इत्वा नमो देवि निर्ऋते तुभ्यमस्तु ॥ १ ॥

नमः सुते निर्ऋते तिग्मतेजोऽयस्मयं विचृता बन्धमेतम् ।

यमेन त्वं यम्या संविदानोत्तमे नाके अधिरोहयैनम् ॥ २ ॥

यस्यास्ते घोर आसञ्जुहोम्येषां बन्धानामवसर्जनाय ।

यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहं परिवेद विश्वतः ॥३॥

यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।

तं ते विष्याम्यायुषो न मध्यादाथैतं पितुमद्धि प्रसूतः ।

नमो भूत्यै येदं चकार ॥ ४ ॥

निवेशनः सङ्गमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः ।

देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥ ५ ॥

सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् ।

धीरा देवेषु सुम्नया ॥ ६ ॥

युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।

गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥ ७ ॥

शुनं सुफाला विकृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः ।

शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तमस्मे ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घृतेन सीता मधुना समंज्यतां विश्वैर्देवैरनुंमता मरुद्भिः ।

ऊर्जस्वती पयंसा पिन्वंमानास्मान्त्सीते पयंसाभ्यावंवृत्स्व ॥ ९ ॥

लाङ्गंलं पवीरवत् सुशेवं सोमपित्सरु ।

तदुद्वंपति गामंविं प्रफुर्व्यं च पीवंरीं,

प्रस्थावंद्रथवाहंणम् ॥ १० ॥

कामं कामदुघे धुक्ष्व मित्राय वरुंणाय च ।

इन्द्रांयाश्विभ्यां पूष्णे प्रजाभ्य ओषंधीभ्यः ॥ ११ ॥

विमुंच्यध्वमघ्न्या देवयाना अगंन्म तमंसस्पारमस्य ।

ज्योतिरापाम ॥ १२ ॥

सजूरब्दो अयंवोभिः सजूरुषा अरुंणीभिः ।

सजोषंसा अश्विना दंसोभिः सजूः सूर एतशेन,

सजूर्वैश्वानर इळया घृतेन स्वाहा ॥ १३ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

या ओषंधीः पूर्वा जाता देवेभ्यंस्त्रियुगं पुरा ।

मनै नु बभ्रूणामहं शतं धामानि सप्त चं ॥ १ ॥

शतं वो अम्ब धामानि सहस्रंमुत वो रुहंः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥ २ ॥

ओषधीः प्रति गृभ्णीत पुष्पवतीः प्रसूवरीः ।

अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ ३ ॥

ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे ।

सनेयमश्वं गां वास आत्मानं तव पूरुष ॥ ४ ॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।

गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ५ ॥

यत्रौषधीः समग्मत राजानः समिता इव ।

विप्रः स उच्यते भिषग् रक्षोहामीवचातनः ॥ ६ ॥

अश्वावतीं सोमवतीमूर्जयन्तीमुदोजसम् ।

आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥ ७ ॥

उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते ।

धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥ ८ ॥

इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः ।

सीराः पतत्रिणी स्थन यदामयति निष्कृथ ॥ ९ ॥

अति विश्वाः परिष्ठा स्तेन इव व्रजमक्रमुः ।

ओषधीः प्राचुच्यवुर्यत्किं च तन्वो रपः ॥ १० ॥

यदिमा वाजयन्नहमोषधीर्हस्त आदधे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ११ ॥

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः ।

ततो यक्ष्मं विबाधध्व उग्रो मध्यमशीरिव ॥ १२ ॥

साकं यक्ष्म प्रपत चाषेण किकिदीविना ।

साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ १३ ॥

अन्या वो अन्यामवत्वन्यान्यस्या उपावत ।

ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥ १४ ॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।

बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳ हसः ॥ १५ ॥

मुञ्चन्तु मा शपथ्यादथो वरूण्यादुत ।

अथो यमस्य पड्वीशात् सर्वस्माद् देवकिल्बिषात् ॥ १६ ॥

अवपतन्तीरवदन्त दिव ओषधयस्परि ।

यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ १७ ॥

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।

तासामसि त्वमुत्तमारं कामाय शꣳहृदे ॥ १८ ॥

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।

बृहस्पतिप्रसूता अस्यै संदत्त वीर्यम् ॥ १९ ॥

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाः संगत्यं वीरूधोऽस्यै संदंत्त वीर्यम् ॥ २० ॥

नाशयित्री बलासस्यार्शस उपचितामसि ।

अथो शतस्य यक्ष्माणां पाकारोरसि नाशंनी ॥ २१ ॥

मा वो रिषत् खनिता यस्मै चाहं खनामि वः ।

द्विपच्चतुंष्पदस्माकः सर्वमस्त्वनातुरम् ॥ २२ ॥

ओषधयः सवंदन्ते सोमेन सह राज्ञा ।

यस्मै कृणोति ब्राह्मणस्तः राजन् पारयामसि ॥ २३ ॥

त्वांगन्धर्वाअखनःस्त्वामिन्द्रस्त्वांबृहस्पतिः ।

त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ॥ २४ ॥

त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।

उपस्तिरस्तु सोऽस्माकं यो अस्माः २ अभिदासति ॥ २५ ॥

—०—

(सप्तमोऽनुवाकः ७)

मा मा हिंसीज्जनिता यः पृथिव्या,

यो वा दिवः सत्यधर्मा व्यानट् ।

यश्चापश्चन्द्राः प्रथमो जजान कस्मै,

देवाय हविषा विधेम ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह ।
वपां ते अग्निरिषितो अरोहत् ॥ २ ॥
अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम् ।
तद्देवेभ्यो भरामसि ॥ ३ ॥
इषमूर्जमहमित आदमृतस्य योनिं महिषस्य धाराम् ।
आ मा गोषु विशत्वा तनूषु जहामि सेदिमनिराममीवाम् ॥ ४ ॥
अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥ ५ ॥
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥ ६ ॥
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वे इषः संदधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥ ७ ॥
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिं क्रतुम् ॥ ८ ॥
इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिꣳरयिम् ॥ ९ ॥
ऋतावानं महिषं विश्वदर्शतमग्निꣳ,
सुम्नाय दधिरे पुरो जनाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुत्कर्णः सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥ १० ॥

आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।

भवा वाजस्य संगथे ॥ ११ ॥

संते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।

आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥ १२ ॥

आप्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः ।

भवा नः सप्रथस्तमः सखा वृधे ॥ १३ ॥

आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।

अग्ने त्वां कामया गिरा ॥ १४ ॥

तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् ।

अग्ने कामाय येमिरे ॥ १५ ॥

अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य ।

सम्राळेको विराजति ॥ (७)

दशानोऽष्टादश (१८) दिवस्परि द्वादश (१२) समिधाग्निं दुवस्यत पञ्चदश (१५) अपेत सप्तदश (१७) असुन्वन्तं त्रयोदश (१३) या ओषधीः पञ्चविंशतिः (२५) मा मा षोळश (१६) सप्तानु वाके षु षोळशोत्तरं शतम् (११६)

इति शुक्लयजुर्वेदकाण्वसंहितायां द्वितीयदशके तृतीयोऽध्यायः (३)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

द्वितीयदशके चतुर्थोऽध्यायः

(प्रथमोऽनुवाकः १)

मयि गृह्णाम्यग्रे अग्निं रायस्पोषाय, सुप्रजास्त्वाय सुवीर्याय ।
मामु देवताः सचन्ताम् ॥ १ ॥

अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानो महाँ २ आ च पुष्करे, दिवो मात्रया वरिम्णा प्रथस्व ॥२॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेनः आवः ।
स बुध्न्या उपमा अस्य विष्ठाः, सतश्च योनिमसतश्च विवः ॥ ३ ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य, जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां, कस्मै देवाय हविषा विधेम ॥ ४ ॥

द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ ५ ॥

नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु
ये अन्तरिक्षे ये दिवि तेभ्यःसर्पेभ्यो नमः ॥ ६ ॥

या इषवो यातुधानानां ये वा वनस्पतीःरनु ।
ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये वाऽमी रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥ ८ ॥

कृणुष्वपाजः प्रसितिं न पृथ्वीं
याहि राजेवामवाँ २ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि,
विध्य रक्षसस्तपिष्ठैः ॥ ९ ॥

तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः ॥ १० ॥

प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥ ११

उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ २ ओषतात् तिग्महेते ।
यो नो अरातिं समिधानचक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥ १२ ॥

ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥ १३ ॥

अग्नेष्टवा तेजसा सादयामि ।
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति ।
इन्द्रस्य त्वौजसा सादयामि ॥ १४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥ १५ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

ध्रुवासि धरुणास्तृता विश्वकर्मणा ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृꣳह ॥ १ ॥
प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन् ।
व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥ २ ॥
भूरसि भूमिरस्यादितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं माहिꣳसीः ॥ ३ ॥
विश्वस्मै प्राणायापानाय व्यानायोदानाय, प्रतिष्ठायै चरित्राय ।
अग्निष्ट्वाभिपातु मह्या स्वस्त्या च्छर्दिषा शन्तमेन तया,
देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ ४ ॥
काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ ५ ॥
या शतेन प्रतनोषि सहस्रेण विरोहसि ।
तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥ ६ ॥
यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥ ७ ॥

या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।

इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥ ८ ॥

विराड्ज्योतिरधारयत् स्वराड्ज्योतिरधारयत् ।

प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या ज्योतिष्मतीम् ॥ ९ ॥

विश्वस्मै प्राणायाऽपानाय व्यानाय विश्वं ज्योतिर्यच्छ ।

अग्निष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ १० ॥

मधुश्च माधवश्च वासन्तिका ऋतू अग्नेरन्तः श्लेषोऽसि ।

कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः,

पृथङ् मम ज्यैष्ठ्याय सव्रताः ।

ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।

वासन्तिका ऋतू अभिकल्पमाना इन्द्रमिव,

देवा अभिसंविशन्तु तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ॥ ११ ॥

अषाळ्हासि सहमाना सहस्वारातीः सहस्व पृतनायतः ।

सहस्रवीर्यासि सा मा जिन्व ॥ १२ ॥

सहस्वेमा अभिमातीः सहस्वपृतनायतः ।

सहस्व सर्वं पाप्मानꣳसहमानास्योषधे ॥ १३ ॥ (२)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

मधु वाता ऋतायते मधुं क्षरंन्ति सिन्धंवः ।

माध्वीर्नः सन्त्वोषंधीः ॥ १ ॥

मधु नक्तंमुतोषसो मधुंमत्पार्थिवꣳ रजंः ।

मधु द्यौरंस्तु नः पिता ॥ २ ॥

मधुंमान्नो वनस्पतिर्मधुंमाँ २ अस्तु सूर्यः ।

माध्वीर्गावों भवंतु नः ॥ ३ ॥

अपां गर्भंन्त्सीद मा त्वा सूर्योऽभितांप्सीन्माग्निर्वैश्वानरः ।

अच्छिन्नपत्राः प्रजा अंनुवीक्षस्वानुं त्वा दिव्या वृष्टिः सचताम् ॥ ४ ॥

त्रीन्त्संमुद्रान्त्समंसृपत् स्वर्गानपां पतिर्वृंषभइष्टंकानाम् ।

पुरींषं वसानः सुकृतस्यं लोके तत्रं गच्छ यत्र पूर्वे परेताः ॥ ५ ॥

मही द्यौः पृंथिवी चं न इमं यज्ञं मिमिक्षताम् ।

पिपृतां नो भरींमभिः ॥ ६ ॥

विष्णोः कर्माणि पश्यत यतों व्रतानि पस्पशे ।

इन्द्रंस्य युज्यस्सखा ॥ ७ ॥

ध्रुवासि धरुणेतो जंज्ञे प्रथममेभ्यो योनिंभ्यो अधि जातवेदाः ।

स गायत्र्या त्रिष्टुभाऽनुष्टुभा च देवेभ्यों हव्यं वंहतु प्रजानन् ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इषे राये रमस्व सहसे द्युम्न ऊर्जे अपत्याय ।
सम्राळसि स्वराळसि सारस्वतौ त्वोत्सौ प्रावताम् ॥ ९ ॥
अग्ने युक्ष्या हि ये तवाश्वासो देव साधवः ।
अरं वहन्ति मन्यवे ॥ १० ॥
युक्ष्वा हि देवहूतमाँ २ अश्वाँ २ अग्ने रथीरिव
नि होता पूर्व्यः सदः ॥ ११ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धारा अभिचाकशीमि, हिरण्ययो वेतसो मध्ये अग्नेः ॥ १ ॥
ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा ।
अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥ २ ॥
अग्निर्ज्योतिषा ज्योतिष्मान्, रुक्मो वर्चसा वर्चस्वान् ।
सहस्रदा असि सहस्राय त्वा ॥ ३ ॥
आदित्यं गर्भं पयसा समङ्धि, सहस्रस्य प्रतिमां विश्वरूपम् ।
परिवृङ्धि हरसा माभिमंस्थाः शतायुषं कृणुहि चीयमानः ॥ ४ ॥
वातस्य जूतिं वरुणस्य नाभिमश्वं, जज्ञानं सरिरस्य मध्ये ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशुं नदीनाᳬ हरिमद्रिंबुध्नमग्ने मा हिᳬसीः परमेव्योमन् ॥ ५ ॥
अजंस्रमिन्दुंमरुषं भुरण्युमग्निमीळे पूर्वचित्तिं, नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गां मा हिᳬसीरदितिं विराजम् ॥ ६ ॥
वरूत्रीं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाᳬ रजसः परस्मात् ।
महीᳬ साहस्रीमसुरस्य मायामग्ने माहिᳬसीः परमे व्योमान् ॥ ७ ॥
यो अग्निरग्नेरध्यजायत शोकात्, पृथिव्या उत वा दिवस्परि ।
येन प्रजा विश्वकर्मा जजात तमग्ने हेळः परि ते वृणक्तु ॥ ८ ॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षᳬ सूर्य आत्मा जगतस्तस्थुषश्च ॥ ९ ॥ (४)

— ० —

(पञ्चमोऽनुवाकः ५)

इमं मा हिᳬसीर्द्विपादं पशुᳬ, सहस्राक्ष मेधाय चीयमानः ।
मयुं पशुं मेधमग्ने जुषस्व, तेन चिन्वानस्तन्वो निषीद ।
मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥ १ ॥
इमं मा हिᳬसीरेकशफं पशुं कं निक्रदं वाजिनं वाजिनेषु ।
गौरमारण्यमनु ते दिशामि तेनचिन्वानस्तन्वो निषीद ।
गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमइं साहस्रं शतधारमुत्सं व्यच्यमानं सरिरस्य मध्ये ।
घृतं दुहानामदितिं जनायाग्ने मा हिंसीः परमे व्योमन् ।
गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥ ३ ॥
इममूर्णायुं वरुणस्य नाभिं त्वचं, पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन् ।
उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
उष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥ ५ ॥
अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्रमायंस्तेन रोहमायन्नुप मेध्यासः ।
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥ ५ ॥
त्वं यविष्ठ दाशुषो नॄंः पाहि शृणुधी गिरः ।
रक्षा तोकमुत त्मना ॥ ६ ॥ (५)

— ० —

(षष्ठोऽनुवाकः ६)

अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादयाम्यपां, त्वा भस्मन्त्सादयामि ।
अपां त्वा ज्योतिषि सादयाम्यपां त्वायने सादयामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्णवे त्वा सदने सादयामि समुद्रे त्वा, सदने सादयामि सरिरे त्वा

सदने सादयामि ।

अपां त्वा क्षये सादयाम्यपां त्वा सर्धिषि सादयामि ।

अपां त्वा सदने सादयाम्ययां त्वा सधस्थे,

सादयाम्यपां त्वा योनौ सादयामि ।

अपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि ।

गायत्रेण त्वा छन्दसा सादमि त्रैष्टुभेन त्वा,

छन्दसा सादयामि जागतेन त्वा छन्दसा सादयामि ॥

आनुष्टुभेन त्वा छन्दसा सादयामि

पाङ्क्तेन त्वा छन्दसा सादयामि ॥ १ ॥ (६)

—•—

(सप्तमोऽनुवाकः ७)

अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनः ।

गायत्री वासन्ती ॥ १ ॥

गायत्र्यै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत् त्रिवृतो रथन्तरम् ।

वसिष्ठ ऋषिः प्रजापति गृहीतया त्वया,

प्राणं गृह्णामि प्रजाभ्यः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणम् ।

ग्रीष्मो मानसस्त्रिष्टुब् ग्रैष्मी ॥ ३ ॥

त्रिष्टुभः स्वारꣳ स्वारादन्तर्यामोऽन्तर्यामात् पञ्चदशः-

पञ्चदशात् बृहत् ।

भरद्वाज ऋषिः प्रजापतिगृहीतया, त्वया मनोगृह्णामि प्रजाभ्यः ॥४॥

अयं पश्चाद् विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसम् ।

वर्षाश्चाक्षुष्यो जगती वार्षी ॥ ५ ॥

जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात् सप्तदशः,

सप्तदशाद् वैरूपम् ।

जमदग्निर्ऋषिः प्रजापतिगृहीतया, त्वया चक्षुर्गृह्णाणि प्रजाभ्यः ॥ ६ ॥

इदमुत्तराद् स्वस्तस्य श्रोत्रꣳ सौवम् ।

शरच्छौत्र्यनुष्टुपच्छारदी ॥ ७ ॥

अनुष्टुभं ऐलमैळान्मन्थी मन्थिनं एकविꣳश,

एकविꣳशाद् वैराजम् ।

विश्वामित्रऋषिः प्रजापतिगृहीतया, त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥८॥

इयमुपरि मतिस्तस्यै वाङ्मात्या ।

हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती ॥ ९ ॥

पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशाभ्याꣳशाक्वररैवते ॥

विश्वकर्म ऋषिः प्रजापतिगृहीतया,

त्वया वाचं गृह्णामि प्रजाभ्यः ।

लोकं पृण ता अस्येन्द्रं विश्वाः ॥ १० ॥ (७)

मयि गृह्णामि पञ्चदश (१५) ध्रुवासि त्रयोदश (१३)

मधुवाता एकादश (११) सम्यक्स्रवन्ति नव (९)

इमं माषट् (६) अपान्त्वेका (१) अयं पुरो दश (१०)

सप्तानुवाकेषु पञ्चषष्टिः (६५)

इति शुक्लयजुर्वेदकाण्वसंहितायां द्वितीये दशके चतुर्थोऽध्यायः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

द्वितीयदशके पञ्चमोऽध्यायः

(प्रथमोऽनुवाकः १)

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साधुया ।
उख्यस्य केतुं प्रथमं जुषाणाश्विनाध्वर्यू सादयतामिहत्त्वा ॥ १ ॥
कुलायिनी घृतवती पुरंधि स्योने सीद सदने पृथिव्याः
अभित्वारुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि,
सौभगायाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ २ ॥
स्वैर्दक्षैर्दक्षपितेह सीद देवानांसुम्ने बृहते रणाया
पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा,
संविशस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ ३ ॥
पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा,
विश्वे अभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे,
द्रविणायजस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ ४ ॥
अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य
धर्त्री विष्टम्भनीं दिशामधिपत्नीं भुवनानाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त,

ऋषिरश्विनाऽध्वर्यू सादयतामिह त्वा ।

शुक्रश्च शुचिश्च ग्रैष्मा ऋतू अग्नेरन्तः श्लेषोऽसि ।

कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः,

कल्पन्ता मग्नयः पृथङ्ग मम ज्यैष्ठ्याय सव्रताः ।

ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।

ग्रैष्मा ऋतू अभिकल्पमाना इन्द्रमिव,

देवा अभिसंविशन्तु

तया देवतं याङ्गिरस्वद् ध्रुवे सीदतन् ॥ ५ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः,

सजूर्देवैर्वयोनाधैः ।

अग्नये त्वा वैश्वनरायाश्विनाऽध्वर्यू सादयतामिह त्वा ।

सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः,

सजूर्देवै वयोनाधैः ।

अग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सजूर्ऋतुभिः सजूर्विधाभिः, सजूरूद्रैः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः
सजूर्देवै र्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः,
सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ॥ १ ॥
प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि ।
चक्षुर्म उर्व्या विभाहि श्रोत्रं मे श्लोकय ॥ २ ॥
अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि ।
दिवो वृष्टिमेरय ॥ ३ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

मूर्धा वयः प्रजापतिश्छन्दः क्षत्रंवयो मयन्दं छन्दः ।
विष्टम्भो वयोऽधिपतिश्छन्दो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वकर्मा वयः परमेष्ठी छन्दः ॥ १ ॥

बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः ।

पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः ।

सिंहो वयश्छदिश्छन्दः पष्ठवाडवयो बृहती छन्दः ।

उक्षा वयः ककुप्छन्द ऋषभो वयः सतोबृहती छन्दः ॥ ३ ॥

अनड्वान् वयः पङ्क्तिश्छन्दो धेनुर्वयो जगतीच्छन्दः ।

त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छन्दः ॥ ४ ॥

पञ्चाविर्वयो गायत्रीच्छन्दस्त्रिवत्सो वय उष्णिक्छन्दः ।

तुर्यवाड्वयोऽनुष्टुप्छन्दो लोकं पृण ता अस्येन्द्रं विश्वाः ॥ ५ ॥

(चतुर्थोऽनुवाकः ४)

—०—

इन्द्राग्नी अव्यथमानामिष्टकां दृंहतं युवम् ।

पृष्ठेन द्यावापृथिवी अन्तरिक्षं च विबाधसे ॥ १ ॥

विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य,

पृष्ठे व्यचस्वतीं प्रथस्वतीम् ॥

अन्तरिक्षं यच्छान्तरिक्षं दृंहान्तरिक्षं मा हिंसीः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
वायुष्ट्वाभिपातु मह्या स्वस्त्या च्छर्दिषा,
शंतमेन तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ २ ॥
राज्ञ्यसि प्राची दिग् विराळसि दक्षिणा दिक्,
सम्राळसि प्रतीचीदिक्
स्वराळस्युदीची दिगधिपत्न्यसि बृहती दिक् ।
विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम् ।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ॥
वायुष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद ।
नभश्च नभस्यश्च वार्षिकावृतू अग्नेरन्तः श्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः
कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
वार्षिका ऋतू अभिकल्पमाना इन्द्रमिव देवा,
अभिसंविशन्तु तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ।
इषश्चोर्जश्च शारदा ऋतू अग्नेरन्तः श्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पन्तामग्नयः पृथङ्‌ मम ज्यैष्ठ्याय सव्रताः ।

ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।

शारदा ऋतू अभिकल्पमाना, इन्द्रमिव देवा अभिसंविशन्तु,

तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ॥ ३ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

आयुर्मे प्राहि प्राणं मे पाह्यपानं, मे पाहि व्यानं मेपाहि ।

चक्षुर्मे पाहि श्रोत्रं मे पाहि वाचं मे पिन्व,

मनो मे जिन्वात्मनं मे पाहि ज्योतिर्मे यच्छ ॥ १ ॥

मा छन्दः प्रमा च्छन्दः प्रतिमा छन्दो अस्त्रीवयश्छन्दः ।

पङ्क्तिश्छन्द उष्णिक्‌ च्छन्दः ॥ २ ॥

बृहतीच्छन्दोऽनुष्टुप्‌च्छन्दो विराट्छन्दो गायत्रीच्छन्दः ।

त्रिष्टुप्‌च्छन्दो जगतीच्छन्दः ॥ ३ ॥

पृथिवीच्छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दः ।

नक्षत्राणिछन्दो वाक्‌च्छन्दः ॥ ४ ॥

मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दः ।

अजाच्छन्दोश्वश्छन्दः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता ।

वसवो देवता रुद्रा देवता ।

आदित्या देवता मरुतो देवता विश्वेदेवा देवता-

बृहस्पतिर्देवता ।

इन्द्रो देवता वरुणो देवता ॥ ६ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

मूर्धासि राड् ध्रुवासि धरुणा धर्त्र्यसि धरणी ।

आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ॥ १ ॥

यन्त्री राड् यन्त्र्यसि यमनी ध्रुवासि धरित्री ।

इषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा ।

लोकं पृण ता अस्येन्द्रं विश्वाः ॥ २ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

आशुस्त्रिवृद्भान्तः पञ्चदशो व्योमा,

सप्तदशो धरुणं एकविंशः प्रतूर्तिरष्टादशः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपो नवदशोऽभीवर्तः संविꣳशो वर्चो द्वविंशः,
संभरणस्त्रयोविꣳशो योनिश्चतुर्विꣳशः ॥ १ ॥
गर्भाः पञ्चविꣳश ओजस्त्रिणषः क्रतुरेकत्रिꣳशः,
प्रतिष्ठा त्रयस्त्रिꣳशो ब्रध्नस्य विष्टपं चतुस्त्रिꣳशः ।
नाकः षट्त्रिꣳशो विवर्तोऽष्टाचत्वारिꣳशो धर्त्रं चतुष्टोमः ॥ २ ॥ (७)

—०—

(अष्टमोऽनुवाकः ८)

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं, ब्रह्मस्पृतं त्रिवृत्स्तोमः ।
इन्द्रस्य भागोऽसि विष्णोराधिपत्यं, क्षत्रꣳस्पृतं पञ्चदशस्तोमः ॥ १ ॥
नृचक्षसां भागोऽसि धातुराधिपत्यं, जनित्रꣳस्पृतꣳसप्तदशस्तोमः ।
मित्रस्य भागोऽसि वरुणस्याधिपत्यं, दिवोवृष्टिर्वातं स्पृत-
एकविꣳशः स्तोमः ॥ २ ॥
वसूनां भागोऽसि रुद्राणामाधिपत्यं, चतुष्पात् स्पृतं चतुर्विꣳशः स्तोमः ।
आदित्यानां भागोऽसि मरुतामाधिपत्यं, गर्भाःस्पृताः पञ्चविꣳशः
स्तोमः ॥ ३ ॥
अदितेर्भागोऽसि पूष्ण आधिपत्यमोजं स्पृतं त्रिणवस्तोमः ।
देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यꣳ,
समीचीर्दिशं स्पृताश्चतुष्टोम स्तोमः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यवानां भागोऽस्ययवानामाधिपत्यं प्रजाः-
स्पृताश्चतुश्चत्वारिꣳशः स्तोमः ।
ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं,
भूतꣳ स्पृतं त्रयस्त्रिꣳशः स्तोमः ।
सहश्च सहस्यश्च हैमन्तिका ऋतू अग्नेरन्तः श्लेषोऽसि ।
कल्पेतां द्यावा पृथिवी कल्पन्तामाप ओषधयः,
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः-
ये अग्नयः समनसोऽन्तरा द्यावा पृथिवी इमे ।
हैमन्तिका ऋतू अभिकल्पमाना इन्द्रमिव-
देवा अभिसंविशन्तु तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ॥ ५ ॥ (८)

—०—

(नवमोऽनुवाकः ९)

एकयाऽस्तुवत प्रजा अधीयन्त प्रजापति-
रधिपतिरासीत् तिसृभिस्तुवत,
ब्रह्मा सृज्यत ब्रह्मणस्पतिरधिपतिरासीत् ।
पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां,
पतिरधिपतिरासीत् सप्तभिरस्तुवत,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्त ऋषयोऽसृज्यन्त धाताधिपतिरासीत् ॥ १ ॥
नवभिरस्तुवत पितरोऽसृज्यन्तादिति-
रधिपत्न्यासीदेकादशभिरस्तुवत,
ऋतवोऽसृज्यन्तार्तवा अधिपतय आसन् ।
त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरो-
ऽधिपतिरासीत् पञ्चदशभिरस्तुवत-
क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत् ॥ २ ॥
सप्तदशभिरस्तुवत ग्राम्याः पशवोऽसृज्यन्त,
बृहस्पतिरधिपति रासीन्नवदशभि-
रस्तुवत शूद्रार्या असृज्येतामहोरात्रे अधिपत्नी आस्ताम् ।
एकविंशत्या स्तुवतैकशफाः पशवोऽसृज्यन्त,
वरुणोऽधिपतिरासीत् त्रयोविंशत्याऽस्तुवत क्षुद्राः-
पशवोऽसृज्यन्त पूषाधिपतिरासीत् ॥ ३ ॥
पञ्चविंशत्याऽस्तुवतारण्याः पशवोऽसृज्यन्त,
वायुरधिपतिरासीत् सप्तविंशत्याऽस्तुवत,
द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या,
अनुव्यायंस्त एवाधिपतय आसन् ।
नवविंशत्यास्तुवत वनस्पतयोऽसृज्यन्त,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमोऽधिपतिरासीदेकत्रिंशताऽस्तुवत,
प्रजा असृज्यन्त यवाश्चायंबाश्चाधिपतय आसन् ।
त्रयस्त्रिंशसाऽस्तुवत भूतान्यंशाम्यन्,
प्रजापतिः परमेष्ठ्यधिपतिरासीत् ।
लोकं पृण ता अस्येन्द्रं विश्वाः ॥ ४ ॥ (९)

—०—

ध्रुवक्षितिः पञ्च (५) सजूर्ऋतुभिस्तिस्रः (३) मूर्धा वयः पञ्च (३) इन्द्राग्नी तिस्रः (३) आयुर्मे षट् (६) मूर्धासि द्वे (२) आशुश्च द्वे (२) अग्नेर्भागः पञ्च (५) एकया च तस्रः (४) नवानुवाकेषु पञ्चत्रिंशत् (३५)

इति शुक्ल यजुर्वेदकाण्वसंहितायां द्वितीये दशके पञ्चमोऽध्यायः (५)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

द्वितीयदशके षष्ठोऽध्यायः

(प्रथमोऽनुवाकः १)

अग्ने जातान्प्रणुदानस्सपत्नान्प्रत्यजाताञ्जातवेदोनुदस्व ।
अ॒धिनो ब्रूहि सुमना अहेळꣳस्तवस्यामशर्मꣳस्त्रिवरूथ उद्भौ ॥ १ ॥
सहसा जातान्प्रणुदानस्सपत्नान्प्रत्यजातान्नुदजातवेदः ।
अधिनो ब्रूहिसुमनस्यमानो वयꣳस्याम प्रणुदानस्सपत्नान् ।
षोळशी स्तोम ओजो द्रविणश्चतुश्चत्वारिꣳशस्तो मोवर्चोद्रविणम् ॥ २ ॥
अग्नेः पुरीषमस्यप्सोना मतान्त्वा विश्वे अभिगृणन्तुदेवाः ।
स्तोमं पृष्ठा घृतवती हसीद प्रजावदस्मे द्रविणायंजस्व ॥ ३ ॥
एवश्छन्दो वरिवश्छन्दश्शम्भूश्छन्दः परिभूश्छन्दः ।
आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः ॥ ४ ॥
सिन्धुश्छन्दस्समुद्रश्छन्दस्सरिरञ्छन्दः ।
ककुप् छन्दस्त्रि ककुप् छन्दः काव्यञ्छन्दो अङ्कुपञ्छन्दः ॥ ५ ॥
अक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरोभ्रजश्छन्दः ।
आच्छच्छन्दः प्रच्छच्छन्दः सँय्यच्छन्दो वियच्छन्दः ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बृहच्छन्दों रथन्तरञ्छन्दों निकायश्छन्दों विवधश्छन्दः ।
गिरश्छन्दोभ्रजश्छन्दंस्सꣳस्तुप् च्छन्दोंऽनुष्टुप् छन्दः ॥ ७ ॥
एवश्छन्दो वरिवश्छन्दो वयश्छन्दों वयस्कृच्छन्दः ।
विष्पंर्धाश्छन्दों विशालञ्छन्दंश्छदिश्छन्दों दूरोहणञ्छन्दः ।
तन्द्रञ्छन्दों अङ्काङ्कञ्छन्दः ॥ ८ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

रश्मिना सत्याय सत्यञ्जिन्वप्रेतिना धर्मणा धर्मञ्जिन्व ।
अन्वित्यादिवादिवञ्जिन्व सन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्व ॥ १ ॥
प्रतिधिना पृथिव्या पृथिवीञ्जिन्वविष्टम्भेन वृष्ट्या वृष्टिञ्जिन्व ।
प्रवयाह्वाहर्जिन्वानुयारात्र्या रात्रीञ्जिन्व ॥ २ ॥
उशिजा वसुभ्यो वसूञ्जिन्व प्रकेतेनाऽऽदित्येभ्य आदित्याञ्जिन्व ।
तन्तुं नारायस्पोषेण रायस्पोषञ्जिन्वसꣳसर्पेण श्रुताय श्रुतञ्जिन्व ॥ ३ ॥
ऐळेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व ।
वयोधसाधीतेनाधीतञ्जिन्वाभि जिता तेजसा तेजोजिन्व ॥ ४ ॥
प्रतिपदसि प्रति पदेत्वानुपदस्यनुपदेत्वा ।
सम्पदसि सम्पदेत्वा तेजोऽसि तेजसेत्वा ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वत्रिवृद॑सित्रिवृते॑त्वा प्रवृद॑सि प्रवृते॑त्वा ।

विवृद॑सि विवृते॑त्वा सवृद॑सि सवृते॑त्वा ॥ ६ ॥

आक्रमो॑ऽस्याऽऽक्रमाय॑त्वा सङ्क्रमो॑ऽसि सङ्क्रमाय॑त्वा ।

उत्क्रमो॑ऽस्युत्क्रमाय त्वोत्क्रा न्तिरस्युत्क्रान्त्यै॑त्वा ॥

अधि॑पतिनोर्जोर्जि॑ञ्जिन्ववेष॑श्रीः,

क्षत्राय॑क्षत्रञ्जिन्व ॥ ७ ॥ २

—०—

(तृतीयोऽनुवाकः ३)

राज्ञ्य॑सि प्राची दिग्व॑सवस्ते देवा अधि॑पतयः ।

अग्निर्हे॑तीनाम्प्र॑तिधर्ता ॥ १ ॥

त्रिवृत्त्वा स्तोम॑ः पृथिव्याꣳश्र॑यत्वाज्य॑ मुक्थमव्य॑थायै स्तभ्नातु ।

रथन्त रꣳसाम प्रति॑ष्ठित्या अन्तरि॑क्षे ॥ २ ॥

ऋष॑यस्त्वा प्रथमजा देवेषु॑ दिवो मात्र॑ यावरिम्णा प्र॑थन्तु ।

विधर्ता चायमधि॑पतिश्चते त्वासर्वे॑ सꣳविदाना नाक॑स्य-

पृष्ठे स्वर्गे लोके यज॑मानश्च सादयन्तु ॥ ३ ॥

विराळ॑सि दक्षि॑णा दिग्रुद्रास्ते॑ देवा अधि॑पतयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रोहेतीनाम्प्रतिधर्ता ॥ ४ ॥

पञ्चदशस्त्वा स्तोमः पृथिव्याᳬश्रयतु प्रउगमुक्थमव्यथायै स्तभ्नातु ।

बृहत्साम प्रतिष्ठित्या अन्तरिक्षे ॥ ५ ॥

ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रयावरिम्णा प्रथन्तु ।

विधर्ता चायमधिपतिश्चते त्वासर्वे सँव्विदाना नाकस्य-

पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु ॥ ६ ॥

सम्राळसि प्रतीची दिगादित्यास्ते देवा अधिपतयः ।

वरुणो हेतीनाम्प्रतिधर्ता ॥ ७ ॥

सप्तदशस्त्वास्तोमः पृथिव्याᳬश्रयतु मरुत्वतीयमु-

क्थमव्यथायै स्तभ्नातु ।

वैरूपᳬ सामप्रतिष्ठित्या अन्तरिक्षे ॥ ८ ॥

ऋषयस्त्वा प्रथमजादेवेषुदिवो मात्रयावरिम्णा प्रथन्तु ॥

विधर्ता चायमधिपतिश्चते त्वा सर्वे सँव्विदाना नाकस्य पृष्ठे-

स्वर्गे लोके यजमानञ्च सादयन्तु ॥ ९ ॥

स्वराळ स्युदीची दिङ्मरुतस्ते देवा अधिपतयः ।

सोमो हेतीनाम्प्रतिधर्ता ॥ १० ॥

एकविᳬशस्त्वास्तोमः पृथिव्याᳬश्रयतु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्कैवल्य मुक्थमव्यंथायै स्तभ्नातु ।

वैरा जंसामप्रतिष्ठित्या अन्तरिक्षे ।। ११ ।।

ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रं यावरिम्णा प्रथन्तु ।

विधर्ता चायमधिपतिश्च तेत्वा सर्वे सँविदाना-

नाकस्य पृष्ठे स्वर्गेलोके यजमानञ्चसादयन्तु ।। १२ ।।

अधि पत्न्यसि बृहती दिग्वे श्वे ते देवाअधिपतयः ।

बृहस्पतिर्हेतीनाम्प्रतिधर्ता ।। १३ ।।

त्रिणवत्रयस्त्रिंशौ त्वास्तोमौ पृथिव्याᳪंश्रयतॉं-

व्वैश्वदेवाग्निमारुते उक्थेअव्यंथायै स्तभ्नीताम् ।

शाक्वररैवते सामनी प्रतिष्ठित्याअन्तरिक्षे ।। १४ ।।

ऋषयस्त्वा प्रथमजा देवेषु दिवोमात्रया वरिम्णाप्रथन्तु ।

विधर्ता चायमधिपतिश्चते त्वासर्वे सँविदाना-

नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु ।। १५ ।। (३)

—०—

चतुर्थोऽध्यायः (४)

अयम्पुरो हरिकेशस्सूर्यरश्मिस्तस्य रथ-

गृत्सश्च रथौजाश्चसेनानीग्रामण्यौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुञ्जिकस्थलाचं क्रतुस्थलाचाप्सरसौं दङ्क्ष्णवंः-

पशवोंहेतिः पौरुंषेयो वधः प्रहें तिः ॥ १ ॥

तेभ्योनमों अस्तु तेनौंमृळयन्तु तेनोंऽवन्तु ।

तेयंन्द्विष्मोयश्चं नोद्वेष्टि तमेंषाञ्जम्भेंदध्मः ॥ २ ॥

अयन्दंक्षिणा विश्वकंर्मा तस्यंरथस्व-

नश्च रथें चित्रश्चसेनानीग्रामण्यौं ।

मेनकाचं सहजन्या चाप्सरसौं यातुधाना

हेतीर क्षांᳪसि प्रहेंतिः ॥ ३ ॥

तेभ्योनमों अस्तु तेनौंमृळयन्तु तेनोंऽवन्तु ।

तेयन्द्विष्मो य श्चंनोद्वेष्टि तमेंषाञ्जम्भेंदध्मः ॥ ४ ॥

अयम्पश्चाद्विश्वव्यं चास्तस्य रथंप्रोतश्चासं मरथश्चसेनानीग्रामण्यौं ।

प्रम्लोचंन्तीचानुम्लोचंन्तीचाप्सरसौं व्याघ्राहेतिः स र्पाःप्रहेंतिः ॥ ५ ॥

तेभ्योनमों अस्तु तेनौंमृळयन्तु तेनौंवन्तु ।

तेयन्द्विष्मो यश्चं नोद्वेष्टि तमेंषाञ्जम्भेंदध्मः ॥ ६ ॥

अयमुंत्तरा त्सँय्यद्वंसुस्तस्यताक्ष्यंश्चारिष्टने मिश्च सेनानीग्रामण्यौं ।

विश्वाचीच घृताचीचाप्सरसा आपोंहेतिर्वातः प्रहें तिः ॥ ७ ॥

तेभ्योनमों अस्तु तेनौंमृळयन्तु तेनौंवन्तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेयन्द्विष्मो यश्चं नोद्वेष्टि तमैषाञ्जम्भेदध्मः ॥ ८ ॥

अयमुपर्यर्वाग्वं सुस्तस्यं सेनाजिच्चं सुषेणश्च सेनानीग्रामण्यौ ।

उर्वशीच पूर्वचिंत्तिश्चाप्सरसा अवस्फूर्जन्हेति विंद्युत्प्रहेतिः ॥ ९ ॥

तेभ्योनमो अस्तु तेनोमृळयन्तु तेनोऽवन्तु ।

तेयन्द्विष्मो यश्चनोद्वेष्टि तमैषाञ्जम्भेदध्मः ॥ १० ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

अपाᳬरेताᳬसिजिन्वति ॥ १ ॥

अयमग्निस्सहस्रिणो वाजस्य शतिनस्पतिः ।

मूर्धाकवी रयीणाम् ॥ २ ॥

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत ।

मूर्ध्नो विश्वस्य वाघतः ॥ ३ ॥

भुवोयज्ञस्य रजसश्चनेता यत्रा नियुद्भिस्सचसे शिवाभिः ।

दिविमूर्धानंदधिषे स्वर्षाञ्जिह्वामग्ने चकृषे हव्यवाहम् ॥ ४ ॥

अबोध्यग्निस्समिधा जनानाम्प्रति धेनुमिवायतीमुषासम् ।

यह्वाइव प्रवयामुज्जिहानाः प्रभानवसिस्रते नाकमच्छ ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवोचाम कवये मेध्याय वचो वन्दारुवृषभाय वृष्णे ।

गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥ ६ ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।

यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ ७ ॥

जनस्य गोपा अजनिष्ट जागृविरग्निस्सुदक्षस्सुविताय नव्यसे ।

घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥ ८ ॥

त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।

स जायसे मथ्यमानस्सहो महत्त्वामाहुस्सहसस्पुत्रमङ्गिरः ॥ ९ ॥

सखायस्सं वस्सम्यञ्चमिषं स्तोमञ्चाग्नये ।

वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥ १० ॥

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।

इळस्पदे समिध्यसे स नो वसून्याभर ॥ ११ ॥

त्वामग्ने हविष्मन्तो देवम्मर्तास ईळते ।

मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥ १२ ॥

त्वाञ्चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।

शोचिष्केशम्पुरुप्रियाग्ने हव्याय वोह्ळवे ॥ १३ ॥

एना वो अग्निन्नमसोर्जो नपातमाहुवे ॥

प्रियञ्चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥ १४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वस्य दूतममृतँव्विश्वस्यदू तममृतम् ।

सयोजते अरुषा विश्वभोजसा सदुद्रवत्स्वाहुतः ॥ १५ ॥

सदुद्रवत्स्वाहुतस्सदुवत्स्वाहुतः ।

सुब्रह्मा यज्ञस्सुशमी वसूनान्देवꣳराधो जनानाम् ॥ १६ ॥

अग्ने वाजस्य गोमत ईशानस्सहसोयहो ।

अस्मेधेहि जातवेदो महिश्रवः ॥ १७ ॥

सइधानो वसुष्कविरग्निरीळेन्यो गिरा ।

रेवदस्मभ्यम्पुर्वणीकदीदिहि ॥ १८ ॥

क्षपोराजन्नुत त्मनाग्नेवस्तोरुतोषसः ।

सतिग्मजम्भ रक्षसोदह प्रति ॥ १९ ॥

भद्रोनो अग्निराहुतो भद्रारातिस्सुभगभद्रो अध्वरः ।

भद्रा उतप्रशस्तयः ॥ २० ॥

भद्रा उतप्रशस्तयो भद्रम्मनः कृणुष्ववृत्रतूर्ये ।

येनासमत्सु सासहः ॥ २१ ॥

येना समत्सु सासहोऽवस्थिरा तनुहि भूरिशर्धताम् ।

वनेमाते अभिष्टिभिः ॥ २२ ॥

अग्निन्तम्मन्येयोवसुरस्तँय्यँय्यन्ति धेनवः ।

अस्तमर्वन्त आशवोऽस्तन्नित्यासो वाजिन इषꣳस्तोतृभ्य आभर ॥ २३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोअग्निर्यो वसुंर्गृणे सँय्यमायन्ति धेनवंः ।

समर्वन्तो रघुद्रुवस्सं̐सुंजातासंस्सूरयइषं̐स्तोतृभ्य आभंर ॥ २४ ॥

उभेसुंश्चन्द्र सर्पिषोदर्वीश्रीणीष आसनिं ।

उतोन उत्पुंपूर्या उक्थेषुं शवसस्पत इषं̐स्तोतृभ्य आभंर ॥ २५ ॥

अग्नेतमद्याऽश्वन्नस्तोमैः क्रतुन्नभद्रं̐हृंदिस्पृशंम् ।

ऋध्यामातओहैः ॥ २६ ॥

अधाह्यंग्ने क्रतोर्भद्रस्य दक्षंस्य साधोः ।

रथीर्ऋतस्यं बृहतोबभूथं ॥ २७ ॥

एभिर्नो अर्कैर्भवानो अर्वाङ्स्वर्णज्योतिंः ।

अग्नेविश्वेभिस्सुमना अनीकैः ॥ २८ ॥

अग्निं̐होतारम्मन्येदास्वंन्तँव्वसुं̐सूनुं̐सहंसो जातवेंदसँव्विप्रन्न-

जातवेंदसम् ।

यऊर्ध्वयास्वध्वरो देवो देवाच्या कृपा ।

घृतस्य विभ्राष्टि मनुंवष्टि शोचिषाऽऽजुह्वानस्य सर्पिषः ॥ २९ ॥

अग्ने त्वन्नो अन्तम उतत्राता शिवोभंवा वरूथ्यंः ॥

वसुंरग्निर्वसुंश्रवाअच्छानक्षिद्युमत्तंमं̐रयिन्दाः ।

तन्त्वा शोचिष्ठदीदिवस्सुम्नायं नूनमीमहे सखिभ्यः ॥ ३० ॥ (५)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(षष्ठोऽनुवाकः ६)

येन ऋषय स्तपसा सत्रमायन्निन्धाना अग्निꣳस्वराभरन्तः ।
तस्मिन्नहन्निदंधेनाके अग्निय्यमाहुर्मनवस्तीर्णबर्हिषम् ॥ १ ॥
तम्पत्नीभिरनु गच्छेमदेवाः पुत्रै र्भ्रातृभिरुतवा हिरण्यैः ।
नाकङ्गृभ्णानास्सुकृतस्य लोके तृतीये पृष्ठे अधिरोचने दिवः ॥ २ ॥
आवाचो मध्यमरुहद्भुरण्युरयमग्निस्सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदङ्कृणुताँय्ये पृतन्यवः ॥ ३ ॥
अयमग्निर्वीरतमो वयोधास्सहस्रियो द्योततामप्रयुच्छन् ।
विभ्राजमा नस्सरिरस्य मध्य उपप्रया हिदिव्यानि धाम ॥ ४ ॥
सम्प्रच्यं वध्वमुप सम्प्रया ताग्ने पथोदेव यानान्कृणुध्वम् ।
पुनः कृण्वाना पितरा युवानाऽन्वाताꣳसीत्त्वयि तन्तुमेतम् ॥ ५ ॥
उद्बुध्यस्वाग्ने प्रति जागृहित्वमिष्टा पूर्तेसꣳसृजेथा भयश्च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्चसीदत ॥ ६ ॥
येन वहसि सहस्रँय्येनाग्ने सर्ववेदसम् ।
तेनेमँय्यज्ञन्नो नयस्स्वर्देवेषु गन्तवे ॥ ७ ॥
अयन्तेयोनिर्ऋत्वियो यतो जातो अरोचथाः ।
तञ्जानन्नग्न आरोहाथानोवर्धयारयिम् ॥ ८ ॥ (६)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(सप्तमोऽनुवाकः ७)

तपंश्च तपस्यंश्च शैशिरा ऋतू अग्नेरंन्तः श्लेषोंऽसि ।

कल्पैंतान्द्यावा पृथिवी कल्पंन्तामाप ओषंधयः कल्पंन्तामग्नयः-

पृथङ्ममम ज्येष्ठ्याय सव्रंताः ।

ये अग्नयस्समंनसोऽन्तरा द्यावापृथिवी इमे ।

शैशिरा ऋतू अंभिकल्पंमाना इन्द्रंमिवदेवा अंभिसँव्विंशन्तुतया-

देवतंयाङ्गिरस्वद् ध्रुवेसींदतम् ।

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिंष्मतीम् ।

विश्वंस्मै प्राणायापानायं व्यानाय विश्वञ्ज्योतिंर्यच्छ ।

सूर्यस्तेऽधिपतिस्तया देवतंयाङ्गिरस्वद्ध्रुवासींद ॥ १ ॥

लोकम्पृंणच्छिद्रम्पृणाथोंसी दध्रुवात्वम् ।

इन्द्राग्नी त्वा बृहस्पतिंरस्मिन्योंना असीषदन् ॥ २ ॥

ताअस्य सूदंदोहसस्सोमंँ श्रीणन्ति पृश्नंयः ।

जन्मंन्देवानाँव्विशंस्त्रिष्वारोंचने दिवः ॥ ३ ॥

इन्द्रँव्विश्वा अवीवृधन्त्समुद्रव्यंच सङ्गिरंः ।

रथीतंमँ रथीनाँव्वाजानाँ सत्पं तिम्पतिंम् ॥ ४ ॥

प्रोथदश्वो नयवंसेऽविष्यन्यदा महस्सँव्वरंणाद्व्यस्थात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदस्य वातो अनुवातिशोचिरधस्मते व्रजनङ्कृष्णमस्ति ॥ ५ ॥

आयोष्ट्वा सदने सादयाम्यवतश्छायायाᳬसमुद्रस्य हृदये ।

रश्मीवतीम्भास्वती माया द्याम्भास्या पृथिवीमोर्वन्तरिक्षम् ।

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीम्प्रथस्वतीम् ।

दिवँय्यच्छदिवन्दᳬ हृदिवम्माहिᳬसीः ॥

विश्वस्मै प्राणायापानाय व्यानायो दानाय प्रतिष्ठायै चरित्राय ।

सूर्यस्त्वाभिपातु मह्या स्वस्त्या च्छर्दिषा शन्तमेनतया-

देवतयाङ्गिरस्वद्ध्रुवेसदितम् ॥ ६ ॥

सहस्रस्य प्रमासि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि ।

साहस्रोऽसि सहस्रायत्वा ॥ ७ ॥ (७)

—०—

अग्नेजातानष्ट (८) रश्मिनासत्यायसप्त (७)

राज्ञ्यसिपञ्चदश (१५) अयम्पुरोदश (१०)

अग्निर्मूर्धात्रिᳬशत् (३०) येन ऋषयोऽष्ट (८)

तपश्च सप्त (७) सप्तानुवाकेषुपञ्चाशीतिः (८५)

इति शुक्लयजुर्वेदकाण्वसंहितापाठे षोडशोऽध्यायः ।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

द्वितीयदशके सप्तमोऽध्यायः

(प्रथमोऽनुवाकः १)

नमस्ते रुद्र मन्यवं उतोत इषवे नमः ।
बाहुभ्यामुतते नमः ॥ १ ॥
या ते रुद्रशिवा तनूरघोराऽपापकाशिनी ।
तया नस्तन्वाशन्तं मया गिरिशान्ताऽभिचाकशीहि ॥ २ ॥
या मिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवाङ्गिरित्रताङ्कुरु माहिंसीः पुरुषञ्जगत् ॥ ३ ॥
शिवेन वचसा त्वा गिरिशाऽच्छा वदामसि ।
यथा नस्सर्वमिज्जगदयक्ष्मं सुमना असत् ॥ ४ ॥
अध्यवोचदधि वक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भ यन्त्सर्वाश्च यातुधान्योऽधराचीःपरासुव ॥ ५ ॥
असौ यस्ताम्रो अरुण उत वभ्रुस्सुमङ्गलः ।
येचैनं रुद्रा अभितो दिक्षु श्रि तास्सहस्रशोऽवैषां हेळईमहे ॥ ६ ॥
असौयोऽवसर्पति नीलग्रीवो विलोहि तः ।
उतैनङ्गोपा अदृश्रन्नदृश्रन्नुदहार्यस्सदृष्टोमृळयातिनः ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।

अथो ये अस्य सत्वानोऽहन्तेभ्योऽकर न्नमः ॥ ८ ॥

प्रमुञ्च धन्व नस्त्वमुभयो रात्न्योर्ज्याम् ।

याश्चते हस्त इषव वः पराता भगवोवप ॥ ९ ॥

विज्यन्धनुः कपर्दिनो विशल्यो वाणवाँ२उत ।

अनेशन्नस्ययया इषव आभुरस्य निषङ्गधिः ॥ १० ॥

परि ते धन्वनो हेतिरस्मा न्वृणक्तु विश्वतः ।

अथो यइषुधिस्त वारे अस्मन्निधेहितम् ॥ ११ ॥

याते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।

तयास्मान्विश्वत स्त्वमयक्ष्मया परि भुज ॥ १२ ॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानाम्मु खा शिवोनस्सुमनाभव ॥ १३ ॥

नमस्त आयुधा यानातताय धृष्णवे ।

उभाभ्यामुत ते नमो बाहुभ्यान्तवधन्वने ॥ १४ ॥

मानो महान्तमुत मानो अर्भकम्मान उक्षन्त मुतमान उक्षितम् ।

मानोवधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्ररीरिषः ॥ १५ ॥

मानस्तो केतनयेमान आयुषिमानोगोषु मानो अश्वेषुरीरिषः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानो वीरान्रुद्र भामिनो वधीर्हविष्मन्तस्सद-
मित्त्वा हवामहे ॥ १६ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

नमो हिरण्यबाहवे सेनान्ये दिशाञ्चपतये नमोनमो-
वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमः ।
नमःशष्पिञ्जराय त्विषीमते पथीनाम्पतये नमोनमो-
हरिकेशायोपवीतिने पुष्टानाम्पतये नमः ॥ १ ॥
नमोबभ्लुशायाव्याधिनेऽन्ना नाम्पतये-
नमोनमो भवस्य हेत्यैजगताम्पतयेनमः ।
नमोरुद्रायाततायिने क्षेत्राणाम्पतये
नमोनमस्सूतायाहंन्त्यै वनानाम्पतये नमः ॥ २ ॥
नमोरोहिताय स्थप तये वृक्षाणाम्पतये नमोनमो-
भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमः ।
नमोमन्त्रिणे वाणिजाय कक्षाणाम्पतये-
नमोनमं उच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमः ॥ ३ ॥
नमः कृत्स्नायताय धावते सत्वनाम्पतये नमोनमस्सहमानाय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निव्याधिनं आव्याधिनीनाम्पतंये नमः ।

नमः ककुभायं निषङ्गिणें स्तेनानाम्पतंये-

नमोनमों निचेरवें परिचरायारंण्यानाम्पतंये नमः ॥ ४ ॥

नमोवञ्चंते परिवञ्चंते स्तायूनाम्पतंये नमोनमों-

निषङ्गिणं इषुधिमते तस्कंराणाम्पतंये नमः ।

नमं स्सृकायिभ्यो जिघांꣳसद्भ्यो मुष्णताम्पतंये-

नमोनमोंऽसि मद्भ्योनक्तञ्चरंद्भ्यो विकृन्तानाम्पतंये नमः ॥ ५ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

नमं उष्णीषिणें गिरिचरायं कुलुञ्चानाम्पतंये-

नमोनमंइषुमद्भ्यों धन्वायिभ्यं श्च वोनमः ।

नमंआतन्वानेभ्यंः प्रतिदधानेभ्यश्च वोनमोनमं-

आयच्छद्भ्योऽस्यंद्भ्यश्च वोनमः ॥ १ ॥

नमोंविसृजद्भ्यो विध्यंद्भ्यश्च वोनमोनमंस्स्वपद्भ्यो-

जाग्रंद्भ्यश्च वोनमः ।

नमः शयानेभ्य आसीनेभ्यश्च वोनमो-

नमस्तिष्ठंद्भ्यो धावंद्भ्यश्चवोनमः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमः॑स्सभाभ्य॑स्सभाप॑तिभ्यश्च वोनमो-

नमोऽश्वेभ्योऽश्व॑पतिभ्यश्च वोनमः॑ ।

नम॑ आव्याधिनी॑भ्यो विविध्य॑न्तीभ्यश्च वोनमोनम-

उग॑णाश्यस्तृ॒ꣳहतीभ्य॑श्च वोनमः॑ ॥ ३ ॥

नमो॑गणेभ्यो॑ गणप॑तिभ्यश्च वोनमो-

नमोव्राते॑भ्यो व्रात॑पतिभ्यश्च वोनमः॑ ।

नमोगृत्से॑भ्यो गृत्स॑पतिभ्यश्च वोनमो-

नमोविरू॑पेभ्यो विश्वरू॑पेभ्यश्चवोनमः॑ ॥ ४ ॥

नमस्सेना॑भ्यस्सेनानिभ्य॑श्च वोनमो-

नमो॑ रथिभ्यो॑ अरथेभ्य॑श्च वोनमः॑ ।

नमः॑क्षत्तृभ्य॑स्सङ्ग्रही तृभ्य॑श्च वोनमोनमो॑-

महद्भ्यो॑ अर्भकेभ्य॑श्च वोनमः॑ ॥ ५ ॥ (३)

— ० —

(चतुर्थोऽनुवाकः ४)

नमस्तक्ष॑भ्यो रथकारोभ्य॑श्च वोनमो नमः-

कुला॑लेभ्यः कर्मा॑रेभ्यश्च वोनमः॑ ।

नमो॑निषादेभ्य॑ः पुञ्जिष्टेभ्यश्च वोनमो नमः-

श्वनिभ्यो॑ मृगयुभ्य॑श्च वोनमः॑ ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमः॑श्वभ्यः॑श्वप॑तिभ्यश्च वोनमो नमो॑भवाय॑च रुद्राय॑च ।

नमः॑श्शर्वाय॑च पशुपत॑येच नमोनील॑ग्रीवायच शितिकण्ठायच ॥ २ ॥

नमः॑कपर्दिने॑च व्यु॑प्तकेशायच नमः॑स्सहस्राक्षाय॑च शतध॑न्वनेच ।

नमो॑गिरिशयाय॑च शिपिविष्टाय॑च नमो॑मीढुष्ट॑माय चेषु॑मतेच ॥ ३ ॥

नमो॑ह्रस्वाय॑च वामनाय॑च नमो॑बृहतेच वर्षी॑यसेच ।

नमो॑वृद्धाय॑च सवृधे॑च नमोऽग्र्यायच प्रथमाय॑च ॥ ४ ॥

नम॑आशवे॑चाजिराय॑च नमश्शीघ्र्यायच शीभ्यायच ।

नमऊर्म्यी॑यचावास्वन्यायच नमो॑नादेयाय॑च द्वीप्यायच ॥ ५ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

नमो॑ज्येष्ठाय॑च कनिष्ठाय॑च नमः॑पूर्वजाय॑चापरजाय॑च ।

नमो॑मध्यमाय॑चापगल्भाय॑यच नमो॑जघन्यायच बुध्न्यायच ॥ १ ॥

नमस्सोभ्यायच प्रतिसर्यी॑यच नमोयाम्यायच क्षेम्यायच ।

नमः श्लोक्यायचावसान्यायच नम॑उर्वर्यी॑यच खल्यायच ॥ २ ॥

नमोवन्यायच कक्ष्यायच नमः॑ श्रवाय॑च प्रतिश्रवाय॑च ।

नम॑ आशुषे॑णायचाशुर॑थायच नमः॑शूरायचावभेदिने॑च ॥ ३ ॥

नमो॑बिल्मिने॑च कवचिने॑च नमो॑वर्मिणे॑च वरूथिने॑च ।

नमः॑ श्रुताय॑च श्रुतसेनाय॑च नमो॑दुन्दुभ्यायचाहनन्यायच ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमोधृष्णवेच प्रमृशायच नमोनिषङ्गिणेचेषुधिमतेच ।
नमस्तीक्ष्णेषवेचायुधिनेच नमस्स्वायुधायच सुधन्वनेच ॥ ५ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

नमस्स्रुत्यायचपथ्यायच नमःकाटयायच नीप्यायच ।
नमःकुल्यायच सरस्यायच नमोनादेयायच वैशन्तायच ॥ १ ॥
नमःकूप्यायचावटयायच नमईध्रयायचातप्यायच ।
नमोमेध्यायच विद्युत्यायच नमोवर्ष्यायचाऽवर्ष्यायच ॥ २ ॥
नमोवात्यायच रेष्म्यायच नमोवास्तव्यायच वास्तुपायच ।
नमस्सोमायच रुद्रायच नमस्ताम्रायचारुणायच ॥ ३ ॥
नमःशङ्गवेच पशुपतयेच नमउग्रायच भीमायच ।
नमोऽग्रेवधायच दूरेवधायच नमोहन्त्रेच हनीयसेच ॥ ४ ॥
नमोवृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ।
नमःशम्भवेच मयोभवेच नमःशङ्करायच मयस्करायच-
नमःशिवायच शिवतरायच ॥ ५ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

नमःपार्यायचाऽवार्यायच नमःप्रतरणायचोत्तरणायच ।
नमस्तीर्थ्यायच कूल्यायच नमश्शष्प्यायच फेन्यायच ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमंस्सिकत्यायच प्रवाह्यायच नमः किंशिलायंच क्षयणायंच ।
नमः कपर्दिनैंच पुलस्तिनैंच नमंइरिण्यायच प्रपथ्याच ॥ २ ॥
नमोव्रज्यायच गोष्ठ्यायच नमस्तल्प्यायच गेह्यायच ।
नमोहृद्यायच निवेष्प्यायच नमःकाटयायच गह्वरेष्ठायंच ॥ ३ ॥
नमःशुष्क्याय चहरित्याच नमंःपांसव्यायच रजस्यायच ।
नमोलोप्यायचोलप्यायच नम ऊर्व्यायंच सूर्व्यायच ॥ ४ ॥
नमंःपर्णायंच पर्णशदायंच नमंउद्गुरमाणायचाऽभिघ्नतेचं ।
नमंआखिदतेचं प्रखिदतेच नमंइषुकृद्भ्यों धनुष्कृद्भ्यंश्च वोनमंः ।
नमोंवःकिरिकेभ्यों देवानांहृदयेभ्यो नमों-
विचिन्वत्केभ्यो नमोंविक्षिणत्केभ्यो नमंआनिर्हतेभ्यंः ॥ ५ ॥ (७)

—०—

(अष्टमोऽनुवाकः ८)

द्रापे अन्धं सस्पते दरिद्र नीलंलोहित ।
आसाम्प्रजानामेषाम्पंशूनाम्माभेमोंरोङ्मो चंनःकिञ्चनाऽऽमंमत् ॥ १ ॥
इमा रुद्रायं तवसें कपर्दिनें क्षयद्वीराय प्रभंरामहे मतीः ।
यथाशमसंद्द्विपदे चतुंष्पदे विश्वंम्पुष्टङ्ग्रामें अस्मिन्नं नातुरम् ॥ २ ॥
यातें रुद्रशिवा तनूश्शिवा विश्वाहा भेषजी ।
शिव ऋतस्यंभेष जी तयानो मृळजीवसें ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिणो हेती रुद्रस्यं वृज्यात्परित्वेषस्यं दुर्मति मेहीगात् ।

अवंस्थिरा मघवंद्भस्तनुष्व मीढ्वस्तोकाय तनंयायमृळ ॥ ४ ॥

मीढुष्टम शिवंतम शिवो नंस्सुमना भव ।

परमे वृक्ष आयुंधन्निधाय कृत्तिं व्वसान आचंरपिनाकम्बिभ्रदागंहि ॥५॥

विकिंरिद्रविलोहित नमंस्ते अस्तु भगवः ।

यास्तें सहस्रंः हेतयोऽन्यमस्मन्निवं पन्तुताः ॥ ६ ॥

सहस्राणिस हस्रशो बाह्वोस्तवं हेतयः ।

तासामीशानो भगवः पराचीना मुखाकृधि ॥ ७ ॥

असंङ्ख्याता सहस्राणि येरुद्रा अधिभूम्याम् ।

तेषाः सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ८ ॥

अस्मिन्मंहत्यंर्णवेऽन्तरिंक्षे भवा अधिं ।

तेषाः सहस्रयोज नेऽवधन्वानि तन्मसि ॥ ९ ॥

नीलंग्रीवाः शिति कण्ठा दिवंः रुद्रा उपंश्रिताः ।

तेषाःसहस्रयोजनेऽवधन्वानि तन्मसि ॥ १० ॥

नीलंग्रीवाश्शितिकण्ठाश्शर्वा अधःक्षंमा चराः ।

तेषाः सहस्रयोजनेऽवधन्वानि तन्मसि ॥ ११ ॥

येवृक्षेषुंश ष्पिंजरानीलग्रीवाःविलोहिताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषा ँ सहस्रयोजने ऽवधन्वानितन्मसि ॥ १२ ॥

येभूतानामधिपतयो विशिखासः कपर्दिनः ।

तेषा ँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १३ ॥

ये पथाम्पथिरक्षिण ऐळ बृदा आयुर्युधः ।

तेषा ँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ १४ ॥

येतीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।

तेषा ँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ १५ ॥

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

तेषा ँ सहस्रयोजनेऽवधन्वानि तन्मसि ॥ १६ ॥

यएतावन्तश्च भूया ँ सश्च दिशोरुद्रावि तस्थिरे ।

तेषा ँ सहस्रयोजनेऽवधन्वा नितन्मसि ॥ १७ ॥

नमोऽस्तु रुद्रेभ्यो येदिवि येषाँव्वर्षमिषवः ।

तेभ्योदश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीची र्दशोर्ध्वाः ।

तेभ्यो नमो अस्तु तेनो मृळयन्तु तेनोऽवन्तु ।

तेयन्द्विष्मो यश्चनो द्वेष्टितमेषाञ्जम्भेदध्मः ।

नमोऽस्तुरुद्रेभ्यो येऽन्तरिक्षे येषाँव्वात इषवः ।

तेभ्योदश प्राचीर्दश दक्षिणा दश प्रतीची र्दशोदीची र्दशोर्ध्वाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेभ्यो नमों अस्तु तेनोंमृळयन्तु तेनोंऽवन्तु ।

तेयन्द्विष्मो यश्चनो द्वेष्टितमेंषाञ्जम्भेंदध्मः ।

नमोंऽस्तु रुद्रेभ्यो ये पृथिव्याँय्येषा मन्नमिषंवः ।

तेभ्यो दशप्राचीर्दशं दक्षिणा दशं प्रतीचीर्दशोदीचीर्दशोर्ध्वा ।

तेभ्यो नमों अस्तु तेनोंमृळयन्तु तेनोंऽवन्तु ।

तेयन्द्विष्मो यश्चं नोद्वेष्टि तमेंषाञ्जम्भें दध्मः ॥ १८ ॥ (८)

नमस्तेषोळश (१६) नमोहिरण्यबाहवे (५) नमउष्णीषिणे (५) नमस्तक्षभ्यः (५) नमोज्येष्ठाय (५) नमस्तुत्याय (५) नमःपार्यायेति पञ्चपञ्च (५) द्रापेअन्धसइत्यष्टादश (१८) अष्टानुवाकेषुचतुःषष्टिः (६४)

इति शुक्लयजुर्वेदकाण्वसँहितापाठेसप्तदशोऽध्यायः

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

द्वितीयदशके अष्टमोऽध्यायः

(प्रथमोऽनुवाकः १)

अश्मन्नूर्जम्पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्यो-
अधिसम्भृतम्पयः ।
तान्न इषभूर्जन्धत्त मरुतस्सꣳरराणा अश्मꣳस्ते क्षुन्मयित-
ऊर्ग्यन्द्विष्मस्तन्ते शुगृच्छतु ॥ १ ॥
इमामे अग्नइष्टका धेनवस्सन्त्वेकाच दशच दशच शतञ्च शतञ्च ।
सहस्रञ्च सहस्रञ्चायुतञ्चायुतञ्च नियुतञ्च नियुतञ्च ॥ २ ॥
अर्बुदञ्च न्यर्बुदञ्च समुद्रश्च मध्यञ्चान्तश्च परार्धश्च ।
एतामे अग्नइष्टका धेनवस्सन्त्वमुत्रामुष्मिँल्लोके ॥ ३ ॥
ऋतवस्थ ऋतावृधः ऋतु ष्ठास्थ ऋतावृधः ।
घृतश्च्युतो मधुश्च्युतो विराजोनाम कामदुघा अक्षीय माणाः ॥ ४ ॥
समुद्रस्य त्वावकयाऽग्ने परिव्ययामसि ।
पावको अस्मभ्यꣳ शिवोभव ॥ ५ ॥
हिमस्यत्वा जरायुणाग्ने परिव्ययामसि ।
पावको अस्मभ्यꣳशिवोभव ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उप ज्मन्नुप वेतसेऽवतरनदीष्वा ।

अग्नेपित्तमपामसि मण्डूकिता भिरागहि सेमन्नो-

यज्ञम्पावकवर्णꣳशिवङ्कृधि ॥ ७ ॥

अपामिदन्ययनꣳसमुद्रस्य निवेशनम् ।

अन्याꣳस्ते अस्मत्तपन्तुहेतयः पावको अस्मभ्यꣳशिवोभव ॥ ८ ॥

अग्ने पावक रोचिषा मन्द्रयादेवजिह्वया ।

आदेवान्वक्षि यक्षिच ॥ ९ ॥

सनः पावकदीदिवोऽग्ने देवाँ२इहावह ।

उप यज्ञꣳ हविश्चनः ॥ १० ॥

पावकयायश्चित यन्त्या कृपाक्षामन्नुरुच उषसोन भानुना ।

तूर्वन्नया मन्नेतशस्यनूरण आयो घृणेन ततृषाणो अजरः ॥ ११ ॥

नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।

अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳशिवोभव ।

नृषदे वेळप्सुषदे वेड्बर्हिषदे वेड्वनसदे वेट्स्वर्विदेवेट् ॥ १२ ॥

येदेवा देवानाँयज्ञिया य ज्ञियानाꣳसंव्वत्सरीणमुप भागमासते ।

अहुतादोहविषो यज्ञे अस्मिन्त्स्वय म्पिबन्तु मधुनो घृतस्य ॥ १३ ॥

येदेवा देवेष्वधि देवत्वमायन्ये ब्रह्मणः पु र एतारो अस्य ।

येभ्योनऋते पवतेधा मकिञ्चननते दिवोन पृथिव्या अधिस्नु षु ॥ १४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणदा अंपानदा व्यानदा वर्चोदा वरिवोदाः ।

अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवोभव ॥ २५ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

अग्निस्तिग्मेनं शोचिषा याऽऽसद्विश्वन्यत्रिणंम् ।

अग्निर्नो वनुते रयिम् ॥ १ ॥

यइमाविश्वा भुवंनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।

स आशिषा द्रविण मिच्छमानः प्रथमच्छदवराँ२ आविवेश ॥ २ ॥

किंस्विदासीदधिष्ठानंमारम्भंणङ्क तमात्स्वित्कथाऽऽसीत् ।

यतो भूमिञ्जनयंन्विश्वकर्मा विद्यामौर्णोन्महिना विश्वचं क्षाः ॥ ३ ॥

विश्वतंश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतंस्पात् ॥

सम्बाहुभ्यान्धमंति सम्पतंत्रै द्यावाभूमी जनयंन्देव एकः ॥ ४ ॥

किंस्विद्वनङ्क उसवृक्ष आसयतो द्यावापृथिवी निष्टतक्षुः ।

मनीषिणो मनंसा पृच्छतेदुतद्यद ध्यतिष्ठ द्भुवनानि धारयंन् ॥ ५ ॥

याते धामानि परमाणि याव्वमायामंध्यमा विश्वकर्मन्नुतेमा ।

शिक्षा सखिभ्यो हविषिस्वधावस्स्व यँय्यंजस्वतन्वँव्वृधानः ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचस्पतिंविश्वकर्माणमूतये मनोजुवँवाजे अद्याहुवेम ।
सनो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥ ७ ॥
विश्वकर्मन्हविषा वा वृधानः स्वयँय्यजस्व पृथिवीमुतद्याम् ।
मुह्यन्त्वन्ये अभितस्सपत्ना इहास्माकम्मघवा सूरिरस्तु ॥ ८ ॥
विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरयुध्यम् ।
तस्मै विशस्समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत् ॥ ९ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

चक्षुषः पितामनसा हिधीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अदद्द हन्त पूर्व आदिद्यावा पृथिवी अप्रथेताम् ॥ १ ॥
विश्वकर्मा विमना आद्विहा या धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषामदन्ति यत्रा सप्त ऋषीन्परएकमाहुः ॥ २ ॥
योनः पिताजनितायो विधाता धामानि वेद भुव नानि विश्वा ।
यो देवानान्नामधाएक एवतꣳसम्प्रश्नम्भुवनायन्त्यन्या ॥ ३ ॥
तआयजन्त द्रविणꣳ समस्माऋषयः पूर्वे जरितारोनभूना ।
असूर्ते सूर्ते रज सि निषत्ते ये भूतानि समकृण्वन्निमानि ॥ ४ ॥
परो दिवा परएना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कᳶ स्विद्गर्भम्प्रथमन्दध्र आपो यत्र देवास्समपश्यन्त पूर्वे ॥ ५ ॥

तमिद्गर्भम्प्रथमन्दध्रआपो यत्र देवास्समगच्छन्त विश्वे ॥

अजस्य नाभा अध्येकमर्पितँ यस्मिन्विश्वानि भुवनानि तस्थुः ॥ ६ ॥

नतँविदाथय इमाजजानान्य द्युष्माकमन्तरम्बभूव ।

नीहारेण प्रावृता जल्प्यांचाऽसुतृप उक्थशासश्चरन्ति ॥ ७ ॥

विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद्द्वितीयः ।

तृतीयः पिता जनितौषधीनामपाङ्गर्भव्यंदधात्पुरुत्रा ॥ ८ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

आशुःशिशानो वृषभोन भीमो घनाघनःक्षोभणश्चर्षणीनाम् ।

सङ्क्रन्दनोऽनि मिषएकवीरश्शतᳶसेना अजयत्साकमिन्द्रः ॥ १ ॥

सङ्क्रन्दनेनाऽनि मिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।

तदिन्द्रेण जयत तत्सहध्वँयुधो नरइषु हस्तेन वृष्णा ॥ २ ॥

सइषु हस्तैस्सनिषङ्गिभिर्वशीसᳶस्रष्टा सयुधइन्द्रो गणेन ।

सᳶसृष्टजित्सोमपा बाहु शर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥ ३ ॥

बृहस्पते परिदीया रथेन रक्षोहाऽमित्राँ२अपबाधमानः ।

प्रभञ्जन्त्सेनाः प्रमृणो युधाजयन्नस्माकमेध्यविता रथानाम् ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलविज्ञायस्थविरःप्रवीरस्सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्ररथमातिष्ठ गोवित् ॥ ५ ॥
गोत्रभिदङ्गोविदंव्वज्रबाहुञ्जयन्तमज्मप्रमृणन्तमोजसा ।
इमꣳसजाता अनुवीरयध्वमिन्द्रꣳ सखायो अनुसꣳरभध्वम् ॥ ६ ॥
अभि गोत्राणि सहसागाहमानोऽदयो वीरश्शतमन्युरिन्द्रः ।
दुश्चयवनःपृतनाषाळ युध्योऽस्माकꣳ सेना अवतु प्रयुत्सु ॥ ७ ॥
इन्द्रआसान्नेता बृहस्पतिर्दक्षिणा यज्ञःपुरएतु सोमः ।
देवसेनानामभि भञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम् ॥ ८ ॥
इन्द्रस्यवृष्णोवरुणस्य राज्ञ आदित्यानाम्मरुताꣳ शर्धउग्रम् ।
महामनसाम्भुवनच्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ॥ ९ ॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनाँम्मा मकानाम्मनाꣳसि ।
उद्वृत्रहन्वाजिनाँव्वाजिनान्युद्रथानाञ्जयताँय्यन्तु घोषाः ॥ १० ॥
अस्माकमिन्द्रस्समृतेषु ध्वजेष्वस्माकँय्या इषवस्ता जयन्तु ।
अस्माकँव्वीरा उत्तरे भवन्त्वस्माँ२उदेवा अवता हवेषु ॥ ११ ॥
अमीषाञ्चित्तम्प्रति लोभयन्ती गृहाणाङ्गान्यप्वेपरेहि ॥
अभिप्रेहि निर्दहहृत्सुशोकैरन्धेनाऽमित्रास्त मसा सचन्ताम् ॥ १२ ॥
अवसृष्टा परापत शरव्ये ब्रह्म सꣳशिते ।
गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः ॥ १३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेता जयंता नर इन्द्रोवश्शर्मं यच्छतु ।

उग्रावस्सन्तु बाहवोऽनाधृष्या यथाऽसंथ ।। १४ ।।

असौ यासेना मरुतः परेषामभ्यैति नओजंसा स्पर्धमाना ।

ताङ्गूहततमसाऽपंत्रते नयथामी अन्यो अन्यन्नजानन् ।। १५ ।।

यत्रं बाणा स्सम्पतंन्ति कुमारा विशिखाइंव ।

तन्नइन्द्रो बृहस्पतिरदितिश्शर्मं यच्छतु विश्वाहा शर्मयच्छतु ।। १६ ।।

मर्माणिते वर्मणाच्छादयामि सोमस्त्वा राजाऽमृतेनानुवस्ताम् ।

उरोर्वरीयोव रुणस्तेकृणोतु जयंन्तन्त्वानु देवामंदन्तु ।। १७ ।। (४)

—०—

(पञ्चमोऽनुवाकः ५)

उदेनमुत्तरान्नयाग्ने घृतेनाहुत ।

रायस्पोषेण सꣳसृज प्रजयाच बहुङ्कृधि ।। १ ।।

इन्द्रेमम्प्रतरान्नयसजातानामसद्वशी ।

समेनँव्वर्चसा सृजदेवा नाम्भागदाअंसत् ।। २ ।।

यस्यं कुर्मो गृहे हविस्तमग्ने वर्धयात्वम् ।

तस्मै देवा अधिब्रवन्नयश्च ब्रह्मणस्पतिः ।। ३ ।।

उदुत्वा विश्वे देवा अग्नेभरन्तु चित्तिभिः ।

सनोभव शिवस्त्वꣳसुप्रतीको विभावसुः ।। ४ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चदिशो दैवी यज्ञमवन्तु देवीरपामतिन्दुर्मतिम्बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे अधि यज्ञो अस्थात् ॥ ५ ॥
समिद्धे अग्ना अधिमामहान उक्थपत्र ईड्यो गृभीतः ।
तप्तङ्घर्मम्परिगृह्याऽयजन्तोर्जा यद्यज्ञमयजन्त देवाः ॥ ६ ॥
दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमणाश्शतपयाः ।
परिगृह्य देवा यज्ञमायन्देवा देवेभ्यो अध्वर्यन्तो अस्थुः ॥ ७ ॥
वीतꣳहविश्शमितꣳ शमिता यजध्यै तुरीयो यज्ञो यत्र हव्यमेति ।
ततोवाका आशिषोनो जुषन्ताम् ॥ ८ ॥
सूर्यं रश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२अजस्रम् ।
तस्य पूषा प्रसवेयाति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ॥ ९ ॥
विमान एषदिवो मध्य आस्त आपप्रिवाद्रोदसी अन्तरिक्षम् ॥
सविश्वाचीरभिचष्टे घृताचीरन्तरा पूर्वमपरञ्च केतुम् ॥ १० ॥
उक्षा समुद्रो अरुणस्सुपर्णः पूर्वस्ययोनिम्पितुराऽऽविवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ॥ ११ ॥
इन्द्रँविश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरः ।
रथीतमꣳ रथीनाँवाजानाꣳ सत्पतिम्पतिम् ॥ १२ ॥
देवहूर्यज्ञ आचवक्षत्सुम्नहूर्यज्ञ आचवक्षत् ।
यक्षदग्निर्देवो देवाँ२आचवक्षत् ॥ १३ ॥

25

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाजस्य माप्रसव उदग्राभेणोदग्रभीत् ॥
अधा सपत्नानिन्द्रोमे निग्राभेणाधराँ२अकः ॥ १४ ॥
उद्ग्राभश्च निग्राभश्च ब्रह्मदेवा अवीवृधन् ।
अधा सपत्नानिन्द्राग्नीमे विषूचीनान्व्यस्यताम् ॥ १५ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

क्रमध्वमग्निनानाकमुख्यᳪं हस्तेषु बिभ्रतः ।
दिवस्पृष्ठᳪं स्वर्गत्वा मिश्रादे वेभिराध्वम् ॥ १ ॥
प्राचीमनु प्रदिशम्प्रेहि विद्वानग्नेरग्ने पुरोअग्निर्भवेह ।
विश्वा आशा दीद्यानो विभाह्यर्जन्नो धेहि द्विपदे चतुष्पदे ॥ २ ॥
पृथिव्या अह मुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामहम् ॥ ३ ॥
स्वर्यन्तो नापेक्षन्त आद्याᳪं रोहन्ति रोदसी।
यज्ञँय्ये विश्वतो धारᳪं सुविद्वाᳪं सोवितेनिरे ॥ ४ ॥
अग्ने प्रेहि प्रथमो देव यताञ्चक्षुर्देवानामु तमर्त्यानाम् ।
इयक्षमाणा भृगुभिस्सजोषास्स्वर्यन्तु यजमानास्स्वस्ति ॥ ५ ॥
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकᳪं समीची ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्यावाक्षामारुक्मो अन्तर्विभाति देवा अग्निन्धारयन्द्रविणोदाः ॥ ६ ॥

अग्ने सहस्राक्ष शतमूर्धञ्छतन्ते प्राणास्सहस्रंव्यानाः ।

त्वꣳसाहस्रस्य रायईशिषे तस्मैते विधेम वाजाय स्वाहा ॥ ७ ॥

सुपर्णोऽसि गरुत्मान्पृष्ठे पृथिव्यास्सीद ।

भासान्तरिक्षमापृणज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृꣳह ॥८॥

आजुह्वानस्सुप्रतीकः पुरस्तादग्ने स्वँय्योनिमासीद साधुया ।

अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥ ९ ॥

ताꣳसवितुर्वरेण्यस्यचित्रामाहँव्वृणेसुमतिव्विश्वजन्याम् ॥

यामस्य कण्वो अदुहत्प्रपीनाꣳ सहस्रधाराम्पयसा महीङ्गाम् ॥ १० ॥

विधेमते परमे जन्मन्नग्ने विधेमस्तोमैरवरे सधस्थे ।

यस्माद्योनेरुदारिथा यजेतम्प्रत्वे हवीꣳषिजुहुरे समिद्धे ॥ ११ ॥

प्रेद्धो अग्ने दीदिहि पुरोनोऽजस्रया सूर्म्याय विष्ठ ।

त्वाꣳशश्वन्त उपयन्ति वाजाः ॥ १२ ॥

अग्नेत मद्या श्वन्नस्तोमैः क्रतुन्न भद्रꣳहृदिस्पृशम् ।

ऋध्यामात ओहैः ॥ १३ ॥

चित्तिञ्जुहोमि मनसा घृतेन यथादेवा इहागमन्वीतिहोत्राऋतावृधः ।

पत्येविश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहादाभ्यꣳहविः ॥ १४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तते अग्नेसमिधंस्सप्त जिह्वास्सप्त ऋषयस्सप्त धाम प्रियाणि ।

सप्तहोत्रास्सप्तधात्वा य जन्ति-

सप्तयोनीरापृणस्व घृतेनस्वाहा ॥ १५ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च ।

शुक्रश्चऋत पाश्चात्यंहाः ॥ १ ॥

ईदृङ्चान्यादृङ्चं सदृङ्चप्रतिसदृङ्च ।

मितश्च सम्मित तश्च सभराः ॥ २ ॥

ऋतजिच्चं सत्यजिच्चं सेनजिच्चं सुषेणश्च ॥

अन्तिमित्र श्चदूरे अमित्रश्च गणः ॥ ३ ॥

ऋतश्चं सत्यश्चं ध्रुवश्चं धरुणश्च ।

धर्ताचं विधर्ताचं विधारयः ॥ ४ ॥

ईदृक्षास एतादृक्षास ऊषुणस्सदृक्षासः प्रतिसदृक्षास एतन ।

मितासश्च सम्मितासोनो अद्यसभरसो मरुतो यज्ञेअस्मिन् ॥ ५ ॥

स्वतवांश्च प्रघासीचं सान्तपनश्चं गृहमेधीचं ।

क्रीळीचं शाकीचोज्जेषी ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रन्दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रन्दैवीर्विशो-
मरुतोऽनुवर्त्मानोऽभवन् ॥
एवमिमँय्यजमानन्दैवीश्चविशोमानुषीश्चानुवर्त्मानोभूयासुः ॥ ७ ॥ (७)

अश्मन्नूर्जम्पञ्चदश (१५) अग्निस्तिग्मेननव (९) चक्षुषः पिताष्ट (८) आशुःशिशानस्सप्तदश (१७) उदेनम्पञ्चदश (१५) क्रमध्वमग्निनाच (१५) शुक्रज्योतिश्चसप्त (७) सप्तानुवाकेषु षडशीतिः (८६)

इति शुक्लयजुर्वेदकाण्वसँहितापाठेऽष्टादशोऽध्यायः (८)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

द्वितीयदशके नवमोऽध्यायः

(प्रथमोऽनुवाकः १)

इमꣳ स्तनमूर्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सञ्जुषस्व शतधारमर्वन्तसमुद्रियꣳ सदनमाविशस्व ॥ १ ॥
घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमावह मादयस्वस्वाहाकृतँव्वृषभवक्षि हव्यम् ॥ २ ॥
समुद्रा दूर्मिर्मधु माँ२उदारदुपाꣳशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यँय्यदस्ति जिह्वा देवानाममृतस्यनाभिः ॥ ३ ॥
वयन्नामप्रब्रं वामा घृतस्यास्मिन्यज्ञे धारयामानमोभिः ।
उपब्रह्मा शृणवच्छस्यमानञ्चतुःशृङ्गोऽवमीद्गौरएतत् ॥ ४ ॥
चत्वारि शृङ्गा त्रयो अस्य पादाद्वे शीर्षे सप्तहस्तासोअस्य ।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याँ२आविवेश ॥ ५ ॥
त्रिधा हितम्पणिभिर्गुह्यमानङ्गविदेवासो घृतमन्वविन्दन् ।
इन्द्र एकꣳ सूर्य एकं ञ्जजान वेनादेकꣳ स्वधया निष्टतक्षुः ॥ ६ ॥
एताअर्षन्ति हृद्यात्समुद्राच्छत व्रजा रिपुणानावचक्षे ।
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्यक्स्रवन्ति सरितो नधेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इवक्षिपणोरीषमाणाः ॥ ७ ॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमीयःपतयन्ति यह्वाः ।
घृतस्य धारा अरुषोनवाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ ८ ॥
अभिप्रवन्त समनेव योषाःकल्याण्यस्स्म यमानासो अग्निम् ।
घृतस्य धारास्समिधो नसन्तता जुषाणो हर्यतिजातवेदाः ॥ ९ ॥
कन्याइव वहतुमे तवाउ अञ्ज्यञ्जाना अभिचाकशीमि ।
यत्रसोमस्सूयते यत्र यज्ञो घृतस्य धारा अभितत्पवन्ते ॥ १० ॥
अभ्यर्षत सुष्टुतिङ्गव्यमा जिमस्मासु भद्राद्रविणानि धत्त ।
इमँय्यज्ञन्नयत देवतानो घृतस्य धारामधु मत्पवन्ते ॥ ११ ॥
धामन्ते विश्वम्भुवनमधि श्रितमन्तस्समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथेय आभृतस्तमश्या ममधुमन्तऊर्मिम् ॥ १२ (१)

—०—

(द्वितीयोऽनुवाकः २)

वाजश्चमे प्रसवश्चमे प्रयतिश्चमे प्रसितिश्चमे ।
धीतिश्चमे क्रतुश्चमे स्वरश्चमे श्लोकश्चमे ।
श्रावश्चमे श्रुतिश्चमे ज्योतिश्चमे स्वश्चमे यज्ञेनकल्पन्ताम् ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणश्चमेऽपानश्चमे व्यानश्चमेऽसुश्चमे ।
चित्तश्चम आधीतश्चमे वाक्चमे मनश्चमे ।
चक्षुश्चमे श्रोत्रंश्चमे दक्षश्चमे बलश्चमे यज्ञेनकल्पन्ताम् ॥ २ ॥
ओजश्चमे महश्चम आत्माचमे तनूश्चमे ।
शर्मचमे वर्मचमेऽङ्गानिचमेऽस्थीनिचमे ।
परूंषिचमे शरीराणिचम आयुश्चमे जराचमे यज्ञेनकल्पन्ताम् ॥ ३ ॥
ज्यैष्ठ्यंश्चम आधिपत्यश्चमे मन्युश्चमे भामश्चमे ।
अमश्चमेऽम्भश्चमे जेमाच मे महिमाचमे-
वरिमाचमे प्रथिमाचमे वर्षिमाचमे द्राघिमाचमे ।
वृद्धश्चमे वृद्धिश्चमे यज्ञेनकल्पन्ताम् ॥ ४ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

सत्यश्चमे श्रद्धाचमे जगच्चमे धनश्चमे ।
विश्वञ्चमे महश्चमे क्रीळाचमेमोदश्चमे ।
जातञ्चमे जनिष्यमाणश्चमे सूक्तश्चमे सुकृतश्चमे यज्ञेनकल्पन्ताम् ॥१॥
वित्तश्चमे वेद्यश्चमे भूतश्चमेभविष्यच्चमे ।
सुगञ्चमे सुपथ्यञ्चमऋद्धञ्चम ऋद्धिश्चमे ।
क्लृप्तश्चमे क्लृप्तिश्चमे मतिश्चमेसुमतिश्चमेयज्ञेनकल्पन्ताम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्ताचंमे धर्ताचंमे क्षेमंश्चमे धृतिश्चमे ।

विश्वंश्चमे महंश्चमे सँव्विच्चंमे ज्ञात्रंश्चमे ।

सीरंश्चमे लयंश्चमे सूश्चंमे प्रसूश्चंमे यज्ञेनंकल्पन्ताम् ॥ ३ ॥

शञ्चंमे मयंश्चमे प्रियश्चंमेऽनुकामश्चंमे ।

कामंश्चमे सौमनसश्चंमे भगंश्चमे द्रविणश्चमे ।

भद्रञ्चंमे श्रेयंश्चमे वसीयश्चमे यशंश्चमे यज्ञेनंकल्पन्ताम् ॥ ४ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

ऊर्क्चंमे सूनृताचमे पयंश्चमे रसंश्चमे ।

घृतञ्चंमे मधुंचमे सग्धिश्चमे सपीतिश्चमे ।

कृषिश्चंमे वृष्टिश्चमे जैत्रंश्चम औद्भिद्यश्चमे यज्ञेनंकल्पन्ताम् ॥ १ ॥

ऋतञ्चंमेऽमृतंश्चमेऽयक्ष्मश्चमेऽनामयच्चमे ।

जीवातुंश्चमे दीर्घायुत्वञ्चंमेऽनमित्र श्चमेऽभयश्चमे ।

सुगञ्चंमे शयंनञ्चमे सूषाश्चंमे सुदिनंश्चमे यज्ञेनंकल्पन्ताम् ॥ २ ॥

रयिश्चंमे रायंश्चमे पुष्टञ्चंमे पुष्टिश्चमे ।

विभुचंमेप्रभुचंमे पूर्णञ्चंमे पूर्ण तंरश्चमे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुयंवश्चमेऽक्षितंचमेऽन्नंश्चमेऽक्षुच्चमे यज्ञेनंकल्पन्ताम् ॥ ३ ॥

व्रीहयंश्चमे यवाश्चमे माषाश्चमे तिलाश्चमे ।
मुद्गाश्चंमे खल्वाश्चमे प्रियङ्गंवश्चमेऽणंवश्चमे ।
श्यामाकाश्चमेनीवाराश्चमे गोधूमाश्चमे
मसूराश्चमे यज्ञेनंकल्पन्ताम् ॥ ४ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

अश्माचमे मृत्तिकाचमे गिरयंश्चमे पर्वताश्चमे ।
सिकंताश्चमे वनस्पतंयश्चमे हिरंण्यश्चमेऽयंश्चमे ।
सीसंञ्चमे त्रपुंचमे श्यामञ्चंमे लोहञ्चंमे यज्ञेनं कल्पन्ताम् ॥ १ ॥
अग्निश्चंम आपंश्चमे वीरुधंश्चम ओषंधयश्चमे ।
कृष्टपच्या श्चंमेऽकृष्टपच्याश्चंमे ग्राम्याश्चंमे पशवंआरण्याश्चंमे ।
वित्तञ्चंमे वित्तिश्चमे भूतञ्चंमे भूतिश्चमे यज्ञेनंकल्पन्ताम् ॥ २ ॥
वसुंचमे वसतिश्चंमे कर्मचमे शक्तिश्चमे ।
अर्थश्चमे यामंश्चम इत्याचंमे गतिश्चमे यज्ञेनंकल्पन्ताम् ॥ ३ ॥ (५)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(षष्ठोऽनुवाकः ६)

अग्निश्चम इन्द्रश्चमे सोमश्चम इन्द्रश्चमे ।

सविताचम इन्द्रश्चमे सरस्वतीचम इन्द्रश्चमे ।

पूषाचम इन्द्रश्चमे बृहस्पतिश्चम इन्द्रश्चमे यज्ञेनकल्पन्ताम् ॥ १ ॥

मित्रश्चम इन्द्रश्चमे वरुणश्चम इन्द्रश्चमे ।

धाताचम इन्द्रश्चमे त्वष्टाचम इन्द्रश्चमे ।

मरुतश्चम इन्द्रश्चमे विश्वेचमे देवाइन्द्रश्चमे यज्ञेनकल्पन्ताम् ॥ २ ॥

पृथिवीचम इन्द्रश्चमेऽन्तरिक्षश्चम इन्द्रश्चमे ।

द्यौश्चमे इन्द्रश्चमे समाश्चम इन्द्रश्चमे ।

नक्षत्राणिचम इन्द्रश्चमे दिशश्चम इन्द्रश्चमे यज्ञेनकल्पन्ताम् ॥ ३ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

अꣳशुश्चमे रश्मिश्चमेऽदाभ्यश्चमेऽधिपतिश्चमे ।

उपाꣳशुश्चमेऽन्तर्यामश्चमऐन्द्रवा यवश्चमे मैत्रावरुणश्चमे ।

आश्विनश्चमे प्रतिप्रस्थानश्चमे शुक्रश्चमे-

मन्थीचमे यज्ञेनकल्पन्ताम् ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आग्रयणश्चमे वैश्वदेवश्चमे ध्रुवश्चमे वैश्वानरश्चमे ।

ऐन्द्राग्नश्चमे महावैश्वदेवश्चमे मरुत्वतीयाश्चमे निष्कैवल्यश्चमे ।

सावित्रश्चमे सारस्वतश्चमे पात्नीवतश्चमे-

हारियोजनश्चमे यज्ञेनकल्पन्ताम् ॥ २ ॥

स्रुचश्चमे चमसाश्चमे वायव्यानिचमे द्रोणकलशश्चमे ।

ग्रावाणश्चमेऽधिषवणेचमे पूतभृच्चम आधवनीयश्चमे ।

वेदिश्चमे बर्हिश्चमे स्वगाकारश्चमेऽवभृथश्चमे यज्ञेनकल्पन्ताम् ॥३॥

अग्निश्चमे घर्मश्चमेऽर्कश्चमे सूर्यश्चमे ।

प्राणश्चमेऽश्वमेधश्चमे पृथिवीचमेऽदितिश्चमे ।

दितिश्चमे द्यौश्चमेऽङ्गुलयः शाक्करयो दिशश्चमे-

यज्ञेन कल्पन्ताम ॥ ४ ॥

व्रतश्चम ऋतवश्चमे सँव्यत्सरश्चमे तपश्चमे ।

अहोरात्रे ऊर्वष्ठीवेबृहद्रथन्तरेचमे यज्ञेनकल्पन्ताम् ॥ ५ ॥ (७)

—०—

(अष्टमोऽनुवाकः ८)

एकाचमे तिस्रश्चमे तिस्रश्चमे पञ्चचमे पञ्चचमे-

सप्तचमे सप्तचमेनवचमे न वचम एकादशचमएकादश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चमेत्रयोंदशचमे त्रयोंदशचमे ।

पञ्चंदशचमे पञ्चं दशचमे सप्तदंशचमे-

सप्तदंशचमे नवंदशचमेनवंदशचम एकंविंशतिश्चम एकं-

विंशतिश्चमे त्रयोंविंशतिश्चमे त्रयोंविंशतिश्चमे ।

पञ्चंविंशतिश्चमे पञ्चंविंशतिश्चमे सप्तविंशतिश्चमे-

सप्तविंशतिश्चमे नवंविंशतिश्चमे नवंविंशतिश्च म-

एकंत्रिंशच्चम एकंत्रिंशच्चमे त्रयंस्त्रिंशच्चमे यज्ञेनंकल्पन्ताम् ॥ १ ॥

चतं स्रश्चमेऽष्टौ चंमेऽ ष्टौचंमे द्वादंशचमे द्वादंशचमे-

षोळंशचमे षोळंशचमे विंशति श्चंमे विंशतिश्चंमे-

चतुंर्विंशतिश्चमे चतुंर्विंशतिश्चमेऽष्टविंशतिश्चमेऽष्टाविंशतिश्चमे

द्वात्रिंशच्चंमे द्वात्रिंशच्चमे षट्त्रिंशश्चमे-

षट्त्रिंशच्चमे चत्वारि ंशच्चंमे चत्वारिंशच्चंमे-

चतुंश्चत्वारिंशच्चमे चतुंश्चत्वारिंशच्चमेऽष्टाचंत्वारिं-

शच्चमे यज्ञेनंकल्पन्ताम् ॥ २ ॥

त्र्यविश्चमे त्र्यवीचंमे दित्यवाट्चंमे दित्यौहीचंमे ।

पञ्चाविश्चमे पञ्चावीचंमे त्रिवत्सश्चंमे त्रिवत्साचंमे ।

तुर्यवाट्चंमे तुर्यौहीचमे यज्ञेनंकल्पन्ताम् ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पष्ठवाट्च॑मे पष्ठौहीच॑म उक्षाच॑मेवशाच॑मे ।
ऋष भश्च॑मे वेहच्च॑मेऽनड्वाᳬश्च॑मे धेनुश्च॑मे यज्ञेन॑कल्पाताम् ॥४॥ (८)

—०—

(नवमोऽनुवाकः ९)

वाजा॑य स्वाहा॑ प्रसवाय स्वाहा॑ऽपिजाय स्वाहा क्रत॑वे स्वाहा॑ ।
वस॑वे स्वाहा॑ऽहर्प॑तये स्वाहा॑ ।
अह्नैमुग्धाय स्वाहा॑ मुग्धाय॑ वैनᳬशिनाय स्वाहा॑ विनᳬशिन॑-
आन्त्यायनाय स्वाहान्त्या॑य भौवनाय स्वाहा भुव॑नस्यपत॑ये-
स्वाहाधिपतये स्वाहा॑ प्रजाप॑तये स्वाहा॑ ॥ १ ॥
इयन्ते राण्मित्राय॑ यन्ता॑सियम॑नः ।
ऊर्ज्जेत्वा वृष्ट्यैत्वा प्रजानान्त्वाधिपत्याय ॥ २ ॥
आयु॑र्यज्ञेन॑ यल्पताम्प्राणो यज्ञेन॑ कल्पताञ्चक्षु॑र्यज्ञेन-
कल्पताᳬ श्रोत्र॑ंय्यज्ञेन॑ कल्पताम् ।
वाग्यज्ञेन॑ कल्पताम्मनो॑ यज्ञेन॑ कल्पतामात्मा यज्ञेन-
कल्पताम्पृष्ठँय्यज्ञेन॑ कल्पताम् ।
ब्रह्म॑यज्ञेन॑ कल्पताँय्यज्ञो यज्ञे॑नकल्पताञ्ज्यो ति॑र्यज्ञेन॑ कल्पताᳬ-
स्व॑र्यज्ञेन॑ कल्पताम् ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तोमंश्च यजुंश्च ऋक्च सामंच बृहच्चंरथन्तरञ्चं ।
स्वंर्देवाः अगन्मामृताः अभूम प्रजापतेः प्रजा -
अंभूम वेट्र स्वाहा ॥ ४ ॥ (९)

इमंःस्तनन्द्वादश (१२) वाजश्चतस्रः (४) सत्यम् (४)
ऊक्चंच (४) अश्माचतिस्रः (३) द्वितीयोऽग्निश्च (३)
अंःशुःपञ्च (५) एकाच तस्रः (४) वाजायेतिच (४)
नवानुवाकेषु त्रयश्चत्वारिंःशत् (४३)
देवसवितरिमंःस्तनन्त्रयश्चत्वारिंःशत् (४३)

इति शुक्लयजुर्वेदकाण्वसँहितापाठेएको नविंशतितमोऽध्यायः (९)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

द्वितीयदशके दसमोऽध्यायः

(प्रथमोऽनुवाकः १)

वाजंस्यनु प्रंसवे मातरम्महीमदिंतिन्नाम वचंसा करामहे ।
यस्यामि दंव्विश्वम्भुवनमाविवेश तस्यान्नो-
देवस्संविता धर्मंसाविषक्‌ ॥ १ ॥
विश्वें अद्यमरुतो विश्वंऊती विश्वं भवन्त्वग्नयस्ससमिंद्धाः ।
विश्वेंनो देवा अवसागंमन्तु विश्वंभस्तु द्रविंणँव्वाजों अस्मे ॥ २ ॥
वाजों नस्सप्त प्रदिशश्चतंस्रोवा परावतंः ।
वाजोंनो विश्वैंर्देवैंर्धनंसाता इहावंतु ॥ ३ ॥
वाजोंनो अद्य प्रसुंवातिदा नँव्वाजों देवाँरऋतुभिंः कल्पयाति ।
वाजोहि मासवें वीरञ्चकार सर्वा आशा वाजंपतिर्भवेयम् ॥ ४ ॥
वाजंःपुरस्तादुतमंध्यतो नोव्वाजोंदेवान्हविषा वर्धयाति ।
वाजोहिमा सर्वंवीरञ्चकार विश्वा आशा वाजंपतिर्जयेयम् ॥ ५ ॥
सम्मांसृजा मिपयंसा पृथिव्यास्सम्मांसृजाम्यद्भिरोषंधीभिः ।
सोहँव्वाजंं सनेयमग्ने ॥ ६ ॥
पयंःपृथिव्याम्पय ओषंधीषु पयों दिव्यन्तरिंक्षे पयोंधाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पयंस्वतीः प्रदिशंस्सन्तु मह्यंम् ।

देवस्यंत्वा सवितुःप्रंसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ।

सरंस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्साम्राज्येनाभिषिञ्चामि ॥ ७ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

ऋताषाळृतधामाग्निर्गन्धर्वः ।

तस्यौषंधयोऽप्सरसो मुदोनाम ।

सनंइद मब्रह्मंक्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यस्स्वाहा ॥ १ ॥

सꣳहितो विश्वसामा सूर्यो गन्धर्वः ।

तस्यमरींचयोऽप्सरसं आयुवो नामं ।

सनं इदम्ब्रह्मं क्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यस्स्वाहा ॥ २ ॥

सुषुम्णस्सूर्यंरश्मिश्चन्द्रमा गुन्धर्वः ।

तस्य नक्षंत्राण्यप्सरसों भेकुरंयो नामं ।

सनं इदम्ब्रह्मं क्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यस्स्वाहा ॥ ३ ॥

इषिरो विश्वव्यंचा वातो गन्धर्वः ।

तस्यापो अप्सरस ऊर्जो नामं ।

सनं इदम्ब्रह्मं क्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यस्स्वाहा ॥ ४ ॥

भुज्युस्सुंपर्णो यज्ञो गन्धर्वः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य दक्षिणा अप्सरसंस्तावानामं ।

सनइ दम्ब्रह्म क्षत्रम्पातु तस्मै स्वाहावाट्ताभ्यस्स्वाहा ॥ ५ ॥

प्रजापंतिर्विश्वकंर्मामनो गन्धर्वः ॥

तस्यं ऋक्सामान्यंप्सरस एष्टंयो नामं ।

सनं इदम्ब्रह्म क्षत्रम्पातु तस्मै स्वाहा वाट्ताभ्यस्वाहा ॥ ६ ॥

सनो भुवनस्यपते प्रजापते यस्यंत उपरि गृहायस्यं वेह ।

अस्मै ब्रह्मणेऽस्मै क्षत्राय महिशर्मंयच्छ स्वाहा ॥ ७ ॥

समुद्रोऽसि नभंस्वानार्द्रदानुश्शम्भूर्मयोभूरभिमा वाहि स्वाहा ।

मारुतोऽसि मरुताङ्गणश्शम्भूर्मयोभूरभिमावाहि स्वाहा ॥

अवस्यूरंसिदुवंस्वाञ्छम्भूर्मयोभू रभिमावाहि स्वाहा ॥ ८ ॥

यास्ते अग्ने सूर्ये रुचो दिवंमातन्वन्ति रश्मिभिः ।

ताभिंनो अद्यसर्वाभी रुचेजनाय नस्कृधि ॥ ९ ॥

यावो देवास्सूर्ये रुचोगोष्व श्वेषु यारुचंः ॥

इन्द्राग्नी ताभिस्सर्वाभी रुचंन्नो धत्त बृहस्पते ॥ १० ॥

रुचंन्नो धेहि ब्राह्मणेषु रुचः राजंसुनस्कृधि ।

रुचंव्विश्येषु शूद्रेषु मयि धेहि रुचारुचंम् ॥ ११ ॥

तत्त्वायामि ब्रह्मणा वन्दंमानस्तदाशास्ते यजंमानो हविर्भिः ।

अहेळमानो वरुणेह बोध्युरुशंः समान आयुःप्रमोषीः ॥ १२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्ण घर्मस्स्वाहा स्वर्णार्कस्स्वाहा स्वर्णशुक्रस्स्वाहा ।

स्वर्णज्योतिस्स्वाहा स्वर्णसूर्यस्स्वाहा ॥ १२ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

अग्निंर्युनज्मि शवसा घृतेन दिव्यꣳसुपर्णव्वयसा बृहन्तम् ।

तेनंगमेम ब्रध्नस्य विष्टपꣳस्वोरुहाणा अधिनाकमुत्तमम् ॥ १ ॥

इमौतेपक्षाअजरौ पतत्रिणो याभ्याꣳरक्षाꣳस्यपहꣳस्यग्ने ।

ताभ्याम्पतेम सुकृतामुलोकँय्यत्र ऋषयो-

जग्मुः प्रथमजाः पुराणाः ॥ २ ॥

इन्दुर्दक्षःश्येन ऋतावा हिरण्यपक्षःशकुनो भुरण्युः ।

महान्त्सधस्थे ध्रुवआनिषत्तो नमस्ते अस्तु मामा हिꣳसीः ॥ ३ ॥

दिवो मूर्धासि पृथिव्यानाभि रूर्गपामोषधीनाम् ॥

विश्वायुश्शर्म सप्रथा नमस्पथे ॥ ४ ॥

विश्वस्य मूर्धन्नधितिष्ठ सिश्रितस्समुद्रे-

ते हृदयमप्स्वायुरपो दत्तो दधिम्भिन्त ।

दिवस्पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्याव ॥ ५ ॥

इष्टोयज्ञो भृगुभिराशीर्दा वसुभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यं न इष्टस्यं प्रीतस्य द्रविणेहागंमेः ॥ ६ ॥

इष्टो अग्निराहुंतः पिपर्तुन इष्टᳬहविः ।

स्वगेदन्देवेभ्यो नमः ७ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

यदाकूंतात्समसुंस्रो दृघृदो वामनंसो वासम्भृंतश्चक्षुषोवा ।

तदंनुप्रेतं सुकृतां मुलोकँय्यत्र ऋषंयो जग्मुःप्रंथमजाः पुंराणाः ॥ १ ॥

एतᳬ संधस्थ परिते ददामि यमावहाच्छे वधिज्ञातवेदाः ।

अन्वागन्ता यज्ञपंतिर्वो अत्रतᳬ स्मंजानीत परमे व्योमन् ॥ २ ॥

एतज्ञांनाथ परमे व्योमन्देवास्सधस्था विदरूपमंस्य ।

यदा गच्छात्पथिभिर्देवयानैंरिष्टापूर्ते कृणवथाऽऽविरंस्मै ॥ ३ ॥

उद्बुंध्यस्वाग्ने प्रतिजागृहि त्वमिष्टा पूर्ते सᳬसृंजेथा मयश्चं ।

अस्मिन्त्सधस्थे अध्युत्तंरास्मिन्विश्वे देवा यजंमानश्च सीदत ॥ ४ ॥

येनवहंसि सहस्रँय्येनाग्ने सर्व वेदसम् ।

तेनेमँय्यज्ञन्नों नयस्वंर्देवेषु गन्तंवे ॥ ५ ॥

प्रस्तरेणं परिधिना स्रुचा वेद्याच बर्हिषां ।

ऋचेमँय्यज्ञन्नों नयस्वंर्देवेषुगन्तंवे ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्दत्तँय्यत्परादानँय्यत्पूर्तंय्याश्चदक्षिणाः ।

तदग्निर्वैश्वकर्मणस्स्वर्देवेषु नोदधत् ॥ ७ ॥

यत्रधारा अनपेता मधोर्घृतस्य च याः ।

तदग्निर्वैश्वकर्मण स्स्वर्देवेषु नोदधत् ॥ ८ ॥

ये अग्नयः पाञ्चजन्या अ स्यां पृथिव्यामधि ।

तेषामसित्वमुत्तमः प्रनो जीवातवेसुव ॥ ९ ॥ (४)

—०—

चतुर्थोऽध्यायः (५)

वार्त्रहत्याय शवसे पृतनाषाह्यायच ।

इन्द्रत्वाऽऽवर्तयामसि ॥ १ ॥

सहदा नुम्पुरुहूत क्षियन्तमहस्तमिन्द्र सम्पिणक्कुणारुम् ।

अभि वृत्रँव्वर्धमानम्पियारु मपाद मिन्द्र तवसाजघन्थ ॥ २ ॥

विन इन्द्र मृधो जहिनीचायच्छ पृतन्य तः ।

यो अस्माँ२अभिदा सत्यधरञ्जमया तमः ॥ ३ ॥

मृगोन भीमः कुच रो गिरिष्ठाः परावत आजगन्था परस्याः ।

सृकꣳ सꣳशाय पविमिन्द्रतिग्मँव्वि शत्रून्ताढि विमृधो नुदस्व ॥ ४ ॥

वैश्वानरोन ऊतय आप्रयातु परावतः ।

अग्निर्नस्सुष्टुतीरुप ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्टो दिवि पृष्टो अग्निः पृथिव्याम्पृष्टो विश्वा ओषधी राविवेश ।

वैश्वानरस्सहसा पृष्टो अग्निस्सनोदिवा सरिषस्पातु नक्तम् ॥ ६ ॥

अश्यामतङ्कामंमग्ने तवोती अश्यामं रयिꣳरयिवस्सुवीरम् ॥

अश्याम वाजम भिवाजयन्तोऽश्यामं द्युम्नमंजराऽजरन्ते ॥ ७ ॥

वयन्ते अद्यररिमाहि काममुत्ता नहस्ता नमसोपसद्य ।

यजिष्ठेन मनसा यक्षिदेवानस्रेधतामन्मना विप्रो अग्ने ॥ ८ ॥

धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।

सचेतसो विश्वेदे वा यज्ञम्प्रावन्तुनःशुभे ॥ ९ ॥

त्वँय्यंविष्ठ दाशुषोनॄꣳःपाहि शृणुधी गिरः ।

रक्षा तोकमुतत्मना ॥ १० ॥ (५)

वाजस्यनुसप्त ॥ ७ ॥

ऋताषाट्त्रयोदश (१३) अग्निय्युनज्मिसप्त (७)

यदाकूतान्नव (९) वार्त्रहत्यायदश (१०)

पञ्चानुवाकेषुषट्चत्वारिꣳशत् (४६)

प्राणा वाजा होता यज्जा षट्चत्वारिꣳशत् ॥

इति शुक्ल यजुर्वेदकाण्वसंहितापाठे विंशोऽध्यायः (१०)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

अथ-एकविंशोऽध्यायः प्रथमोऽनुवाः

(प्रथमोऽनुवाकः १)

स्वाद्वींत्वा स्वादुना तीव्रांतीव्रेणामृताममृतेन ।
मधुमतीम्मधुम ता सृजामि सꣳ सोमेन ॥
सोमोऽस्यश्विभ्याम्पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥१॥
परीतोषिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः ।
दधन्वायो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥ २ ॥
वायोः पूतः पवित्रेण प्राङ्क्सोमो अतिद्रुतः ।
इन्द्रस्य युज्यः सखा ।
वायोः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिद्रुतः ।
इन्द्रस्य युज्यस्सखा ॥ ३ ॥
पुनातिते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता ।
वारेण शश्वता तना ॥ ४ ॥
ब्रह्म क्षत्रंपवते तेजं इन्द्रियꣳ सुरया सोमस्सुत आसुतो मदाय ।
शुक्रेण देव देवताः पिपृग्धि रसेनान्नंय जमानाय धेहि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुविदङ्गयवमन्तोयवंचिद्यथा दान्त्यनु पूर्वँव्वियूयं ।

इहे हैषांकृणुहि भोजनानि येबर्हिषो नम उक्तिन जग्मुः ।

उपयामगृहीतोऽस्य श्विभ्यंत्वा सरस्वत्यै त्वेन्द्रायत्वा सुत्राम्णे ।

एपते योनिस्तेजसेत्वा वीर्याय त्वाबलायत्वा ॥ ५ ॥

नानाहि वान्देवहितः सदस्कृतम्मासः संसृक्षाथाम्परमे व्योमन् ।

सुरा त्वमसि शुष्मिणो सोमएष मामा हिंसीस्स्वाँय्योनिमाविशन्ती ॥६॥

उपयामगृहीतोऽस्याश्विनन्तेजस्सारस्वतँव्वीर्यमैन्द्रम्बलम् ।

एपते योनिर्मोदायत्वाऽऽनन्दायत्वा महसेत्वा ॥ ७ ॥

तेजोऽसि तेजो मयि धेहि वीर्यमसि

वीर्यम्मयि धेहि बलमसि बलम्मयिधेह्योजोऽस्योजो मयि धेहि ।

मन्युरसिमन्युम्मयि धेहि सहोऽसि सहो मयि धेहि ॥ ८ ॥

या व्याघ्रव्विषूचिकोभौ वृकंच रक्षति ।

श्येनम्पतत्रिणंसिंहं सेमम्पात्वंहसः ॥ ९ ॥

यदापिपेष मातरम्पुत्रःप्रमुदितो धयन् ।

एतत्तदग्ने अनृणो भवाम्यहतौ पितरौ मया ॥ १० ॥

सम्पृचस्थसम्मा भद्रेण पृङ्क्त ।

विपृचस्थविमा पापेन पृङ्क्त ॥ ११ ॥ (१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रथमोऽनुवाकः २)

देवा यज्ञमंतन्वत भेषजं भिषजाश्विना ।
वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधंतः ॥ १ ॥
दीक्षायै रूपꣳ शष्पाणि प्रायणी यस्य तोक्मानि ।
क्रयस्यं रूपꣳ सोमस्य लाजाःसौमाꣳ शवो मधुं ॥ २ ॥
आतिथ्यरूपं मासरं महावीरस्यं नग्नहुः ।
रूपमुपसदामेतत्तिस्रो रात्रीस्सुरासुता ॥ ३ ॥
सोमस्य रूपङ्क्रीतस्यं परि स्रुत्परिषिच्यते ।
अश्विभ्यान्दुग्धम्भेषजमिन्द्रायेन्द्रꣳ सरस्वन्या ॥ ४ ॥
आसन्दी रूपꣳ राजाऽऽसन्द्यैवेद्यै कुम्भीसुराधानी ।
अन्तरउत्तरवेद्या रूपङ्कारोतरोभिषक् ॥ ५ ॥
वेद्या वेदिःस्समाप्यते बर्हिषा बर्हिरिन्द्रियम् ।
यूपेन यूपं आप्यते प्रणीतो अग्निरग्निना ॥ ६ ॥
हविर्धानꣳयदश्विनाग्नीध्रꣳयत्सरस्वती ।
इन्द्रायैन्द्रꣳ सदस्कृतम्पत्नी शालङ्गार्हपत्यः ॥ ७ ॥
प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्यं ।
प्रयाजेभिरनु याजान्वषट्कारेभिराहुतीः ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशुभिः पशूनाप्नोति पुरोळाशैं र्हवीꣳष्या ।

छन्दोभिस्सामिधेनीर्याज्याभिर्वषट्कारान् ॥ ९ ॥

धानाः करम्भस्सक्तं वः परीवापः पयो दधि ।

सोमस्य रूपꣳहविषं आमिक्षा वाजिनम्मधु ॥ १० ॥

धानानाꣳ रूपङ्कुवलम्परी वापस्य गोधूमाः ।

सक्तूनाꣳ रूपम्बदरमुपवाकाः करम्भस्य ॥ ११ ॥

पयसो रूपँय्यद्यवा दध्नो रूपङ्कर्कन्धूनि ।

सोमस्य रूपँव्वाजिनꣳ सौम्यस्य रूपमामिक्षा ॥ १२ ॥

आश्रावयेतिस्तोत्रियाः प्रत्याश्रावो अनुरूपः ।

यजेति धाय्या रूपम्प्रगाथायें यजामहाः ॥ १३ ॥

अर्धऋचैरुक्थानाꣳ रूपम्पदैराप्नोति निविदः ।

प्रणवैश्शस्त्राणाꣳ रूपम्पयसा सोमं आप्यते ॥ १४ ॥

अश्विभ्यांप्रातस्सवनमिन्द्रेणैन्द्रम्माध्यन्दिनम् ।

वैश्वदेवꣳ सरस्वत्या तृतीयमाप्तꣳ सवनम् ॥ १५ ॥

वायव्यै र्वायव्यान्याप्नोति सतेन द्रोणकलशम् ।

कुम्भीभ्यामम्भृणौसुते स्थालीभिस्थालीराप्नोति ॥ १६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यजुर्भिराप्यन्ते ग्रहाग्रहै स्तोमाश्च विष्टुतीः ।
छन्दोभिरुक्था शस्त्राणि साम्नावभृथ आप्यते ॥ १७ ॥
इळाभिर्भक्षानाप्नोति सूक्तवाकेनाशिषः ।
शँय्युना पत्नी सँय्याजान्त्समिष्ट यजुषा सꣳस्थाम् ॥ १८ ॥
व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ।
दक्षिणाश्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ १९ ॥
एतावद्रूपँय्यज्ञस्य यद्देवैर्ब्रह्मणा कृतम् ।
तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणी सुते ॥ २० ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

सुरावन्तम्बर्हिषदꣳ सुवीरँय्यज्ञꣳ हिन्वन्ति महिषा नमोभिः ।
दधानास्सो मन्दिवि देवतासु मदेमेन्द्रँय्यजमानास्स्वर्काः ॥ १ ॥
यस्ते रसस्सम्भृत ओषधीषु सोमस्य शुष्मस्सुरया सुतस्य ।
तेन जिन्व यजमानम्मदेन सरस्वतीम श्विना इन्द्रमग्निम् ।२ ॥
यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।
इमन्तꣳ शुक्रम्मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदत्रं रिप्तः रसिनंस्सुतस्य यदिन्द्रो अपिंबच्छचीभिः ।
अहन्तदंस्य मनंसा शिवेन सोमः राजानमिह भंक्षयामि ॥ ४ ॥

पितृभ्यंस्स्वधायिभ्यंस्स्वधानमंः पितामहेभ्यंस्स्वधायिभ्यंस्स्वधानमंः ।
प्रपिंतामहेभ्यस्स्वधायिभ्यंस्स्वधानमंः ॥ ५ ॥

अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः ।
पितंरः शुन्धंध्वम् ॥ ६ ॥

पुनन्तुंमा पितरंस्सोम्यासंः पुनन्तुंमा पितामहाः पुनन्तु प्रपिंतामहाः ।
पवित्रेंण शतायुंषा ॥ ७ ॥

पुनन्तुंमा पितामहाः पुनन्तु प्रपिंतामहाः ।
पवित्रेंण शतायुंषा विश्वमायुर्व्यंश्नवै ॥ ८ ॥

अग्न आयूंषि पवस आसुवोर्जमिषंञ्चनः ।
आरेबाधस्व दुच्छुनाम् ॥ ९ ॥

पुनन्तुंमा देवजनाः पुनन्तु मनंसाधियंः ।
पुनन्तुविश्वा भूतानि जातंवेदः पुनीहिमा ॥ १० ॥

पवित्रेंण पुनीहिमा शुक्रेंणदेव दीद्यंत् ।
अग्ने क्रत्वा क्रतूं रनुं ॥ ११ ॥

यत्ते पवित्रंमर्चिष्यग्नेवितंतमन्तरा ।
ब्रह्मतेनंपुनातुमा ॥ १२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पवमानस्सो अद्यनः पवित्रेण विचर्षणिः ।
यः पोता सपुनातुमा ॥ १३ ॥

उभाभ्यान्देव सवितः पवित्रेण सवेनंच ।
माम्पुं नीहि विश्वतः ॥ १४ ॥

वैश्वदेवी पुंनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तस्सधमादेषु वयꣳस्याम पतयोरयीणाम् ॥ १५ ॥

येसमानास्समनसः पितरो यमराज्ये ।
तेषाँल्लोकस्स्वधानमो यज्ञो देवेषु कल्पताम् ॥ १६ ॥

ये समानास्समनसो जीवा जीवेषु मामकाः ।
तेषाꣳ श्रीर्मयि कल्पता मस्मिँल्लोके शतꣳ समाः ॥ १७ ॥

द्वेसृती अश्रृणवम्पितृणामहन्देवानामुतमर्त्यानाम् ।
ताभ्यामिदँव्विश्वमेजत्समेति यदन्तरा पितरम्मातरञ्च ॥ १८ ॥

इदꣳहविः प्रजननम्मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यं भयसनि ।
अग्निःप्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतो अस्मासुधत्त ॥ १९ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

उदीरता मवर उत्परा स उन्मध्यमाः पितरस्सोम्यासः ।
असुँय्य ईयुर वृका ऋतज्ञास्तेनोऽवन्तु पितरो हवेषु ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वꣳसोम प्रचिकितो मनीषात्वꣳरजिष्ठ मनुनेषिपन्थाम् ।
तवप्रणीती पितरो न इन्दोदेवेषु रत्नमभजन्तधीराः ॥ २ ॥
त्वया हिनः पितरस्सोम पूर्वे कर्माणि चक्रुःपवमान धीराः ।
वन्वन्नवातः परिधीꣳरपोर्णु वीरेभिरश्वैर्मघवा भवानः ॥ ३ ॥
त्वꣳसोम पितृभिस्सँव्विदानोऽनुद्यावापृथिवी आततन्थ ।
तस्मै तइन्दो हविषा विधेम वयꣳस्याम पतयो रयीणाम् ॥ ४ ॥
बर्हिषदःपितर ऊत्यर्वागिमा वोहव्या चकृमाजुषध्वम् ।
त आगताऽवसा शन्तमेनाथा नश्शँय्योररपो दधात ॥ ५ ॥
उपहूताः पितरस्सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आगमन्तुत इह श्रुवन्त्वधिब्रुवन्तुतेऽवन्त्वस्मान् ॥ ६ ॥
आहाम्पितॄन्त्सु विदत्राꣳअवित्सिन पातञ्च विक्रमणञ्च विष्णोः ।
बर्हिषदोये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ ७ ॥
अग्निष्वात्ताःपितर एहगच्छत सदस्सदस्सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरन्दधातन ॥ ८ ॥
आयन्तुनः पितरस्सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन्यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ ९ ॥
येअग्निष्वात्ता ये अनग्निष्वात्ता मध्ये दिवस्स्वधया मादयन्ते ।
तेभ्यस्स्वराळसुनी तिमेतौय्यथा वशन्तन्वङ्कल्पयाति ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निष्वात्ता नृतुमतो हवामहे नारा शꣳसेसोम पीथँय्यआशुः ।
तेनो विप्रासस्सुहवा भवन्तु वयꣳस्याम पतयोर यीणाम् ॥ ११ ॥

आच्या जानुं दक्षिणतो निषद्येमंय्यज्ञमभिगृणीत विश्वे ।
माहिꣳ सिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥ १२ ॥

आसीनासो अरुणीनामुपस्थे रयिन्धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छन्त इहोर्जन्दधात ॥ १३ ॥

यमग्ने कव्यवाह नत्वञ्चिन्मन्यसेरयिम् ।
तन्नो गीर्भिः श्रवाय्यन्देवत्रा पनया युजम् ॥ १४ ॥

यो अग्निः कव्यवाहनः पितॄन्यक्ष दृता वृधः ।
प्रेदुहव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥ १५ ॥

त्वमग्न ईळितो जातवेदोऽवाव्यानि सुरभीणि कृत्वी ।
प्रादाःपितृभ्यस्स्वधया ते अक्षन्नद्धि त्वन्देव प्रयता हवीꣳषि ॥ १६ ॥

इदम्पितृभ्यो नमो अस्त्वद्यये पूर्वासो य उपरासईयुः ।
ये पार्थिवे रजस्या निषत्तायेवा नूनꣳ सुवृजना सुविक्षु ॥ १७ ॥

ये चेह पितरो ये चनेह याꣳश्च विद्मयाँ२उ चनप्र विद्म ॥
त्वँवेत्थ यतिते जातवेदस्स्वधाभिर्यज्ञꣳ सुकृतन्जुषस्व ॥ १८ ॥

अधायथानः पितरः परासः प्रत्नासो अग्नऋतमाशुषाणाः ॥
शुचीदयन्दीधिं तिमुक्थ शासःक्षामाभिन्दन्तो अरुणीरपव्रन् ॥ १९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उशन्तंस्त्वा निधीम ह्युशन्तस्समिधीमहि ।
उशन्नुं शत आवंह पितॄन्हविषे अत्तवे ॥ २० ॥
अपाम्फेनेन नमुचेश्शिरं इन्द्रोदंवर्तयः ।
विश्वायदजंयस्पृधंः ॥ २१ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

सोमो राजाऽमृतंः सुतऋ जीषेणाजहान्मृत्युम् ।
ऋतेनं सत्यमिन्द्रियँव्विपानंः शुक्रमन्धंस-
इन्द्रंस्येन्द्रियमिदम्पयोऽमृतम्मधुं ॥ १ ॥
अद्भ्यः क्षीरँव्व्यंपिव त्क्रुङ्ङाङ्गिरसो धिया ।
ऋतेनं सत्यमिन्द्रियँ व्विपानंःशुक्रमन्धं स-
इन्द्रंस्येन्द्रियमिदम्पयोऽमृतम्मधुं ।
सोमं मद्भ्यो व्यंपिब च्छन्दंसा हंःसःशुंचिषत् ॥
ऋतेनं सत्यमिन्द्रियँव्विपानंः शुक्रमन्धंस-
इन्द्रंस्येन्द्रि यमिदम्पयोऽमृतम्मधुं ।
अन्नात्परि स्रुतो रसम्ब्रह्मणा व्यंपिबत्क्षत्रम्पयस्सो मंम्प्रजापंतिः ।
ऋतेनं सत्यमिन्द्रियँव्विपानंः शुक्रमन्धंस-
इन्द्रंस्येन्द्रियमिदम्पयोऽमृतम्मधुं ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेतो मूत्रँव्विजंहाति योनिंम्प्रविशदिंन्द्रियम् ।
गर्भों जरायुणाऽऽवृंत उल्वंञ्जहाति जन्मंना ।
ऋतेनं सत्यमिंन्द्रियँव्विपानंꣳ शुक्रमन्धंस-
इन्द्रंस्येन्द्रियमिदम्पयोऽमृतम्मधुं ॥ ३ ॥
दृष्ट्वा रूपे व्याकंरोत्सत्याऽनृते प्रजापंतिः ।
अश्रंद्धा मनृतेऽदंधाच्छ्द्धाꣳ सत्ये प्रजापंतिः ।
ऋतेनं सत्य मिंन्द्रियँव्विपानंꣳ शुक्रमन्धंस-
इन्द्रंस्येन्द्रियमिदम्पयोऽमृतम्मधुं ॥ ४ ॥
वेदैं न रूपे व्यंपिबत्सुता सुतौ प्रजापंतिः ।
ऋतेनं सत्यमिंन्द्रियँव्विपानंꣳ शुक्रमन्धंस-
इन्द्रंस्येन्द्रियमिदम्पयोऽमृतम्मधुं ।
दृष्ट्वा पंरिस्रुतो रसंꣳ शुक्रेणं शुक्रँव्व्यं पिबत्पयस्सोमंम्प्रजापंतिः ।
ऋतेनं सत्यमिंन्द्रियँव्विपानंꣳ शुक्रमन्धंस-
इन्द्रंस्ये न्द्रियमिदम्पयोऽमृतम्मधुं ॥ ५ ॥ (५)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(षष्ठोऽनुवाकः ६)

सीसेंनतन्त्रम्मनंसामनीषिणंऊर्णासूत्रेणंकवयोवयन्ति ।

अश्विनायज्ञꣳसंवितासरंस्वतीन्द्रंस्यरूपँव्वरुणो भिषज्यन् ॥ १ ॥

तदंस्य रूपममृतꣳ शचीभिस्तिस्रोदंधु र्देवतास्सꣳ रराणाः ।

लोमानि शष्पैर्वहुधानतोक्मंभिस्त्व गंस्य माꣳ समंभव न्नलाजाः ॥२॥

तदश्विना भिषजारुद्रवंर्तनी सरंस्वती वयति पेशो अन्तरम् ।

अस्थिमज्जा नम्मासंरैः कारोतरेण दधंतो गवान्त्वचि ॥ ३ ॥

सरंस्वती मनंसा पेशलँव्वसुनासंत्याभ्याँव्वयति दर्शतँव्वपुः ।

रसम्परिस्रुता नरोहिंतन्नग्नहुर्धीर स्तसंरन्नवेमं ॥ ४ ॥

पयंसा शुक्रममृतंञ्जनित्रꣳ सुरंया मूत्राज्जनयन्त रेतंः ।

अपामंतिन्दुर्मतिम्बाधंमाना ऊवंध्यँव्वातꣳ सव्वन्तदारात् ॥ ५ ॥

इन्द्रंस्सुत्रा माहृदंयेन सत्यम्पुंरोळाशेंन सविता जंजान ।

यकृंत्क्लोमानँव्वरुंणोभिषज्यन्म तंस्ने वायव्यै र्नमिंनाति पित्तम् ॥ ६ ॥

आन्त्राणिं स्थालीर्मधु पिन्वंमाना गुदाः पात्राणि सुदुघान धेनुः ।

श्येनस्य पत्रन्नप्लीहा शाचीभिरासन्दीनाभिंरुदरन्न माता ॥ ७ ॥

कुम्भो वंनिष्ठुर्जंनिता शचीभिर्यस्मिन्नग्रे योन्यागर्भो अन्तः ।

प्लाशिर्व्यक्तश्शतधार उत्सोदुहेन कुम्भी स्वधाम्पतृभ्यंः ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखꣳ सदस्यशिर इत्सतेन जिह्वापवित्रमश्विनाऽऽसन्त्सरस्वती ।
चप्पन्न पायुर्भिषगस्य बालो वस्तिन शेपो हरसा तरस्वी ॥ ९ ॥
अश्विभ्याश्चक्षुरमृतङ्ग्रहाभ्याञ्छागेन तेजो हविषा शृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि पेशोन शुक्रमसि तँव्वसा ते ॥ १० ॥
अविर्न मेषो नसिवीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानन्नस्यानि बर्हिर्बदरैर्जजान ॥ ११ ॥
इन्द्रस्य रूपमृषभो बलाय कर्णाभ्याꣳ श्रोत्रममृतङ्ग्रहाभ्याम् ।
यबान बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघम्मुखात् ॥ १२ ॥
आत्मन्नुपस्थे न वृकस्य लोम मुखे श्म श्रूणि नव्याघ्रलोम ।
केशान शीर्ष न्यशसे श्रियै शिखा सिꣳहस्य-
लोमत्वि पिरिन्द्रियाणि ॥ १३ ॥
अङ्गान्यात्मन्भिषजा तदश्विनाऽऽत्मानमङ्गैस्समधात्सरं स्वती ।
इन्द्रस्यरूपꣳशतमानमायुश्चन्द्रेण ज्योतिरमृतन्दधानाः ॥ १४ ॥
सरस्वती योन्याङ्गर्भमन्तरश्विभ्याम्पत्नी सुकृतम्बिभर्ति ।
अपाꣳ रसेन वरुणो न साम्नेन्द्रꣳ श्रियै जनयन्नप्सुराजा ॥ १५ ॥
तेजैःपशूनाꣳ हविरिन्द्रियावत्परिस्रुता पयसा सारघम्मधु ।
अश्विभ्यान्दुग्ध म्भिषजा सरस्वत्यासुता सुताभ्या-
ममृतस्सोम इन्दुः ॥ १६ ॥ (६)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(सप्तमोऽनुवाकः ७)

क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि ।

मात्वाहिंसीन्मामा हिंसीः ।

निषसाद धृतव्रतो वरुणःपस्त्यास्वा ।

साम्राज्याय सुक्रतुः ।

मृत्योःपाहि विद्योत्पाहि ।

देवस्यत्वा सवितुःप्रसवेऽश्विनो र्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ १ ॥

अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसा याभिषिञ्चामि सरस्वत्यै-

र्भैषज्येन वीर्यायान्नाद्यायाऽभिषिञ्चामि ।

इन्द्रस्येन्द्रियेण बलायश्रियै यशसेऽभिषिञ्चामि ॥ २ ॥

कोऽसि कतमोऽसि कस्मै त्वा कायत्वा ।

सुश्लोक सुमङ्गल सत्यराजन् ॥ ३ ॥

शिरोमे श्रीर्यशो मुखान्त्विषिः केशाश्चश्मश्रूणि ।

राजा मे प्राणो अमृतंसम्राड्चक्षुर्विराड्श्रोत्रम् ॥ ४ ॥

जिह्वा मे भद्रं वाड्महोमनो मन्युस्स्वराड्भामः ।

मोदाः प्रमोदा अङ्गुली रङ्गानि मित्रम्मे सहः ॥ ५ ॥

बाहूमे बलमिन्द्रियꣳ हस्तौ मे कर्म वीर्यम् ।

आत्मा क्षत्रमुरो मम ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्टी में राष्ट्रमुदरमꣳ सौं ग्रीवाश्च श्रोणीं ।
ऊरू अंरत्नी जानुंनी विशोमेऽङ्गानिसर्वतः ॥ ७ ॥
नाभिंर्मे चित्तँव्विज्ञानंम्पायुर्मेऽपंचितिर्भसत् ।
आनन्दनन्दा आण्डौमे भगस्सौभाग्यम्पसंः ॥ ८ ॥
जङ्घाभ्याम्पद्भ्यान्धर्मोऽस्मि विशिराजा प्रतिष्ठितः ।
प्रतिं क्षत्रे प्रतिंतिष्ठामि राष्ट्रेप्रत्यश्वेषु प्रतिंतिष्ठामि गोपुं ॥ ९ ॥
प्रत्यङ्गेषु प्रतिंतिष्ठाम्यात्मन्प्रतिं प्राणेषुप्रतिं तिष्ठामि पुष्टे ।
प्रतिद्यावा पृथिव्योःप्रतिं तिष्ठामि यज्ञे ॥ १० ॥
त्रयादेवा एकादश त्रयस्त्रिꣳशास्सुराधंसः ।
बृहस्पतिं पुरोहिता देवस्यं सवितुस्सवे ।
देवादेवै रंवन्तुमा ॥ ११ ॥
प्रथमा द्वितीयैं र्द्वितीया स्तृतीयैं स्तृतीया स्सत्येनं ।
सत्यँय्यज्ञेनं यज्ञो यजुंर्भि यजूꣳषि सामंभिः ॥ १२ ॥
सामान्यृग्भिर्ऋचंःपुरोऽनु वाक्याभि पुरोऽनुवाक्या-
याज्याभिर्याज्या वषट्कारैः ।
वषट्कारा आहुंतिःभिराहुंतयो मे कामान्त्समंध-
यन्तु भूस्स्वाहा ॥ १३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोमानि प्रयंतिर्मम॒त्वङ्म आनंति रागतिः ।
मा॑ꣳसम्म उपंनतिर्वं स्वर्स्थिमज्जाम आनंतिः ॥ १४ ॥ (७)

स्वाद्वीन्त्वैकादश (११) देवायज्ञँविंशतिः (२०) सुरान्तमे-कोनविंशतिः (१९) उदीरतामेकविंशतिः (२१) सोमोरा-जापश्च (५) सीसेनतन्त्रं षोळश (१६) क्षत्रस्यनाभिश्चतुदश (१४) सप्तानुवाकेषु षड्त्तरशतम् (१०६)

इति शुक्लयजुर्वेद काण्व सँहिता पाठे एवविंशोऽध्यायः ॥ (२१)

—o—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ-द्वाविंशोऽध्यायः

(प्रथमोऽनुवाकः १)

यद्देवा देव हेळनन्देवा सश्चकृमा वयम् ।
अग्निर्मातस्मा देनंसो विश्वान्मुञ्च त्वꣳहंसः ॥ १ ॥
यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ।
वायुर्मा तस्मा देनंसो विश्वान्मुञ्च त्वꣳ हंसः ॥ २ ॥
यदि जाग्रद्यदि स्वप्न एनाꣳसि चकृमा वयम् ।
सूर्यो मातस्मा देनंसो विश्वान्मुञ्च त्वꣳहंसः ॥ ३ ॥
यद्ग्रामे यदरंण्ये यत्सभायाँ यदिंन्द्रिये ।
यच्छूद्रे यदर्ये यदेनंश्च कृमावयम् ।
यदेकस्याधि धर्मंणि तस्याऽवयजं नमसि ।
यदापो अघ्न्या इति वरुणे तिशपा महे ततो वरुणनो मुञ्च ।
अवंभृथ निचुम्पुण निचे रुरंसि निचुम्पुण ।
अवंदेवैर्देव कृंतमेनोऽयक्ष्य वमर्त्यैर्मर्त्यै-
कृतम्पुरु राव्णो देवरि षस्पाहि ॥
समुद्रे ते हृदंयमप्स्वन्तस्सन्त्वा विशन्त्वोषंधी रुतापः ।
सुमित्रियान आप ओषं धयस्सन्तु दुर्मित्रिया स्तस्मै सन्तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योऽस्मान्द्वेष्टियञ्च वयन्द्विष्मः ॥ ४ ॥

द्रुपदा दिवमुमुचान स्स्विन्नस्स्नातो मलादिव ।

पूतम्पवित्रेणेवाज्य मापश्शुन्धन्तु मैनसः ॥ ५ ॥

उद्व यन्तमं सस्परि स्वःपश्यन्त उत्तरम् ।

देवन्देवत्रासूर्य मगन्मज्योतिरुत्तमम् ॥ ६ ॥

अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि ।

पयस्वानग्न आगमन्त म्मासꣳ सृज वर्चसा प्रजयाचधनेनच ।

एधोऽस्ये धिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥ ७ ॥

समाववर्ति पृथिवी समुषा स्समु सूर्यः ।

समु विश्वमिदञ्जगत् ।

वैश्वानर ज्योतिर्भूयासँ व्विभून्कामान्व्यश्नवै भूस्स्वाहा ॥ ८ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।

व्रतञ्च श्रद्धाञ्चोपैमीन्धेत्वा दीक्षितो अहम् ॥ १ ॥

यत्र ब्रह्म चक्षत्रञ्च सम्यञ्चौ चरतस्सह ।

तँल्लोकम्पुण्यम्प्रज्ञेषँय्यत्र देवास्सहाग्निना ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतस्सह ।
तंल्लोकम्पुण्यम्प्रज्ञेषँय्यत्र सेदिर्न विद्यते ॥ ३ ॥
अ॑ꣳशुनाते अ॑ꣳशुः पृंच्यताम्परुंषापरुः ॥
गन्धस्ते सोमंमवतु मदाय रसो अच्युंतः ॥ ४ ॥
सिञ्चन्ति परिंषिञ्चन्त्युत्सिञ्चन्ति पुनन्तिंच ।
सुरायै बभ्रवै मदे किन्त्वो वंदति किन्त्वः ॥ ५ ॥
धानावंन्तङ्करम्भिणंमपूपवंन्तमुक्थिनंम् ।
इन्द्रं प्रातर्जुषस्वनः ॥ ६ ॥
बृहदिन्द्राय गायत मरुंतो वृत्रहन्तंमम् ।
येन ज्योतिरजं नयन्नृता वृधो देवन्देवाय जागृंवि ॥ ७ ॥
अध्वंर्यो अद्रिंभिस्सुतꣳ सोमंम्पवित्रआनंय ।
पुनीहीन्द्राय पातंवे ॥ ८ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

यो भूतानामधिंपतिर्यास्मिँल्लोका अधिंश्रिताः ।
यईशे महतो महाꣳस्तेनं गृह्णामि त्वामहम् मयिंगृह्णामित्वामहं ॥ १ ॥
उपयामगृंहीतोऽस्यश्विभ्यान्त्वा सरंस्वत्यै त्वेन्द्रायत्वा सुत्राम्णे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एषते योनिंरश्विभ्यान्त्वा सरंस्वत्यै त्वेन्द्रायत्वा सुत्राम्णे ॥ २ ॥

प्राणपामें अपानपाश्चक्षुष्पाः श्रोत्रपाश्चमे ।

वाचोमें विश्वभैषजोमनं सोऽसि विलायंकः ॥ ३ ॥

अश्विनंकृतस्यते सरंस्वति कृतस्येन्द्रेंण सुत्राम्णाकृतस्यं ॥

उपंहूतस्य भक्षयामि ॥ ४ ॥ (३)

—•—

(चतुर्थोऽनुवाकः ४)

समिंद्ध इन्द्रं उषसामनींके पुरोरुचा पूर्वकृद्वावृधानः ।

त्रिभिर्देवैस्त्रिंशता वज्रंबाहुर्जघानं वृत्रँव्विदुरों ववार ॥ १ ॥

नराशंसःप्रति शूरो मिमानस्तनूनपात्प्रतिं यज्ञस्यधामं ।

गोभिंर्वपावान्मधुंना समञ्जन् हिरंण्यैश्चन्द्री यंजति प्रचैताः ॥ २ ॥

ईळितो देवैर्हरिंवाँ २अभिष्टिराजुह्वानोहविषाशर्द्धमानः ।

पुरन्दरोगों त्रभिद्वज्रंबाहुरायातु यज्ञमुपंनो जुषाणः ॥ ३ ॥

जुषाणो बर्हिर्हरिंवान्न इन्द्रंः प्राचीनंः सीदत्प्रदिशा पृथिव्याः ।

उरुप्रथाः प्रथंमानंः स्योनमादित्यैरक्तँव्वसुं भिस्सजोषाः ॥ ४ ॥

इन्द्रन्दुरंः कवष्यो धावंमाना वृषाणँय्यन्तु जनंयस्सुपत्नीः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वारो देवीरभितो विश्रयन्ताꣳसुवीरा वीरम्प्रथमानामहोभिः ॥ ५ ॥

उषासानक्ता बृहती बृहन्तम्पयस्वती सुदुघेशूरमिन्द्रम् ।

तन्तुन्ततम्पेशसा संव्वयन्ती देवानान्देवँय्यजतस्सुरुक्मे ॥ ६ ॥

दैव्या मिमानामनुषः पुरुत्रा होतारा इन्द्रम्प्रथमा सुवाचा ।

मूर्धन्यज्ञस्य मधुना दधाना प्राचीनञ्ज्योतिर्हविषा वृधातः ॥ ७ ॥

तिस्रो देवीर्हविषा वर्धमाना इन्द्रञ्जुषाणा जनयो नपत्नीः ।

अच्छिन्नन्तन्तुम्पयसा सरस्वतीळा देवीभारती विश्वतूर्तिः ॥ ८ ॥

त्वष्टा दधच्छुष्ममिन्द्राय वृष्णेऽपाकोऽचिष्टुर्यशसेपुरूणि ।

वृषा यजन्वृषणम्भूरिरेता मूर्धन्यज्ञस्य समन क्तु देवान् ॥ ९ ॥

वनस्पतिरवसृष्टो नपाशैस्त्मन्या समञ्जञ्छमितानदेवः ।

इन्द्रस्य हव्यैर्जठरम्पृणानस्स्वदातियज्ञम्मधुनाघृतेन ॥ १० ॥

स्तोकानामिन्दुम्प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।

घृतप्रुषा मनसामोदमानास्स्वाहा देवा अमृतामादयन्ताम् ॥ ११ ॥ (४)

—०—

(पंचमोऽनुवाकः ५)

आयात्विन्द्रोवस उपन इहस्तुतस्स धमादस्तु शूरः ।

वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्नक्षत्र मभिभूति पुष्यात् ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आन इन्द्रौदूरादान आसादभिष्टि कृदवसे यासदुग्रः ।

ओजिष्ठेभिर्नृपतिर्वज्रबाहुस्सङ्गे समत्सु तुर्वणिःपृतन्यून् ॥ २ ॥

आन इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसेच ।

तिष्ठाति वज्री मघवाविरप्शीमँय्यज्ञमनु नोवाजसातौ ॥ ३ ॥

त्रातारमिन्द्रमवितारमिन्द्रः हवेहवेसुह वः शूरमिन्द्रम् ।

ह्वयामि शक्रम्पुरुहूतमिन्द्रः स्वस्तिनो मघवा धात्विन्द्रः ॥ ४ ॥

इन्द्रस्सुत्रामा स्ववाँ२अवोभिस्सुमृळीको भवतु विश्ववेदाः ।

बाधतान्द्वेषो अभयङ्कृणोतु सुवीर्यस्य पतयस्स्याम ॥ ५ ॥

तस्य वयः सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।

स सुत्रामा स्ववाँ२इन्द्रो अस्मेआराच्चिद्द्वेषस्सनुतर्युयोतु ॥ ६ ॥

आमन्द्रैरिन्द्रहरिभिर्याहि मयूररोमभिः ।

मात्वाकेचिन्नियमन्वि न्नपाशिनोति धन्वे वताँ२इहि ॥ ७ ॥

एवेदिन्द्रव्वृषणव्वज्रबाहुव्वसिष्ठासोअभ्यर्चन्त्यर्कैः ।

सनस्तुतो वीरवद्धातु गोमद्यूयम्पातस्वस्तिभिस्सदानः ॥ ८ ॥ (५)

—०—

षष्ठोऽनुवाकः ६)

समिद्धो अग्निरश्विना तप्तो घर्मो विराट्सुतः ।

दुहे धेनुस्सरस्वती सोमः शुक्रमिहेन्द्रियम् ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तनूपा भिषजा सुतेऽश्विनोभा सरस्वती ।
मध्वारजांसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥ २ ॥
इन्द्रायेन्दुꣳ सरस्वती नराशꣳसेन नग्नहुम् ।
अधातामश्विना मधु भेषजम्भिषजा सुते ॥ ३ ॥
आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् ।
इळाभिरश्विना इषꣳसमूर्जꣳसꣳरयिन्दधुः ॥ ४ ॥
अश्विनानमुचेस्सुतꣳ सोमꣳशुक्रम्परिस्रुता ।
सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे ॥ ५ ॥
कवष्यो नव्यचस्वतीरश्विभ्यान्नदुरो दिशः ।
इन्द्रोन रोदसी उभेदुहे कामान्त्स रस्वती ॥ ६ ॥
उषासानक्तमश्विनादिवेन्द्रꣳसायमिन्द्रियैः ।
सञ्जानाने सुपेशसा समञ्जाते सरस्वत्या ॥ ७ ॥
पातन्नो अश्विनादिवा पाहि नक्तꣳसरस्वती ।
दैव्या होतारा भिषजा पातमिन्द्रꣳ सचासुते ॥ ८ ॥
तिस्रस्त्रेधा सरस्वत्यश्विना भारतीळा ।
तीव्रम्परिस्रुता सोममिन्द्राय सुषुवुर्मदम् ॥ ९ ॥
अश्विना भेषजम्मधु भेषजन्नस्सरस्वती ।
इन्द्रे त्वष्टा यशः श्रियꣳ रूपꣳ रूपमधुस्सुते ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋतुथेन्द्रो वनस्पतिंश्शशमानःपंरिस्रुता ।

कीलालंमश्विभ्याम्मधुं दुहे धेनुस्सरं स्वती ॥ ११ ॥

गोभिर्न सोमंमश्विना मासंरेण परिस्रुता ।

समंधातꣳ सरंस्वत्या स्वाहेन्द्रे सुतम्मधुं ॥ १२ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

अश्विना हविरिंन्द्रियन्नमुंचेर्धिया सरंस्वती ।

आशुक्रमासुराद्वसुंमघमिन्द्राय जभ्रिरे ॥ १ ॥

यमश्विना सरंस्वती हविषेन्द्रमवंर्द्धयन् ।

सबिंभेदबलम्मघन्नमुंचा आसुरे सचा ॥ २ ॥

तमिन्द्रंम्पशवस्सचाश्विनोभा सरंस्वती ।

दधाना अभ्यंनूषत हविषा यज्ञ इंन्द्रियैः ॥ ३ ॥

य इन्द्रं इन्द्रियन्दधुस्संविता वरुंणो भगः ।

स सुत्रामा हविष्पंतिर्यजंमानाय सश्चत ॥ ४ ॥

सविता वरुंणो दधद्यजंमानाय दाशुषें ।

आदंत्तनमुंचेर्वसुं सुत्रामा बलंमिन्द्रियम् ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरुंणःक्षत्रमिंन्द्रियम्भगेंन सविता श्रियंम् ।
सुत्रामा यशंसा बलन्दधाना यज्ञमांशत ॥ ६ ॥

अश्विना गोभिंरिन्द्रिय मश्वेंभिर्वीर्यम्बलंम् ।
हविषेन्द्रꣳ सरंस्वती यजंमानमवर्द्धयन् ॥ ७ ॥

ताना संत्या सुपेशसा हिरंण्य वर्तनी नरा ।
सरस्वती हविष्मतीन्द्र कर्मसु नोऽवत ॥ ८ ॥

ताभिषजा सुकर्मंणा सासुदुघा सरंस्वती ।
सवृंत्रहा शतक्रंतुरिन्द्राय दधुरिन्द्रियम् ॥ ९ ॥

युवꣳ सुराममश्विना नमुंचा आसुरे सचा ।
विपिपानास्संरस्वतीन्द्रङ्कर्मस्वावत ॥ १० ॥

पुत्रमिंव पितरा आश्विनो भेन्द्रावथुःकाव्यैर्दꣳसनाभिः ।
यत्सुरामँव्व्यपिंबश्शचीभिस्सरंस्वती त्वामघवन्नभिष्णक् ॥ ११ ॥

यस्मिन्नश्वास ऋषभासंउक्षणों वशामेषा अंवसृष्टास आहुंताः ।
कीलालपेसो मंपृष्ठाय वेधसे हृदामतिञ्जनयचारुंमग्नयें ॥ १२ ॥

अहाव्यग्ने हविरास्यैंते स्रुचीवघृतञ्चम्वींव सोमंः ।
वाजसनिꣳ रयिमस्मे सुवीरंम्प्रशस्तन्धेंहियशसंम्बृहन्तंम् ॥ १३ ॥ (७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अष्टमोऽनुवाकः ८)

अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् ।

वाचेन्द्रो बलेनेन्द्रायद धुरिन्द्रियम् ॥ १ ॥

गोमदूषुणा सत्याश्वावद्यातमश्विना ।

वर्त्तीरुद्रानृपाय्यम् ॥ २ ॥

नयत्परोनान्तर आदधर्षद्वृषण्वसू ।

दुश्शः सोमत्योरिपुः ॥ ३ ॥

तान आवोंहूळमश्विना रयिम्पिशङ्ग सन्दृशम् ।

धिष्ण्यावरिवोविदम् ॥ ४ ॥

पावकानस्सरस्वती वाजेभिर्वाजिनीवती ।

यज्ञंव्वष्टुधियावसुः ॥ ५ ॥

चोदयित्री सूनृतानाञ्चेतन्ती सुमतीनाम् ।

यज्ञन्दधे सरस्वती ॥ ६ ॥

महो अर्णस्सरस्वती प्रचेतयति केतुना ।

धियो विश्वा विराजति ॥ ७ ॥

इन्द्रायाहि चित्रभानो सुता इमे त्वायवः ।

अण्वीभिस्तना पूतासः ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रायाहिधि येषितो विप्रंजूतस्सुतावंतः ।

उपब्रह्माणि वाघतंः ॥ ९ ॥

इन्द्रायाहि तूतूंजानउपब्रह्माणि हरिवः ।

सुते दंधिष्व नश्चनंः ॥ १० ॥

अश्विना पिबताम्मधु सरंस्वत्या सजोषंसा ।

इन्द्रंस्सुत्रामा वृत्रहा जुषन्तां॑ सोम्यम्मधुं ॥ ११ ॥ (८)

यद्देवाअष्ट (८) अभ्यादधामीतिच (८) योभूता-

नाश्चतस्रः (४) समिद्धइन्द्रएकादश (११) आयात्वष्ट ॥ ८ ॥

समिद्धोअग्निर्द्वादश (१२) अश्वि नाहविस्त्रयोदश ॥ १३ ॥

अश्विना तेजसैकादश (११) अष्टानुवाकेषुपञ्चसप्ततिः ॥ ७५ ॥

इति शुक्लयजुर्वेदकाण्वसँहितापाठेद्वाविंशोऽध्यायः (९)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथत्रयोविंशोऽध्यायः

(प्रथमोऽनुवाकः १)

इमम्मे वरुण श्रुधीहवमद्याच मृळय ।
त्वामवस्युराचके ॥ १ ॥
तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेळमानो व रुणेह बोध्युरुश॑ समान आयुः प्रमोषीः ॥ २ ॥
त्वन्नो अग्ने वरुणस्य विद्वान्दे वस्य हेळो अवयासिसीष्ठाः ।
यजिष्ठोवह्नितमश्शोशुचानो विश्वाद्वेषा॑सि प्रमुमुग्ध्यस्मत् ॥ ३ ॥
सत्वन्नो अग्नेऽवमोभवोतीनेदिष्ठो अस्या उषसो व्युष्टौ ।
अवयक्ष्वनो वरुण॑ रराणोवी हिमृळीक॑ सुहवोन एधि ॥ ४ ॥
महीमूषुमातर॑ सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूची॑ सुशर्माणमदिति॑ सुप्रणीतिम् ॥ ५ ॥
सुत्रामाणम्पृथिवीन्द्यामनेहस॑ सुशर्माणमदिति॑ सुप्रणीतिम् ।
दैवीन्नाव॑ स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥ ६ ॥
सु नावमारुहेयमस्रवन्तीमनागसम् ।
शतारित्रा॑ स्वस्तये ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनौमित्रा वरुणा घृतैर्गव्यूतिमुक्षतम् ।
मध्वारजाᳬंसि सुक्रतू ॥ ८ ॥
प्रवा हवासि सूत ञ्जीवसेन आनो गव्यूंतिमुक्षतङ्घृतेनं ।
आमाजनैश्रवयतँय्युवानाश्रुतम्मैमित्रा वरुणा हवेमा ॥ ९ ॥
शन्नौ भवन्तु वाजिनोहवेषु देवतातामितद्रंवस्स्वर्काः ।
जम्भयन्तोऽहिंव्वृकᳬ रक्षाᳬंसि सनैम्यस्मद्युंयवन्नमीवाः ॥ १० ॥
तेनो अर्वन्तो हवनश्रुतो हवँव्विश्वे शृण्वन्तु वाजिनौ मितद्रंवः ।
सहस्रसा मेधसाता इव त्मना महो येधनᳬ समिथेषुं जभ्रिरे ॥ ११ ॥
वाजे वाजेऽवत वाजिनो नोधनै षुविप्राअमृता ऋतजाः ।
अस्यमध्वः पिबतमादयंध्वन्तृप्तायात पथिभिर्देवयानैः ॥ १२ ॥ (१)

—*—

(द्वितीयोऽनुवाकः २)

समिद्धो अग्निस्समिधा सुसंमिद्धो वरेण्यः ।
गायत्रीच्छन्दं इन्द्रियन्त्र्यविर्गौ र्वयोदधुः ॥ १ ॥
तनूनपाच्छुचिव्रतस्तनूपाश्चसरस्वती ।
उष्णिहाच्छन्दं इन्द्रियन्दित्यवाड्गौर्वयौ दधुः ॥ २ ॥
इळाभिरग्निरीड्यस्सोमो देवो अमर्त्यः ।
अनुष्टुप्छन्दं इन्द्रियम्पश्चाविर्गौर्वयौ दधुः ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुबर्हिरग्निः पूषण्वान्त्स्तीर्णबर्हिर मर्त्यः ।
बृहतीच्छन्दं इद्रियन्त्रिं वत्सोगौर्वयों दधुः ॥ ४ ॥
दुरों देवीर्दिशों महीर्ब्रह्मा देवो बृहस्पतिः ।
पङ्क्तिश्छन्दं इहेन्द्रियन्तुर्यवाड्गौर्वयों दधुः ॥ ५ ॥
उपे यह्वी सुपेशंसा विश्वें देवा अमंर्त्याः ।
त्रिष्टुप्छन्दं इहेन्द्रियम्पंष्ठवाड्गौर्वयों दधुः ॥ ६ ॥
दैव्या होतांरा भिषजेन्द्रेंण सयुजा युजा ।
जगंतीच्छन्दं इन्द्रिय मंनड्वान्गौर्वयों दधुः ॥ ७ ॥
तिस्रइळा सरंस्वती भारंती मरुतो विशंः ।
विरा ट्छन्दं इहेन्द्रियन्धेनुर्गौर्नवयों दधुः ॥ ८ ॥
त्वष्टा तुरीपो अद्भुंत इन्द्राग्नी पुंष्टि वर्धना ।
द्विपदाच्छन्दं इन्द्रियमुक्षागौर्नवयों दधुः ॥ ९ ॥
शमितानो वनस्पतिं स्सविता प्रंसुवन्भगंम् ।
ककुप् छन्दं इहेन्द्रियँव्वशा वेहद्वयों दधुः ॥ १० ॥
स्वा हा यज्ञँव्वरुंणस्सुक्षत्रो भैषजङ्कंरत् ।
अतिच्छन्दा इन्द्रियम्बृहदृषभोगौर्वयोंदधुः ॥ ११ ॥ (२)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुताः ।
रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥ १ ॥
ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः ।
बृहताय शसा बलं हविरिन्द्रे वयो दधुः ॥ २ ॥
वर्षाभि ऋतुनाऽऽदित्या स्तोमे सप्त दशे स्तुताः ।
वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥ ३ ॥
शारदेन ऋतुना देवा एकविꣳश ऋभवःस्तुताः ।
वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयोदधुः ॥ ४ ॥
हेमन्तेन ऋतुना देवास्त्रिणवे मरुतःस्तुताः ।
बलेन शक्वरी स्सहोहविरिन्द्रे वयो दधुः ॥ ५ ॥
शैशिरेण ऋतुना देवास्त्रय स्त्रिꣳशेऽ मृतास्तुताः ।
सत्येन रेवतीः क्षत्रꣳः हविरिन्द्रे वयो दधुः ॥ ६ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

होता यक्षत्समि धाग्नि मिळस्पदेऽश्विनेन्द्रꣳ सरस्वती-
मजो धूम्रोन गोधूमैः कुवलैर्भेषजम्मधु ।
शष्पै र्न तेजं इन्द्रिय म्पयस्सोमःपरिस्रुता घृतम्मधु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यन्त्वा ज्यंस्य होतर्यजं ॥ १ ॥

होता यक्ष त्तनूनपा त्सरंस्वतीमविर्मेषो नभैष जम्पथा-

मधुंमता भरंन्नश्विनेन्द्राय वीर्यंम् ।

बदंरै रुपवाका भिर्भेपजन्तो क्मंभिः पयस्सोमंःपरिस्रुता-

घृतम्मधु व्यन्त्वा ज्यंस्य होतर्यजं ॥ २ ॥

होता य क्षन्नरा शंᳬ सन्न नग्नहुम्पतिᳬ सुरंया भेषजम्भे-

षस्सरंस्वती भिषग्रथोन चन्द्रय श्विनौ वंपा इन्द्रंस्य वीर्यंम् ।

बदंरै रुपवाका भिर्भेपजन्तो क्मंभिःपयस्सोमंः परिस्रुता-

घृतम्मधु व्यन्त्वाज्यंस्य होतर्यजं ॥ ३ ॥

होता यक्षदिळैळित आजु ह्वा नस्सरंस्वती मिन्द्रम्बलैन-

वर्धयंन्नृषभेण गवैन्द्रियमश्विनेन्द्राय भेषजम् ।

यवैःकर्कन्धुं भिर्मधुंलाजै र्नमासं रम्पयस्सोमंः-

परिस्रुता घृतम्मधु व्यन्त्वाज्यंस्य होतर्यजं ॥ ४ ॥

होता यक्षद्बर्हिं रूर्णं म्रदा भिषङ्ना संत्या भिषजा-

श्विनाऽश्वाशिशुंमती भिषग्धेनुस्सरंस्वती भिषक् ।

दुह इन्द्राय भेषज म्पयस्सोमंः परिस्रुता-

घृतम्मधु व्यन्त्वाज्यंस्य होतर्यजं ॥ ५ ॥

होता यक्षद्दुरो दिशंः कवष्योन व्यचंस्वती-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रश्विभ्यान्न दुरो दिश इन्द्रोन रोदसी-
दुघे दुहे धेनुस्सरं स्वत्यश्विनेन्द्राय भेषजम् ।
शुक्रन्न ज्योतिरिन्द्रियम्पयस्सोमः परिस्रुता-
घृतम्मधु व्यन्त्वा ज्यस्य होतर्यज ॥ ६ ॥
होता यक्षत्सुपेशसोषेनक्तन्दिवाश्विना-
समञ्जाते सरस्त्या त्विषिमिन्द्रेन भेषजम् ।
श्येनो न रजसा हृदाश्रियान मासं रम्पयस्सोमः-
परिस्रुता घृतम्मधु व्यन्त्वा ज्यस्य होतर्यज ॥ ७ ॥
हो ता यक्षदैव्याहोतारा भिषजाश्विनेन्द्रन्न-
जागृवि दिवानक्तन्नभेषजैः ।
शूषंस्सरस्वती भिषक्सीसेन दुह इन्द्रियम्पयस्सोमः-
परिस्रुता घृतम्मधु व्यन्त्वा ज्यस्य होतर्यज ॥ ८ ॥
होता यक्षत्तिस्रो देवी न भेषजन्त्रयं स्त्रिधा तवोपसो-
रूपमिन्द्रे हिरण्ययं मश्विनेळा न भारती ।
वाचा सरस्वती मह इन्द्राय दुह इन्द्रि यम्पय-
स्सोमःपरिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ ९ ॥
होता यक्षत्सुरे तस मृषभन्नर्या प सन्त्वष्टारमिन्द्र- मश्विना भिषजन्न-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरस्वती मोजो न जूतिरिन्द्रि यँव्वृको नरंभसो भिषक् ।
यशस्सुरया भेषजꣳ श्रिया न मासरम्पयस्सोमः-
परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ १० ॥
होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुम्भीमन्न मन्युꣳ-
राजानँ व्व्याघ्रन्नमसाश्विना ।
भामꣳ सरस्वती भिषगिन्द्राय दुह इन्द्रियम्पयस्सोमः परिस्रुता-
घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ ११ ॥
होता यक्षदग्निꣳ स्वाहाज्यस्य स्तोकानाꣳ स्वाहा-
मेदसाम्पृथक्स्वाहा च्छागमश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै ।
स्वाहंऋषभ मिन्द्राय सिꣳहाय सहस इन्द्रियꣳ स्वाहाऽग्निन्न-
भेषजꣳ स्वाहा सोमन्द्रियम् ।
स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारँव्वरुणम्भिषजाम्पतिꣳ स्वाहा-
वनस्प तिम्प्रियम्पाथोन भेषजम् ॥
स्वाहा देवा आज्यपा जुषाणो अग्निर्भेषजम्पयस्सोमः परिस्रुता-
घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ १२ ॥ (४)
होता यक्षदश्विनौच्छागस्य वपायामेदसोजुषेताꣳ हविर्होतर्यज ।
होता यक्ष त्सरस्वतीम्मेषस्य वपायामेदसो-
जुषताꣳ हविर्होतर्यज ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

होता यक्षदिन्द्रंमृष भस्य वपायामेदंसो जुषता॑ हविर्होतर्यज ॥ १ ॥

होता यक्षदश्विनौ सरस्वती मिन्द्रं॑ सुत्रामाणमिमेसोमाः ।

सुरामाणश्छागैर्नमेषै ऋषभैस्सुताः ।

शष्पैर्नतोक्मं भिर्लाजैर्महस्वन्तो मदामासंरेण परिष्कृताः ।

शुक्राः पयंस्वन्तोऽमृताः प्रस्थिता वो मधुश्च्युतस्तानश्विना सरस्वती-

न्द्रंस्सुत्रामा वृत्रहाः जुषन्ता॑ सोम्यधुं ।

पिबन्तु मदन्तु व्यन्तु होतर्यज ॥ २ ॥

होता यक्षदश्विनौ छागस्य हविष आत्ता मद्य मंध्यतो मेद-

उद्भृतम्पुरा द्वेषोभ्यःपुरा पौरुषेय्यागृभः ।

घस्तान्नू नङ्घासे अंज्राणाँय्यवंस प्रथमाना॑ सुमत्क्षराणा॑ शत-

रुद्रियाणा मग्निष्वात्ताना म्पीवो पवसनानाम् ।

पार्श्वतःश्रोणितश्शिता मतउंत्सादतोऽङ्गादङ्गा दवत्तानाङ्क-

रत एवाश्विनाजुषेता॑ हविर्होतर्यज ।

होता यक्षत्सरस्वतीम्मेषस्य हविष आव य दद्य मध्यतो

मेद उद्भृतम्पुरा द्वेषोभ्यः पुरापौरुषेय्यागृभः ।

घसंन्नूनङ्घासे अंज्राणाँय्यवंस प्रथमाना॑ सुमत्क्षराणा॑ शत

रुद्रियाणा मग्निष्वात्ता नाम्पीवो पवसनानाम् ।

पार्श्वतःश्रोणितश्शिता मतउंत्सादतोऽङ्गादङ्गा दवत्ताना-

32

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ङ्करंदेवः सरस्वती जुषताः हविर्होतर्यज ।

होता यक्षदिन्द्रमृषभस्य हविष आवय दद्य मध्यतो मेद

उद्भृतम्पुरा द्वेषोभ्यःपुरा पौरुषेय्यागृभः ।

घसन्नूनङ्घासे अज्राणाँय्यवसप्रथमानाः सुमत्क्षराणा-

ःशतरुद्रियाणा मग्निष्वात्तानाम्पीवो पवसनानाम् ।

पार्श्वतःश्रोणितश्शिता मतउत्सादतोऽङ्गादङ्गदवत्तानाङ्कर-

देवमिन्द्रो जुषताः हविर्होतर्यज ॥ ३ ॥

होता यक्षद्वनस्पति मभिहि पिष्टतमया रभिष्ट या रशनयाधित ।

यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्र-

सरस्वत्या मेषस्य हविषःप्रिया धामानि-

यत्रेन्द्रस्य ऋषभस्य हविषःप्रिया धामानि ।

यत्राग्नेःप्रिया धामानि यत्र सोमस्य प्रिया धामानि यत्रेन्द्रस्य-

सुत्राम्णःप्रिया धामानि ।

यत्र सवितुःप्रिया धामानि यत्र वरुणस्य प्रिया-

धामानि यत्र वनस्पतेःप्रिया पाथाःसि ।

यत्र देवानामाज्यपानाम्प्रिया धामानि-

यत्राग्नेर्होतुःप्रिया धामानि ।

तत्रैतान्प्रस्तुत्येवो पस्तुत्येवो पाव स्रक्षद्रभी यस इव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्वी करं देवन्देवो वनस्पतिं जुषताᳪं हविर्होतर्यज ॥ ४ ॥

होता यक्षदग्निᳪं स्विष्टकृतमयाळग्निरश्विनो श्छागस्य-

हविषः प्रियाधामान्ययाट् सरस्वत्या मेषस्य हविषः-

प्रियाधामान्ययाळिन्द्रस्य ऋषभस्य हविषःप्रिया धामानि ।

अयाळग्नेःप्रिया धामान्ययाट्सोमस्य प्रिया-

धामान्ययाळिन्द्रस्य सुत्राम्णःप्रियाधामानि ।

अयाट्सवितुःप्रिया धामान्ययाड्वरुणस्य प्रिया-

धामान्ययाड्वनस्पतेःप्रिया पाथाᳪंसि ।

अयाड्देवानामाज्यपानाम्प्रिया धामानि-

यक्षदग्नेर्होतुःप्रिया धामानि ।

यक्षत्स्वम्महिमानमायं जतामेज्याइषः कृणोतु सो-

अध्वरा जातवेदा जुषताᳪं हविर्होतर्यज ॥ ५ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

देवम्बर्हिस्सरस्वती सुदेवमिन्द्रे अश्विना ।

तेजोन चक्षुरक्ष्योर्बर्हिषा दधुरिन्द्रियँव्वसुवने-

वसुधेयस्य व्यन्तु यज ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवीर्द्वारो अश्विना भिषजेन्द्रे सरस्वती ।
प्राणन्नवीर्य्यन्नसि द्वारो दधुरिन्द्रियँव्वसुवनें-
वसुधेयस्य व्यन्तुयजं ॥ २ ॥

देवी उषासा अश्विना सुत्रामेन्द्र सरस्वती ।
बलन्नवाचं मास्यं उपाभ्यान्दधुरिन्द्रियँव्वसुवनें-
वसु धेयस्य व्यन्तु यजं ॥ ३ ॥

देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्द्धयन् ।
श्रोत्रन्नकर्णयोर्यशो जोष्ट्रीभ्यान्दधुरिन्द्रियँव्वसुवनें-
वसुधेयस्य व्यन्तु यजं ॥ ४ ॥

देवी ऊर्जाहुती दुघे सुदुघेन्द्रे सरस्वत्यश्विनाभिषजावतः ।
शुक्रन्नज्योतिस्तनयो राहुती धत्त इन्द्रियँव्वसुवनें-
वसुधेयस्य व्यन्तुयजं ॥ ५ ॥

देवा देवानाम्भिषजा होतारा इन्द्रमश्विना वषट्कारैस्सरस्व-
ती त्विषिन्न हृदये मतिम् ।
होतृभ्यान्दधुरिन्द्रियँव्वसुवनें वसुधेयस्य व्यन्तु यजं ॥ ६ ॥

देवीस्तिस्रस्तिस्रो देवीरश्विनेळा सरस्वती ।
शूषन्नमध्ये नाभ्यामिन्द्राय दधुरिन्द्रियव्वसुवनें-
वसुधेयस्य व्यन्तु यजं ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देव इन्द्रो नराशꣳ संस्त्रि वरूथस्सरस्वत्याश्विभ्यामीयते रथः ।
रेतोन रूपममृतञ्जनित्र मिन्द्राय त्वष्टा दधदिन्द्रियाणि-
वसुवने वसुधेयस्य व्यन्तु यज ॥ ८ ॥
देवो देवैर्वनस्पतिर्हिरण्य पर्णो अश्विभ्याꣳ सरस्वत्या-
सुपिप्पल इन्द्राय पच्यते मधु ।
ओजोन जूतिर्ऋषभो नभामँव्वनस्पतिर्नो दधदिन्द्रियाणि-
वसुवने वसुधेयस्यव्यन्तु यज ॥ ९ ॥
देवम्बर्हि वारितीना मध्वरे स्तीर्णमश्विभ्ययामूर्ण-
म्रदास्सरस्वत्या स्योनमिन्द्रते सदः ।
ईशायै मन्युꣳ राजानम्बर्हिषा दधुरिन्द्रियँव्वसुवने-
वसुधेयस्य व्यन्तु यज ॥ १० ॥
देवो अग्निस्स्विष्ट कृद्देवा न्यक्षद्यथा यथꣳ होतारा-
इन्द्रमश्विना वाचा वाचꣳ सरस्वती मग्नि सोमꣳ स्विष्टकृत् ।
स्विष्टइन्द्रस्सु त्रामा सविता वरुणो भिषगिष्टो-
देवो वनस्पतिस्स्विष्टादेवा आज्यपाः ।
स्विष्टो अग्निरग्निना होताहोत्रे स्विष्टकृद्यशो नदधदिन्द्रिय-
मूर्जमपचितिꣳ स्वधाँव्वसुव ने वसुधेयस्य व्यन्तु यज ॥ ११ ॥
अग्निमद्यहोतारमवृणी तायँय्यजमानःपचन्पक्तीः पचन्पुरो-
ळाशान्बध्नन्नश्विभ्याञ्छागꣳ सरस्वत्यै मेषमिन्द्राय ऋषभम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुन्वन्नश्विभ्याᳲ सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमान् ॥ १२ ॥

सूपस्थाअद्यदेवो वनस्पतिरभवदश्विभ्याञ्छागेन-

सरस्वत्यै मेषेणेन्द्राय ऋषभेण ।

अक्षᳲस्तान्मे दस्तःप्रति पचतागृभीषतावी बृधन्त-

पुरोळाशैरपुरश्विना सरस्वतीन्द्रः स्सुत्रामा सुरासोमान् ॥ १३ ॥

त्वामद्य ऋषआर्षेय ऋषीणान्नपाद् बृणीतायँ-

य्यजमानो बहुभ्य आसङ्गतेभ्य एषमे देवेषु वसुवार्यायक्ष्यतइति ।

तायादेवा देवदा नान्यदुस्तान्यस्मा आचशा स्वाचं-

गुरस्वेषितश्चं होतरसि भद्रवाच्यायप्रे-

षितो मानुषस्सूक्त वाकाय सूक्ताब्रूहि ॥ १४ ॥ (६)

इमम्मे वरुण द्वादश ॥ १२ ॥

समिद्धो अग्निरेकादश ॥ ११ ॥

वसन्तेन षट् ॥ ६ ॥

होतायक्षद्द्वादश ॥ १२ ॥

होतायक्षदश्विनौ छागस्य पञ्च ॥ ५ ॥

देवम्बर्हि श्चतुर्दश ॥ १४ ॥

षळनुवाकेषु षष्टिः ॥ ६० ॥

कृष्णइमम्मेषष्टिः

इति त्रयोविंशोऽध्यायः (६)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ चतुर्विंशोऽध्यायः

(प्रथमोऽनुवाकः १)

तेजोऽसि शुक्रममृतमायुष्पाआयुर्मे पाहि ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पुष्णोहस्ताभ्यामाददे ॥ १ ॥

इमामगृभ्णनरशनामृतस्यपूर्व आयुषि विदथेषु कव्या ।

सानो अस्मिन्त्सुत आबभूव ऋतस्य सामन्त्सर मारपन्ती ॥ २ ॥

अभिधा असि भुवनमसियन्तासि धर्ता ।

सत्वमग्निन्वैश्वानरꣳसप्रथ सङ्गच्छ स्वाहा कृतस्स्वगात्वा देवेभ्यः ॥३॥

प्रजापतये ब्रह्मन्न श्वम्भन्त्स्यामिदेवेभ्यः प्रजापतये तेन राध्यासम् ।

तम्बधान देवेभ्यः प्रजापतये तेन राध्नुहि ।

प्रजापतये त्वा जुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वा जुष्टम्प्रोक्षामि-

वायवे त्वा जुष्टम्प्रोक्षामि विश्वेभ्यस्त्वा देवेभ्यो-

जुष्टम्प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टम्प्रोक्षामि ॥ ४ ॥

यो अर्वन्तञ्जिघाꣳसतितमभ्यमीतिवरुणः ।

परो मर्तः परःश्वा ॥ ५ ॥ (१)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(द्वितीयोऽनुवाकः २)

अग्नये स्वाहा सोमाय स्वाहाऽपाम्मोदाय स्वाहा-
सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहा ।
इन्द्राय स्वाहा बृहस्पतये स्वाहा-
मित्राय स्वाहा वरुणाय स्वाहा ॥ १ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

हिङ्काराय स्वाहा हिङ्कृताय स्वाहा-
क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा ।
प्रोथते स्वाहा प्रप्रोथाय स्वाहा-
गन्धाय स्वाहा घ्राताय स्वाहा ॥ १ ॥
निविष्टाय स्वाहोपविष्टाय स्वाहा-
सन्दिताय स्वाहा वल्गते स्वाहा ।
आसीनाय स्वाहा शयानाय स्वाहा-
स्वपते स्वाहा जाग्रते स्वाहा ॥ २ ॥
कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय
स्वाहा विचृत्ताय स्वाहा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सङ्हानाय स्वा होपंस्थिताय-
स्वाहाऽयंनाय स्वाहा प्रायंणाय स्वाहा ॥ ३ ॥

यते स्वाहा धावंते स्वाहोंद्रावाय स्वाहोद्रुंताय स्वाहा ।
शूकाराय स्वाहा शूकृंताय स्वाहा-
निषंण्णाय स्वाहोत्थिताय स्वाहा ॥ ४ ॥

जवाय स्वाहा बलाय स्वाहा विवर्तमा
नाय स्वाहा विवृंत्ताय स्वाहा ।
विधून्वानाय स्वाहा विधूंताय स्वाहा शुश्रू-
षमाणाय स्वाहा शृण्वते स्वाहा ॥ ५ ॥

ईक्षंमाणाय स्वाहेक्षिताय स्वाहा वी-
क्षिताय स्वाहा निमेषाय स्वाहा ।
यदत्ति तस्मै स्वाहा यत्पिबंति तस्मै स्वाहा-
यन्मूत्रंङ्करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ॥ ६ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

तत्सं वितुर्वरेण्यम्भर्गो देवस्यं धीमहि ।
धियो योनंः प्रचोदयात् ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिरंण्यपाणि मूतये सवितार मुपंह्वये ।

सचेत्ता देवता पदम् ॥ २ ॥

देवस्य चेतंतो महीम्प्रसं वितुर्हवामहे ।

सुमतिꣳ सत्यराधसम् ॥ ३ ॥

सुष्टुतिꣳ सुमती वृधो रातिꣳ संवितुरीमहे ।

प्रदेवाय मतीविदे ॥ ४ ॥

रातिꣳसत्पतिम्महे संवितारमुपंह्वये ।

आसवन्देववीतये ॥ ५ ॥

देवस्य सवितुर्मतिमा सवँव्विश्वदेव्यम् ।

धियाभगम्मनामहे ॥ ६ ॥

अग्निꣳ स्तोमेन बोधय समि धानो अमंर्त्यम् ।

हव्या देवेषु नोदधत् ॥ ७ ॥

सहव्यवाळमंर्त्य उशिग्दूतश्चनो हितः ।

अग्निर्धिया समृण्वति ॥ ८ ॥

तन्त्वा घृतस्न ईमहे चित्रभानो स्वर्विदम् ।

देवाँ२आवीतये वह ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निन्दूतम्पुरो दधे हव्यवाह मुप ब्रुवे ।
देवाँ२आसादयादिह ॥ १० ॥ (४)

—०—

(पंचमोऽनुवाकः ५)

अजी' जनोहि पवमानसूर्यंविधारेशक्मना पयः ।
गोजीरयारꣳहमाणः पुरंन्ध्या ॥ १ ॥ (५)

—*—

(षष्ठोऽनुवाकः ६)

विभूर्मात्रा प्रभूःपित्राश्वोऽसि हयोऽस्यत्योऽसि-
मयोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणाअसि ।
ययुर्नामासि शिशुर्नामास्यादित्यानाम्पत्वान्विहि ॥ १ ॥
देवा आशा पाला एतन्देवेभ्योऽश्वम्मेधाय प्रोक्षितꣳ रक्षत ।
इहरन्ति रिहरमता मिह धृतिरिहस्व धृतिस्स्वाहा ॥ २ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा ।
स्वाहाधिमाधीताय स्वाहा मनःप्रजापतये स्वाहा चित्तंविज्ञाताय ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अदित्यै स्वाहादित्यै मह्यैस्वाहादित्यै सुमृळीकायै स्वाहा ।
सरस्वत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा-
सरस्वत्यै बृहत्यै स्वाहा ॥ २ ॥
पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णेन रन्धिषाय स्वाहा ।
त्वष्टे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा ।
विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे-
शिपिविष्टाय स्वाहा ॥ ३ ॥
विश्वो देवस्य नेतुर्मर्तो बुरीत सख्यम् ।
विश्वो रायइषुध्यति द्युम्नँवृणीत पुष्यसे स्वाहा ॥ ४ ॥ (७)

—०—

(णष्टमोऽनुवाकः ८)

आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः ।
शूरइषव्योतिव्याधी महारथो जायताम् ॥ १ ॥
दोग्ध्रीधेनुर्वोढानड्वानाशुस्सप्तिः पुरन्धिर्योषा ।
जिष्णूरथेष्ठास्सभेयो युवास्य यजमानस्य वीरो जायताम् ॥ २ ॥
निकामेनिकामे नःपर्जन्यो वर्षतु फलवत्योन ओषधयःपच्यन्ताम् ।
योगक्षेमोनःकल्पताम् ॥ ३ ॥ (८)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नवमोऽनुवाकः ९)

प्राणाय स्वाहापानाय स्वाहा व्यानायस्वहाय चक्षुषे स्वाहा श्रोत्राय-
स्वाहा वाचे स्वाहा मनसे स्वाहा ॥ १ ॥ (९)

—०—

(दशमोऽनुवाकः १०)

प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै-
दिशे स्वाहार्वाच्यै दिशे स्वाहा ।
प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै-
दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥
ऊर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै-
दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥ १ ॥ (१०)

—०—

(एकादशोऽनुवाकः ११)

अद्भ्यस्स्वाहावार्भ्यस्स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यस्स्वाहा-
स्रवन्तीभ्य स्स्वाहा स्यन्दमानाभ्यस्स्वाहा ।
कूप्याभ्यस्स्वाहा सूद्याभ्यस्स्वाहा धार्याभ्य स्स्वाहार्णवाय-
स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥ १ ॥ (११)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(द्वादशोऽनुवाकः १२)

वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय-
स्वाहा विद्योतमानाय स्वाहा स्तनयं ते स्वाहा ।
अवस्फूर्जते स्वाहा वर्षते स्वाहाऽववर्षं ते स्वाहो ग्रँव्वर्षं ते स्वाहो-
शीघ्रँव्वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा ।
पृष्ण ते स्वाहा शीकाय ते स्वाहा प्रृष्वाभ्यस्वाहा-
ह्रादुनीभ्यस्स्वाहा नीहाराय स्वाहा ॥ १ ॥ (१२)

—०—

(त्रयोदशोऽनुवाकः १३)

अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा-
पृथिव्यै स्वाहान्तरिक्षायस्वाहा ।
दिवे स्वाहा दिग्भ्यस्स्वाहाशाभ्यस्स्वाहोर्व्यै दिशे-
स्वाहार्वाच्यै दिशे स्वाहा ॥ १ ॥ (१३)

—०—

(चतुर्दशोऽनुवाक १४)

नक्षत्रेभ्य स्स्वाहा नक्षत्रियेभ्यस्स्वाहाहोरात्रेभ्यस्स्वाहार्धमासेभ्यस्स्वाहा ।
मासेभ्यस्स्वाहं ऋतुभ्यस्स्वाहार्तवेभ्यस्स्वाहा सँव्वत्सराय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाहा द्यावांपृथिवीभ्याᳬ स्वाहां ॥ १ ॥

चन्द्राय स्वाहा सूर्याय स्वाहां रश्मिभ्यस्स्वाहा वसुंभ्यस्स्वाहां ।

रुद्रेभ्यस्स्वाहांदित्येभ्यस्स्वाहां मरुद्भ्यस्स्वाहा विश्वेभ्यो-

देवेभ्यस्स्वाहां ॥ २ ॥ (१४)

—०—

(पञ्चदशोऽनुवाकः १५)

मूलेभ्यस्स्वाहा शाखाभ्यस्स्वाहा वनस्पतिभ्यस्स्वाहां ।

पुष्पेभ्यस्स्वाहा फलेभ्यस्स्वाहौषधीभ्यस्स्वाहां ॥ १ ॥ (१५)

—०—

(षोडशोऽनुवाकः १६)

पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा ।

चन्द्राय स्वाहा नक्षत्रेभ्यस्स्वाहाद्भ्यस्स्वाहौषधीभ्यस्स्वाहा ।

वनस्पतिभ्यस्स्वाहा परिप्लवेभ्यस्स्वाहा चराचरेभ्यस्स्वाहा-

सरीसृपेभ्यस्स्वाहां ॥ १ ॥ १६ ॥

—०—

(सप्तदशोऽनुवाकः १७)

असवे स्वाहा वसवे स्वाहां विभुवेस्वाहा विवस्वते स्वाहा ।

गणश्रियेस्वाहां गणपतये स्वाहाऽभिभुवे स्वाहाधिपतयेस्वाहां ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शूषायस्वाहा सꣳस र्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा ।
मलिम्लुचाय स्वाहा दिवापतये तेस्वाहा ॥ २ ॥ (१७)

—०—

(अष्टशोऽनुवाकः १८)

मधवे स्वाहा माधवाय स्वाहा शुक्रायस्वाहा शुचये स्वाहा ।
नभसेस्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा ।
सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय-
स्वाहाꣳहसस्पतये स्वाहा ॥ १ ॥ (१८)

—०—

(एकोनविंशोऽनुवाकः १९)

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा ।
स्वस्स्वाहामूर्ध्ने स्वाहा व्यश्नुविनेस्वाहा ।
अन्त्याय स्वाहान्त्यायनाय स्वाहा भौवनाय स्वा-
हा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥१॥ (१९)

—०—

(विंशोऽनुवाकः २०)

आयुर्यज्ञेन कल्पताꣳ स्वाहा प्राणोयज्ञेन कल्पताꣳ स्वाहा-
ऽपानोयज्ञेन कल्पताꣳ स्वाहा व्यानो यज्ञेन कल्पताꣳ स्वाहा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदानो यज्ञेनं कल्पताᳪं स्वाहां समानो यज्ञेनं कल्पताᳪं-

स्वाहाचक्षुर्यज्ञेनं कल्पताᳪं- 103983

स्वाहा श्रोत्रंय्यज्ञेनं कल्पताᳪं स्वाहां।

वाग्यज्ञेनं कल्पताᳪं स्वाहा मनोयज्ञेनं कल्पताᳪं स्वाहात्मा-

यज्ञेनं कल्पताᳪं स्वाहां पृष्ठंय्यज्ञेनं कल्पताᳪं स्वाहां।

ब्रह्मंयज्ञेनं कल्पताᳪं स्वाहां यज्ञो यज्ञेनं कल्पताᳪं स्वाहा -

ज्योतिर्यज्ञेनं कल्पताᳪं स्वाहा स्वंर्यज्ञेनं कल्पताᳪं स्वाहां ॥ १ ॥ (२०)

एकंस्मै स्वाहा द्वाभ्याᳪं स्पाहाशतायस्वाहैकं शताय स्वाहां।

व्युंष्ट्यै स्वाहा स्वर्गाय स्वाहा ॥ १ ॥ (२०)

तेजोऽसिपञ्च (५) अग्नय एका (१)
हिङ्कारायषट् (६) तत्सवितुर्दश (१०) अजीजनोह्येका (१)
विभूर्द्वे (२)काय चतस्रः (४) आब्रह्मन् स्तस्रः (३)
प्राणाय (१) प्राच्यै (१) अद्भ्यः (१) वाताय (१)
अग्नय इत्येकैका (१) नक्षत्रेभ्योद्वे (२) मूलेभ्यः (१)
पृथिव्या इत्येकैका (१) असवेद्वे (२) मधवे (१)
वाजाय (१) आयुर्यज्ञेन (१) एकस्मा इत्येकै का (१)
एकविंशत्यवाकेषु सप्तचत्वारिंशत् (४७)
एषते तेजो सप्तचत्वारिᳪंशत् ॥

इति शुक्ल यजुर्वेद काण्व संहिता पाठे चतुर्विंशत्यध्यायः (२४)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ पञ्चविंशोऽध्यायः

(प्रथमोऽनुवाकः १)

हिरण्यगर्भस्समवर्त्तताग्रे भूतस्य जातःपतिरेक आसीत् ।
सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥ १ ॥
उपयामगृहीतोऽसि प्रजापतयेत्वा जुष्टङ्गृह्णाम्येषते-
योनिस्सूर्यस्ते महिमा ।
यस्तेहन्त्सँव्वत्सरे म हिमासम्बभूवयस्ते बाया-
अन्तरिक्षे महिमासम्बभूव ।
यस्ते दिविसूर्ये महिमासम्बभूव तस्मैते महिम्ने-
प्रजापतये स्वाहा देवेभ्यः ॥ २ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपद श्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १ ॥
उपयामगृहीतोऽसि प्रजापतयेत्वा जुष्टङ्गृह्णाम्येषते
योनिश्चन्द्रमास्ते महिमा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्ते रात्रौ सँव्वत्सरे महिमासंम्बभूव यस्तै पृथिव्या-

माग्नौमहिमा संम्बभूवं ।

यस्ते नक्षत्रेषु चन्द्रमसि महिमा संम्बभूव तस्मैते महिम्ने-

प्रजापतये देवेभ्यस्स्वाहा ॥ २ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

युञ्जन्ति ब्रध्न मरुषञ्चरन्तम्परि तस्थुषः ।

रोचन्ते रोचना दिवि ॥ १ ॥

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।

शोणा धृष्णू नृवाहसा ॥ २ ॥

यद्वा तौ अपो अगनीगन्प्रियामिन्द्रस्य तन्वम् ।

एतः स्तौतरनेन पथा पुनरश्वमावर्तयासि नः ॥ ३ ॥

वसवस्त्वाञ्जन्तु गायत्रेण च्छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन च्छन्दसा ।

आदित्या स्त्वाञ्जन्तु जागतेन च्छन्दसा ॥ ४ ॥

भूर्भुव स्स्व र्लाजी३ञ्छाची३न्यव्ये गव्ये ।

एतदन्नं मत्त देवा एतदन्नं मद्धि प्रजा पते ॥ ५ ॥

कस्स्वि देका कीचरतिक उस्विज्जायते पुनः ।

किःस्विद्धि मस्य भेषजङ्किम्वा बपनम्महत् ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्यं एका कीचरति चन्द्रमा जायते पुनः ।

अग्निर्हिमस्य भेषजम्भूमिरावपनम्महत् ॥ ७ ॥

कास्विदासीत्पूर्वचित्तिः किंस्विदासीद्बृहद्वयः ।

कास्विदासीत्पिलिप्पिला कास्विदासीत्पिशङ्गिला ॥ ८ ॥

द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः ।

अविरासीत्पिलिप्पिला रात्रिरासीत्पि शङ्गिला ॥ ९ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

वायुष्ट्वा पचतैरवत्वसितग्रीवश्छागैः ।

न्यग्रोधश्चमसैश्शल्मलिर्वृध्या ॥ १ ॥

एषस्यराथ्यो वृषा पड्भिश्चतुर्भिरेदगन् ।

ब्रह्माऽकृष्णश्चनोऽवतु नमोऽग्नये ॥ २ ॥

सꣳशितो रश्मिना रथस्सꣳशितो रश्मिना हयः ।

सꣳशितो अप्स्वप्सुजा ब्रह्मासोम पुरोगवः ॥ ३ ॥

स्वयँव्वाजिंस्तन्वङ्कल्पयस्व स्वयँय्यजस्व स्वयञ्जुषस्व ।

महिमातेऽन्येन नसन्नशे ॥ ४ ॥

नवाउएतन्म्रियसे नरिष्यसि देवाँ२इदेषि पथिभिस्सुगेभिः ।

यत्रासते सुकृतो यत्रतेय युस्तत्र त्वा देवस्सविता दधातु ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निः पशुरासीत्तेनायजन्त सएतँल्लोकमंजय द्यस्मिन्नग्निः ।
सतें लोकोभंविष्यति तञ्जेष्यसि पिबैता अपः ।
वायुः पशुरासीत्तेनायजन्त सएतँल्लोकमंजयद्यस्मिन्वायुः ।
सतें लोकोभंविष्यति तञ्जेष्यसि पिबैता अपः ।
सूर्यः पशुरासीत्तेनाऽयजन्त सएतँल्लोकमंजय द्यस्मिन्त्सूर्यः ।
सतेंलोको भंविष्यति तञ्जेष्यसि पिबैता अपः ॥ ६ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा ।
अम्बे अम्बिकेऽम्बालिके नमानयति कश्चन ।
ससंस्त्य श्वकस्सुभंद्रिकाङ्काम्पील वासिनीम् ॥ १ ॥
गणानान्त्वा गणपतिँ हवामहे प्रियाणान्त्वा प्रियपतिँ हवामहे ।
निधीनान्त्वा निधिपतिँ हवामहे वसो मम ॥ २ ॥
आहमंजानि गर्भधमात्वमंजासि गर्भधम् ।
ताउभौ चतुरः पदस्सम्प्रसारयाव ।
स्वर्गे लोके प्रोर्ण्वाथाँव्वृषांवाजीरेंतो धारेतों दधातु ॥ ३ ॥ (५)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(षष्ठोऽनुवाकः ६)

उत्सक्थ्या अवगुदन्धेहि समञ्जिञ्चारयावृषन् ।

यस्त्रीणाञ्जी वभोजनः ॥ १ ॥

यकाऽसकौशकुन्तिकाहलगितिवञ्चति ।

आहन्ति गभेपसो निगल्गलीतिधा रका ॥ २ ॥

यकौसकौ शकु न्तकआहलगिति वञ्चति ।

विवक्षत इवते मुखमध्वर्यो मानस्त्वमभिभाषथाः ॥ ३ ॥

माताचते पिताचतेऽग्रंवृक्षस्यरोहतः ।

प्रतिलामीतिते पिता गभे मुष्टिमत ँ सयत् ॥ ४ ॥

माताचते पिता चतेऽग्रे वृक्षस्यं क्रीळतः ।

विवक्षत इवते मुखम्ब्रह्मन्मा त्वँव्वदो वहु ॥ ५ ॥

ऊर्ध्वामेनामुच्छ्रापयगिरौ भारँ हरन्निव ।

अथास्यै मध्यं मेधताँ शीते वाते पुनन्निव ॥ ६ ॥

ऊर्ध्वमेनमुच्छ्रयताद्गिरौ भारँ हरन्निव ।

अथास्य मध्यमेजतु शीते वाते पुनन्निव ॥ ७ ॥

यदस्या अँहुभेद्याः कृधुस्थूलमुपातसत् ।

मुष्का इदस्या एजतो गोशफे शकुलाइव ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्देवासो ललामं गुम्प्रविंष्टीमिनमाविषुः ।
सक्थ्नादे दिश्यते नारी सत्यस्यांक्षि भुवो यथा ॥ ९ ॥
यद्धरिणो यव मत्ति न पुष्ट म्पशु मन्यंते ।
शूद्रा यदर्यं जारा नपोषाय धनायति ॥ १० ॥
यद्धरिणो यव मत्ति न पुष्टम्वहु मन्यंते ।
शूद्रो यदर्यायै जारो नपोष मनु मन्य ते ॥ ११ ॥
दधि क्राव्णो अकारिषञ्जिष्णो रश्वस्य वाजिनः ।
सुरभिनो मुखा करत्प्रण आयूंषि तारिषत् ॥ १२ ॥ (६)

—०—

(सप्तमोऽनुवाकः ७)

गायत्री त्रिष्टुब्जगंत्यनुष्टुप्पङ्क्तयासह ।
बृहत्युष्णिहा ककुप्सूचीभिंश्शम्यन्तु त्वा ॥ १ ॥
द्विपदाया श्चतुंष्पदा स्त्रिपदायाश्च षट्पंदाः ।
विच्छंन्दायाश्च सच्छंन्दास्सूचीभिंश्शम्यन्तुत्वा ॥ २ ॥
महानाम्न्योरेवत्यो विश्वा आशाः प्रभूवंरीः ।
मेघीर्विद्युतो वाचंस्सूचीभिंश्शम्यन्तु त्वा ॥ ३ ॥
नार्यस्ते पत्न्यो लोमविचिन्वन्तु मनीषया ।
देवानाम्पत्न्यो दिशंस्सूचीभिंश्शम्यन्तु त्वा ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजता हरिणीस्सीसा युजोयुज्यन्ते कर्मभिः ।

अश्वस्यवाजिनंस्त्वचिसिमाश्शम्यन्तु शम्यन्तीः ॥ ५ ॥

कुविदङ्गयवमन्तो यवंश्चिद्यथादान्त्यनुपूर्वंव्वियूय ।

इहेहषां कृणुहि भोजनानि ये बर्हिषो नमउक्तिन्न जग्मुः ॥ ६ ॥ (७)

—०—

(अष्टमोऽनुवाकः ८)

कस्त्वाच्छ्यतिकस्त्वा विशास्ति कस्ते गात्राणि शम्यति ।

कउते शमिता कविः ॥ १ ॥

ऋतवस्त ऋतुथा पर्व शमितारो विशासतु ।

सँव्वत्सरस्य ते जंसा शमीभिश्शस्यन्तु त्वा ॥ २ ॥

अर्द्धमासाः परूंःषि ते मासा आच्छ्यन्तु शस्यन्तः ।

अहोरात्राणि मरुतो विलिष्टंः सूदयन्तुते ॥ ३ ॥

दैव्या अध्वर्य वस्त्वाच्छ्यन्तु विचशासतु ।

गात्राणि पर्व शस्ते सिमाः कृण्वन्तु शम्यन्तीः ॥ ४ ॥

द्यौस्ते पृथिव्यन्तरिक्षंव्वायुश्छिद्रम्पृणातु ते ।

सूर्यस्ते नक्षत्रैस्सह लोककृणोतु साधुया ॥ ५ ॥

शन्ते परेभ्यो गात्रेभ्यश्शमस्त्ववं रेभ्यः ।

शमस्थभ्यो मज्जभ्यश्शम्वस्तु तन्वै तव ॥ ६ ॥ (८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नवमोऽनुवाकः ९)

कस्स्वि देकाकी चरति कउस्विज्जायते पुनः ।
किᳫंस्विद्धिमस्यं भेषजङ्किम्वाऽऽवपनम्महत् ॥ १ ॥
सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्यं भेषजम्भूमिरावपनंमहत् ॥ २ ॥
किᳫंस्वित्सूर्यं समञ्ज्योतिः किᳫंसमुद्र समᳫं सरः ।
किᳫं स्वित्पृथिव्यै वर्षीयः कस्य मात्रा नविद्यते ॥ ३ ॥
ब्रह्म सूर्यं सम ञ्ज्योति द्यौस्समुद्र समᳫंसरः ।
इन्द्रःपृथिव्यै वर्षीयान्गोस्तु मात्रा नविद्यते ॥ ४ ॥
पृच्छामि त्वाचितये देव सखयदित्वमत्र मनसा जगन्थं ।
येषु विष्णुं स्त्रि षुपदेष्वेष्टस्तेषु विश्वम्भुवन माविवेशा३ ॥ ५ ॥
अपि तेषुं त्रिषुपदे ष्वास्मियेषु विश्वम्भुवनमाविवेशं ।
सद्यः पर्येति पृथिवी मुतद्या मेकेनाङ्गेन दिवो अस्य पृष्ठम् ॥ ६ ॥
केष्वन्तः पुरुष आविवेश कान्यन्तः पुरुषे अर्पितानि ।
एतद् ब्रह्मन्नुप वह्लामसि त्वाकिᳫं स्विन्नः प्रतिवोचास्यत्र ॥ ७ ॥
पञ्चस्वन्तः पुरुं षआ विवेशतान्यन्तः पुरुषे अर्पितानि ।
एत त्त्वात्र प्रतिमन्वानो अस्मिन मायया भवस्युत्तरोमत् ॥ ८ ॥ (९)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(दशमोऽनुवाकः १०)

का स्विदासीत्पूर्वचित्तिः किँ स्विदासीद्बृहद्वयः ।

का स्विदासीत्पिलिप्पिला कास्विदसीत्पिशङ्गिला ॥ १ ॥

द्यौरासीत्पूर्व चित्तिरश्व आसीद्बृहद्वयः ।

अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥ २ ॥

का ईमरे पिशङ्गिला का ईङ्कुरु पिशङ्गिला ।

क ईमास्कन्दं मर्षति क ईम्पन्थाँ व्विसर्पति ॥ ३ ॥

अजारे पिशङ्गिला श्वावित्कुरु पिशङ्गिला ।

शश आस्कन्दं मर्षत्यहिः पन्थाँ व्विसर्पति ॥ ४ ॥

कत्यस्य विष्ठाः कत्यक्षराणि कति होमा सः कतिधा समिद्धः ।

यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यं जन्ति ॥ ५ ॥

षळस्य विष्ठाश्शतमक्षराण्यशीतिर्होमास्समिधो ह तिस्रः ।

यज्ञस्य ते विदथा प्रब्रवीमि सप्त होतार ऋतुशो यजन्ति ॥ ६ ॥

को अस्य वेद भुवनस्य नाभिङ्को द्यावा पृथिवी अन्तरिक्षम् ।

कस्सूर्यस्य वेद बृहतो ज नित्रङ्को वेद चन्द्रमसँय्यतो जाः ॥ ७

वेदाहमस्य भुवनस्य नाभिँव्वेद द्यावापृथिवी अन्तरिक्षम् ।

वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसँय्यतोजाः ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृच्छामि त्वा परमन्तम्पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमँव्व्योम ॥ ९ ॥
इयँव्वेदिः परो अन्तः पृथिव्या अयँय्यज्ञो भुवनस्य नाभिः ।
अयꣳ सोमो वृष्णो अश्वस्य रेतो ब्रह्माऽयँव्वाचः परमँव्व्योम ॥ १० ॥
सुभूस्स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे ।
दधेह गर्भमृत्वियँय्यतो जातः प्रजापतिः ॥ ११ ॥
होता यक्षत्प्रजापतिꣳ सोमस्य महिम्नः ।
जुषताम्पिबतु सोमꣳ होतर्यज ॥ १२ ॥
प्रजापते नत्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव ।
यत्कामास्ते जुहुम स्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥१३॥

हिरण्यगर्भोद्वे (२) यःप्राणतश्च (२)युञ्जन्ति नव (९)
वायुष्ट्वा षट् (६) प्राणाय तिस्रः (३)
उत्सक्थ्या द्वादश (१२) गायत्री षट् (६) कस्त्वाच (६)
कस्स्विष्ट ॥ ८ ॥ कास्वित्त्रयोदश (१३) दशानुवाकेषु
सप्तषष्टिः (६७) द्विपदाया महानाम्न्यो नार्यस्ते
रजतास्तथा । कुविदंत्विहच ब्रूयाद्यथा क्रममनुस्मरन् (१)

इति शुक्लयजुर्वेद काण्वसंहिता पाठे पञ्चविंशोध्यायः

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ षड्विंशोऽध्यायः

(प्रथमोऽनुवाकः १)

अश्वंस्तूपरोगौं मृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयोरराटे ।
पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वौं ः ॥ १ ॥
आश्विना अधोरामौ बाह्वोस्सौमा पौष्ण श्श्यामोनाभ्यांः सौर्ययामौ ।
श्वेतश्चं कृष्णश्चं पार्श्वयोः ॥ २ ॥
वाष्टौ लोमशसं क्थौ सक्थ्योर्वायव्यं श्वेतःपुच्छ-
इन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ।
रोहिं तोधूम्ररोंहितः कर्कन्धुरोहितस्ते सौम्या-
बभ्रुररुणबंभ्रुश्शुकंबभ्रुस्ते वारुणाः ॥ ३ ॥
शितिरन्ध्रोऽन्यतंश्शितिरन्ध्रस्समन्त शितिरन्ध्रस्ते सावित्राश्शिंशति-
बाहुरन्यतंश्शि तिबाडुस्समन्तशिति बाहुस्ते बार्हस्पत्याः ।
पृषंती क्षुद्रपृंषतीस्थूलपृंषतीतामैत्रावरुण्यः ॥ ४ ॥
शुद्धवालस्सर्वशुद्ध वालोमणिवालस्त आश्विनाः ।
श्येतंश्श्ये ताक्षौंऽरुणस्ते रुद्रायं पशुपतंये कर्णायामाः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ।

पृश्निस्तिरश्चीनं पृश्निरूर्ध्वपृश्निस्ते मारुताः ॥ ६ ॥

फल्गूर्लोहितोर्णी पलक्षीतास्सारस्वत्यः ॥

प्लीहाकर्णश्शुण्ठा कर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः ॥ ७ ॥

कृष्णग्रीवश्शितिं कक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः ।

कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्त उं षस्याः ॥ ८ ॥

शिल्पावैश्वदेव्यो रोहिण्य स्यवंयो वाचेऽविज्ञाता अदित्यै ।

सरूं पाधात्रे वंत्सतर्यो देवानाम्पत्नीभ्यः ॥ ९ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

कृष्णग्रीवा आग्नेयाश्शितिभ्रवो वसूंनाः रोहिता रुद्राणाम् ।

श्वेता अंव रोकिणं आदित्यानान्नभो रूषाः पार्जन्याः ॥ १ ॥

उन्नत ऋषभो वामनस्त ऐन्द्रा वैष्णवाः-

उंन्नतश्शिति बाहुश्शिति पृष्ठस्त ऐन्द्रा बार्हस्पत्याः ।

शुकंरूपा वाजिनाः कल्माषा आग्निमारुताश्श्यामाःपौष्णाः ॥ २ ॥

एता ऐन्द्राग्ना द्विं रूपाः अंग्नीषोमीयाः वामनाः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अंनड्वाहं आग्ना वैष्णवाः ।
वशाः मैत्रावरुण्योऽन्यतं एन्यो मैत्र्यः ॥ ३ ॥
कृष्णग्रीवाः आग्नेया बभ्रवंस्सौम्याःश्वेतावायव्याः-
अ विज्ञाताःअदित्यै ।
सरूपा धात्रे वंत्सतयो देवानाम्पत्नीभ्यः ॥ ४ ॥
कृष्णाः भौ माधूम्राः आन्तरिक्षा बृहन्तों दिव्याः ।
शबलावैद्युतास्सिध्मास्तारकाः ॥ ५ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

धूम्रान्वंसन्तायालंभते श्वेतान्ग्रीष्मायं कृष्णान्वर्षाभ्योऽरुणाञ्छरदें ।
पृषंतो हेमन्तायं पिशङ्गाञ्छिशिराय ॥ १ ॥
त्र्यवंयो गायत्र्यैपञ्चावयस्त्रिष्टुभें दित्यवाहो जगंत्यै ।
त्रिवत्सा अंनुष्टुभें श्रुर्यवाहंउष्णिहें ॥ २ ॥
पष्ठवाहों विराजं उक्षाणों बृहत्या ऋंषभाःककुभें ।
अनड्वाहःपङ्क्त्यै धेनवोऽतिच्छन्दसे ॥ ३ ॥
कृष्णग्रीवा आग्नेया बभ्रवंस्सौम्याः-
उंपध्वस्तास्सावित्रा वंत्सतर्यंस्सारस्वत्यंश्श्यामाःपौष्णाः ।
पृश्नंयो मारुता बंहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्ता स्संञ्चरा एताऐन्द्राग्नाः ।

कृष्णावारुणाः पृश्नयो मारुताः कायास्तूपराः ॥ ५ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

अग्नयेऽनीकवते प्रथमजानालंभते मरुद्भ्यंस्सा-

न्तपनेभ्यंस्सवात्यान्मरुद्भ्यो गृहमेधिभ्यो बाष्किहान् ।

मरुद्भ्यः क्रीळिभ्यंस्सꣳसृष्टान्मरुद्भ्यस्स्वतंवद्भ्योऽनुसृष्टान् ॥ १ ॥

उक्तास्संञ्चरा एता ऐन्द्राग्नाः ।

प्राश्शृङ्गामाहेन्द्राबंहुरूपा वैश्वकर्मणाः ॥ २ ॥

धूम्राः बभ्रुनीकाशाः पितृणाꣳ सोमंवताम्बभ्रवो-

धूम्रनी काशाः पितृणाम्बर्हिषदाम् ।

कृष्णा बभ्रुनीकाशाः पितृणामंग्निष्वात्तानां

कृष्णाःपृषंन्तस्त्रैयम्बकाः ॥ ३ ॥

उक्तास्संञ्चरा एताश्शुनासीरीयाः ।

श्वेताः वायव्याः श्वेतास्सौर्याः ॥ ४ ॥

वसन्तायंकपिञ्जलानालंभते ग्रीष्माय कलवि-

ङ्कान्वर्षाभ्यंस्तित्तिरींञ्छरदे वर्त्तिकाः ।

हेमन्ताय ककंराञ्छिशिराय विकंकरान् ॥ ५ ॥ (४)

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(पंचमोऽनुवाकः ५)

समुद्राय शिशुमारानालंभते पर्जन्याय मण्डूकानद्भ्यो मत्स्यान् ।
मित्राय कुलीपयान्वरुणाय नाक्रान् ॥ १ ॥
सोमाय हꣳसानालंभते वायवे बलाका इन्द्राग्निभ्याङ्कुञ्चान् ।
मित्राय मद्गून्वरुणायचक्रवाकान् ॥ २ ॥
अग्नये कुटरूना लंभते वनस्पतिभ्य उलूकानग्नीषोमाभ्याश्चाषान् ।
अश्विभ्याम्मयूरान्मित्रा वरुणाभ्याङ्कपोतान् ॥ ३ ॥
सोमाय लबानालंभतेत्वष्ट्रे कौलीकान्गोषादीर्देवानाम्पत्नीभ्यः ।
कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ॥ ४ ॥
अह्नेपारावता नालंभते रात्र्यैसीचापूरंहोरात्रयोस्सन्धिभ्यो जतूः ।
मासेभ्यो दात्यौहान्त्सँव्व त्सराय महतस्सुपर्णान् ॥ ५ ॥(५)

—०—

(षष्ठोऽनुवाकः ६)

भूम्या आखूनालंभतेऽन्तरिक्षाय पाङ्त्रान्दिवेकशान् ।
दिग्भ्यो नकुलान्ब भ्रुकानवान्तरदिशाभ्यः ॥ १ ॥
वसुभ्य ऋश्यानालंभते रुद्रेभ्यो रुरूना दित्येभ्योन्यङ्कून् ।
विश्वेभ्यो देवेभ्यःपृषतान्त्साध्येभ्यःकुलुङ्गान् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईशानाय परस्वत आलंभते मित्रायं गौरान्वरुणाय महिषान् ।

बृहस्पतंये गवयाꣳस्त्वष्टुउष्ट्रान् ॥ ३ ॥

प्रजापतये पुरुषान्हस्तिन आलंभते वाचेप्लुषीन् ।

चक्षुषे मशकाञ्छ्रोत्रायभृङ्गाः ॥ ४ ॥

प्रजापतयेच वायवे च

गोमृगो वरुणा यारण्यो मेषोयमाय कृष्णो मनुष्यराजायं मर्कटः ।

शार्दूलायं रोहिदृषभायं गवयीक्षि प्रश्येनाय वर्तिकानीलङ्गोः-

क्रिमिस्समुद्रायं शिशुमारो हिमवते हस्ती ॥ ५ ॥ (६)

(सप्तमोऽनुवाकः ७)

मयुः प्राजापत्य उलोहलिक्ष्णो वृषदꣳशस्ते

धात्रे दिशाङ्कङ्को धुङ्क्षाग्नेयी ।

कलविङ्को लोहिताहिः पुष्कर सादस्तेत्वाष्ट्रा वाचे क्रुञ्चः ॥ १ ॥

सोमाय कुलुङ्ग आरण्योऽजोनकुलश्शकाते पौष्णाः

क्रोष्टा मायोरिन्द्रस्यगौरमृगः ।

पिद्वोन्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ॥ २ ॥

सौरी बलाका शार्गस्सृंजयश्शयाण्डकस्ते मैत्रास्सरस्वत्यै

शारिः पुरुषवाक्श्वाविद्भौमी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शार्दूलो वृकः पृदाकुस्ते मन्यवे सरंस्वते शुकः पुरुष वाक् ॥ ३ ॥

सुपर्णः पार्जन्य आतिर्वाहसोदर्विदाते वायवे

बृहस्पतये वाचस्पतये पैङ्गराजोऽलजआन्तरिक्षः ।

प्लवो मद्गुर्मत्स्यस्तेनं दीपतयें द्यावापृथिवी यंःकूर्मः ॥ ४ ॥

पुरुषमृगश्चन्द्रमंसो गोधा कालंकादार्वा घाटस्ते वनस्पती-

नाङ्कृक वाकुंस्सावित्रो हं॒सोवातंस्य ।

नाक्रोमकंरः कुलीपय स्ते कूंपारस्य हियैशल्यंकः ॥ ५ ॥ (७)

(अष्टमोऽनुवाकः ८)

एण्यह्नो मण्डूको मूषिका तित्तिरिस्तेसर्पाणाँल्लोपाश

आश्विनः कृष्णो रात्र्यैं ।

ऋक्षों जतूस्सुंषिलीकात इंतर जनानाञ्झहं का वैष्णवी ॥ १ ॥

अन्य वापोंऽर्ध मासानामृश्यौमयूरं स्सुपर्णस्ते

गंन्धर्वाणामपामुद्रो मासाङ्कश्यपंः ।

रोहित्कुंण्ड्रणाची गोलत्तिं कातेंऽप्सरसाम्मृत्यवेंऽसितः ॥ २ ॥

वर्षा हू ऋंतूनामाखुः कशों मान्थालस्ते पिंतृणा-

म्बलाया जगरो वसूंनाङ्कपिञ्जंलः ।

कपोत उलूंकश्शशास्ते निर्ऋंत्यै वरुंणायारण्यो मेषः ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीन सस्ते

मत्या अरण्याय सृमरोरुरू रौद्रः ।

क्वयिः कुटरुं दात्यौ हस्ते वाजिना ङ्कामाय पिकः ॥ ४ ॥

खड्गो वैश्वदेवश्श्वा कृष्णः कर्णो

गर्दभस्तरक्षुस्ते रक्ष सा मिन्द्राय सूकरः ।

सिꣳहो मारुतः कृकलासःपिप्पकाशकुनिस्ते

शरव्यायै विश्वैपान्देवानाम्पृषतः ॥ ५ ॥ ८ ॥

अश्वस्तु परो नव (९) कृष्ण ग्रीवाः पञ्च (५) धूम्रान्वसन्ताय (५) अग्नयेऽनीकवते (५) समुद्राय शिशुमारान् (५) भूम्याआखून् (५) मयुः प्राजापत्यः (५) एण्यह्नइतिच पञ्च पञ्च (५) अष्टानुवाकेषु चतुश्चत्वारिंशत् (४४) शितिभ्रवश्च श्वेतास्तुपध्वस्ता यथाक्रमम् । कृष्णस्तथाचप्राश्नृङ्गाः शुनासीरी वदे द्बुधः (१)

इति शुक्लयजुर्वेद काण्व संहितापाठे षड्विंशत्यध्यायः

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्

अथ नवमोऽध्यायः

(प्रथमोऽनुवाकः १)

शादन्दद्भिरवं कान्दन्तमूलैर्मृदम्बस्वैस्ते

गान्दꣳष्ट्राभ्याꣳ सरस्वत्या अग्रजिह्वञ्जिह्वाया उत्सादम् ॥

अवक्रन्देन तालु वाजꣳहनुभ्यामप आस्येन वृषणमाण्डाभ्याम् ॥ १ ॥

आदित्याञ्श्मश्रुभिः पन्थानम्भ्रूभ्यान्द्यावापृथिवी

वर्तोभ्याँविद्युतङ्कनीनकाभ्याम् ।

शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्य वार्या

इक्षवोवार्याऽणिपक्ष्माणिपार्या इक्षवः ॥ २॥ (१)

(द्वितीयोऽनुवाकः २)

वातम्प्राणेनापानेन नासिके उपयाममधरेणौष्ठेन सदुत्तरेण ।

प्रकाशेनान्तर मनूकाशेन वाह्यन्निवेष्यम्मूर्ध्नस्तन

यित्नुन्निर्बाधेनाशनिम्मस्तिष्केण विद्युतङ्कनी नकाभ्याम् ॥ १ ॥

कर्णाभ्याꣳ श्रोत्रꣳ श्रोत्राभ्याङ्कर्णौ

तेदनीमधरकण्टेनापःशुष्ककण्टेन चित्तम्मन्याभिः ।

अदितिꣳ शीर्ष्णा निर्ऋतिन्निर्जर्ज्जल्येन शीर्ष्णासङ्क्रोशैः

प्राणान्रेष्माणꣳ स्तुपेन ॥ २ ॥ (२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

मशकान्केशैरिन्द्रँ स्वपसा वहेन बृहस्पतिँ शकुनि सादेन कूर्मान् ।
शफैराक्रमणँ स्थूराभ्यामृक्षलाभिः कपिञ्जलान् ॥ १ ॥
जवञ्जङ्घाभ्यामध्वानम्बाहुभ्याञ्जाम्बीलेनारण्यमग्निमतिरुग्भ्याम् ।
पूषणन्दोर्भ्यामश्विनाअँ साभ्याँ रुद्रँ रोराभ्याम् ॥ २ ॥ (३)

(चतुर्थोऽनुवाकः ४)

अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया पाञ्चतुर्थी ।
अदित्यै पञ्चमी न्द्राण्यै षष्ठी मरुताँ सप्तमी बृहस्पतैरष्टमी ।
अर्यम्णो नवमी धातुर्दशमीन्द्र स्यैकादशी
वरुणस्य द्वादशी यमस्य त्रयोदशी ॥ १ ॥ (४)

(पंचमोऽनुवाकः ५)

इन्द्राग्नयोः पक्षतिस्सरस्वत्यै निपक्षतिर्मित्रस्य
तृतीया सोमस्य चतुर्थी ।
निर्ऋत्यै पञ्चम्यग्नीषोमयोः षष्ठी
सर्पाणाँ सप्तमी विष्णोरष्टमी ।
पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी
वरुणस्य द्वादशी यम्यै त्रयोदशी ।
द्यावापृथि व्योर्दक्षिणम्पार्श्वव्विश्वेषान्देवाना मुत्तरम् ॥ १ ॥ (५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(षष्ठोऽनुवाकः ६)

मरुताᳪ स्कन्धा विश्वेषान्देवानाम्प्रथमा

कीकंसा रुद्राणान्द्वितीया दित्याना

न्तृतीया वायोः पुच्छं मग्नीषोमयो भासदौ ।

कुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊरुभ्याम्मित्रावरुणा

अल्गाभ्यामा क्रमणᳪ स्थूराभ्याम्बलङ्कुष्ठाश्याम् ॥ १ ॥ (६)

(सप्तमोऽनुवाकः ७)

पूषणंव्वनिष्ठनान्धाहीन्त्स्थूल गुदया सर्पान्गुदाभिर्विहुतं

आन्त्रैरपो व स्तिना वृषणमाण्डाभ्याम् ।

वाजिनᳪ शेपेन प्रजाᳪ रेतसा चाषान्पित्तेनं

प्रदरान्पायुना कूश्माञ्छकपिण्डैः ॥ १ ॥ (७)

(अष्टमोऽनुवाकः ८)

इन्द्रस्य क्रोडोऽदित्यै पाजस्यन्दिशाञ्ज त्रवोऽदित्यै भसत् ।

जीमूतान्हृदयौपशेनान्तरिक्षम्पुरी तता ॥ १ ॥

नभ उदर्येण चक्रवाकौ मतस्नाभ्यान्दि वं व्वृक्काभ्याङ्गिरीन्प्लाशिभिः ।

उपलान्प्लीह्ना वल्मीकान्क्लोमभिर्ग्लौभिगुल्मान्हि राभिस्स्रवन्तीः ।

हृदान्कुक्षिभ्याᳪ समुद्रमुदरेण वैश्वानरम्भस्मना ॥ २ ॥ (८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नवमोऽनुवाकः ९)

विधृतिन्नाभ्या धृतꣳ रसेनापो यूष्णामरीची-

र्विप्रुड्भिर्नीहारमूष्मणा

शीनँव्वसं याप्रुष्वाअश्रुभिः ।

ह्रादुनीर्दूषीकाभिरस्ना रक्षाꣳसि चित्राण्यङ्गैर्नक्षत्राणि

रूपेणपृथिवीन्त्वचा जुम्बकाय स्वाहा ॥ ९ ॥ (९)

(दशमोऽनुवाकः १०)

हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।

सदा धार पृथि वीन्द्यामुते माङ्कस्मै देवाय हविषा विधेम ॥ १ ॥

यः प्राणतो निमिषतो महित्वै क इद्राजा जगतो बभूव ॥

य ईशेअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ २ ॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳरसया सहाहुः ॥

यस्ये माः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ ३ ॥

यआत्मदाबलदाय स्य विश्व उपासते प्रशिषँय्यस्य देवाः ।

यस्य च्छायामृतँय्यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ ४ ॥(१०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(एकादशोऽनुवाकः ११)

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥ १ ॥

देवानाम्भद्रा सुमति र्ऋजूयतान्देवानाᳬ रातिरभि नो निवर्तताम् ।
देवानाᳬ सख्यमुप सेदिमा वयन्देवा न आयुः प्रतिरन्तु जीवसे ॥ २ ॥

तान्पूर्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्ष मस्रिधम् ।
अर्यमणँ व्वरुणᳬ सोममश्विना सरस्वती नस्सुभगा मयस्करत् ॥ ३ ॥

तन्नो वातो मयोभुवातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणस्सोमसुतो मयो भुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ॥ ४ ॥

तमीशा नञ्जगत स्तस्थुषस्पतिं न्धियञ्जिन्वमवसे हूमहे व यम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धस्स्वस्तये ॥ ५ ॥

स्वस्तिन इन्द्रो वृद्धश्रवास्स्वस्तिनः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिस्स्वस्तिनो बृहस्पतिर्दधातु ॥ ६ ॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्नि जिह्वा मनवस्सूर चक्षसो विश्वेनो देवा अव सागमन्निह ॥ ७ ॥

भद्रङ्कर्णेभिः श्रुणुयामदेवा भद्रम्पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेम देवहितँय्यदायुः ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शत मिन्नु शरदो अन्ति देवा यत्रानश्चक्राजरसंन्तनूनाम् ।
पुत्रासो यत्रं पितरो भवंन्ति मानों मध्यारीरिषतायुर्गन्तोंः ॥ ९ ॥

अदितिर्द्यौरदितिरन्तरिक्षमदिति र्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदिति र्जनित्वम् ॥ १० ॥ ११

—०—

(द्वादशोऽनुवाकः १२)

मानों मित्रो वरुणो अर्यमायुरिन्द्रं ऋभुक्षा मरुतः परिख्यन् ।
यद्वाजिनों देव जातस्य सप्तेः प्रवक्ष्यामों विदथें वीर्याणि ॥ १ ॥

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिङ्गृभीताम्मुंखतो नयंन्ति ।
सुप्राङजो मेम्यंद्विश्वरूप इन्द्रापूष्णोः प्रियमप्यैति पाथः ॥ २ ॥

एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागोनीयते विश्वदेव्यः ।
अभिप्रियँय्यत्पुरोळाशमर्वतात्वष्टे देंनऽ-
सौश्रवसायं जिन्वति ॥ ३ ॥

यद्धविष्यमृतुशो देवयानन्त्रिर्मानुंषाः पर्यश्वन्नयंन्ति ।
अत्रापूष्णः प्रथमो भाग एति यज्ञन्देवेभ्यः प्रतिवेदयंन्नजः ॥ ४ ॥

होताऽध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उतशऽस्ता सुविप्रः ॥
तेनं यज्ञेन स्वरङ्कृतेन स्विष्टेन वक्षणा आपृणध्वम् ॥ ५ ॥

37

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यूपव्रस्का उत ये यूपवाहाश्चषालँय्ये अश्वयूपाय तक्षति ।
ये चार्वते पचनꣳ सम्भरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥ ६ ॥
उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीत पृष्ठः ॥
अन्वेनँव्विप्रा ऋषयोमदन्ति देवानाम्पुष्टे चकृमा सुबन्धुम् ॥ ७ ॥
यद्वाजिनो दाम सन्दानमर्वतोया शीर्षण्या रशना रज्जुरस्य ।
यद्वाघास्य प्रभृतमास्ये तृणꣳ सर्वा ता तेअपि देवेष्वस्तु ॥ ८ ॥ (१२)

—०—

(त्रयोदशोऽनुवाकः १३)

यद श्वस्य क्रविषो मक्षिकाशयद्वा स्वरौस्वधितौ रिप्तमस्ति ।
यद्धस्तयोश्श मितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥ १ ॥
यदूवध्यमुदरस्यापवातिय आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूतमेधꣳ शृतपाकम्प चन्तु ॥ २ ॥
यत्ते गात्रादग्निना पच्यमानादभि शूलन्निहतस्यावधावति ।
मातद्भूम्यामाश्लिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ३ ॥
ये वाजिनम्परिपश्यन्ति पक्वँय्य ईमाहुस्सुरभिर्निर्हरेति ।
ये चार्वतो माꣳसभिक्षामुपासत उतोतेषामभि गूर्तिर्न इन्वतु ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्नीक्षंणम्मांस्पचंन्या उखाया या पात्राणि यूष्ण आसेचंनानि ।
ऊष्मण्यऽपिधाना चरूणामङ्कास्सूनाः परिभूषन्त्यश्वम् ॥ ५ ॥

मा त्वाग्निर्ध्वनयीद् धूमगंन्धिर्मोखा भ्राजंन्त्यभि विक्त जघ्रिः ।
इष्टँव्वीतमभिगूंतं व्वषट्कृतन्तन्देवासः प्रति गृभ्णन्त्यश्वम् ॥ ६ ॥

निक्रमंणन्निषदंनँव्विवर्तनँय्यच्च पड्वींशमर्वतः ।
यच्चंपपौ यच्चं घासिञ्जघास सर्वा ता ते अपिदेवेष्वंस्तु ॥ ७ ॥ १३

(चतुर्दशोऽनुवाक १४)

यदश्वाय वासं उपस्तृणन्त्यंधीवासँय्याहिरंण्यान्यस्मै ।
सन्दानमर्वन्तम्पड्वींशम्प्रिया देवेष्वायामयन्ति ॥ १ ॥ १४ ॥

(पञ्चदशोऽनुवाकः १५)

इमानु कम्भुवंनासीषधामेन्द्रंश्च विश्वेंच देवाः ।
आदित्यैरिन्द्रस्सगंणो म रुद्भिरस्मभ्यंम्भेषजा करत् ।
यज्ञश्चं नस्तन्वंश्च प्रजांचोदित्यैरिन्द्रंस्सह सीष धाति ॥ १ ॥
अग्ने त्वन्नो अन्तंम उत त्राता शिवोभंवावरूथ्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसुरग्निर्वसुश्रवा अच्छानक्षिद्युमत्तमꣳ रयिन्दाः ।
तन्त्वा शोचिष्ठ दीदिवस्सुम्नाय नूनमीमहे सखिभ्यः ॥ २ ॥ १५ ॥

शादन्दद्भिर्द्वे (२) वातम्प्राणेन (२) मशकान्केशैरिति-
चद्वेद्वे (२) अग्नेः पक्षतिरेका (१) इन्द्राग्न्योःपक्षतिः (१)
मरुताꣳस्कन्धाः (१) पूषणँव्वनिष्ठुने त्येकैका (१)
इन्द्रस्यक्रोळोद्वे (२) विधृतिमेका (१) हिरण्यगर्भश्चतस्रः (४)
आनोदश (१०) मानोऽष्ट (८) यदश्वस्यसप्त (७)
यदश्वायैका (१) इमानुकन्द्वे (२) पञ्चदशानुवाकेषु
पञ्चचत्वारिꣳशत् (४५)

इति शुक्लयर्वेद काण्वसँहितापाठे सप्तत्रिंशतितमोऽध्यायः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ अष्टाविंशतितमोऽध्यायः

(प्रथमोऽनुवाकः (१)

अग्निश्च पृथिवी च सन्नंते ते मे सन्नंमतामदो वायुश्चान्तरिक्षञ्च-
सन्नंते ते मे सन्नंमतामद आदित्यश्च द्यौश्च सन्नंते ते मे
सन्नंमतामद आपश्च वरुणश्च सन्नंते ते मे सन्नंमतामदः ।
सप्त सꣳसदो अष्टमी भूंतसाधनी ॥ १ ॥
सकामाँ२अध्वंनस्कुरु संज्ञानंमस्तु मेऽमुना ।
यथेमाँ॒ वाचं॑ कल्याणीमावदानिजनेभ्यः ॥ २ ॥
ब्रह्मराजन्याभ्याꣳशूद्राय चार्याय च स्वाय चारणाय च ।
प्रियो देवानान्दक्षिणायै दातुरिह भूंयासमयम्मे-
कामस्समृंध्यता मुपं मादो नंमतु ॥ ३ ॥ (१)

(द्वितीयोऽनुवाकः २)

बृहंस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुंमज्जनेषु ।
यद्दीदयच्छवंस ऋतप्रजात तदस्मासु द्रविणन्धेहिचित्रम् ।
उपयामगृंहीतोऽसि बृहस्पतंयेत्वैष ते योनिर्बृहस्पतंये त्वा ॥ १ ॥ (२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

इन्द्र गोमन्निहायाहि पिबा सोमंꣳशतक्रतो ।

विद्यद्भिर्ग्रावभिस्सुतम् ।

उपयामगृहीतोऽसीन्द्राय त्वा गोमत एष-

ते योनिरिन्द्राय त्वा गोमते ॥ १ ॥ ३

(चतुर्थोऽनुवाकः ४)

ऋतावानँव्वैश्वानरमृतस्य ज्योतिषस्पतिम् ।

अजस्रङ्घर्ममीमहे ।

उपयाम गृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (४)

(पचमोऽनुवाकः ५)

वैश्वानरꣳ हवामह ऋतस्य ज्योतिषस्पतिम् ।

अजस्रङ्घर्ममीमहे ।

उपयामगृ हीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (५)

(षष्ठोऽनुवाकः ६)

वैश्वानरो न ऊतय आप्रयातु परावतः ।

अग्निरुक्थेन वाहसा ।

उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥ १ ॥(६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(सप्तमोऽनुवाकः ७)

वैश्वानरस्य सुमतौ स्याम राजा हि कम्भुवनानामभिश्रीः ।

इतो जातो विश्वमिदँव्विचष्टे वैश्वानरो यतते सूर्येण ।

उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥ १ ॥ (७)

(अष्टमोऽनुवाकः ८)

मरुत्वाँ२इन्द्र वृषभो रणाय पिबा सोमं मनुष्वधम्मदाय ।

आसिञ्चस्व जठरे मध्व ऊर्मिन्त्वꣳ राजासि प्रतिपत्सुतानाम् ।

उपयामगृहीतोऽसीन्द्रायत्वा मरुत्वंत-

एषते योनिरिन्द्रायत्वा मरुत्वंते ॥ १ ॥ (८)

(नवमोऽनुवाकः ९)

महाँ२इन्द्रो वज्रहस्तःषोळशी शर्मयच्छतु ।

हन्तु पाप्मानँय्योऽस्मान्द्वेष्टि ।

उपयामगृहीतोऽसीन्द्रायत्वा षोळशिने-

एषते योनिरिन्द्रायत्वा षोळशिने ॥ १ ॥ (९)

(दसमोऽनुवाकः १०)

अग्निर्ऋषिः पवमानःपाञ्चजन्यः पुरोहितः ।

तमीमहे महागयम् ॥ १ ॥ (१०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(एकादशोऽनुवाकः ११)

अनु वीरैरनु पुष्यास्म गोभि रन्वश्वैरनु सर्वेण पुष्टैः ।
अनु द्विपदानु चतुष्पदा वयन्देवानो यज्ञमृतु थानयन्तु ॥ १ ॥ (११)

(द्वादशोऽनुवाकः १२)

आनो गोत्रा दर्दहि गोपते गास्समस्मभ्यं सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सुमघवन्बोधि गोदाः ॥१॥(१२)

अग्निश्चतिस्रः (३) बृहस्पतएका (१) इन्द्रगोमन् (१) ऋतावानम् (१) वैश्वानरम् (१) वैश्वानरः (१) वैश्वानरस्यसुमतौ (१) मरुत्वाँरइन्द्रः (१) महाँरइन्द्रः (१) अग्निर्ऋषिः (१) अनुवीरैः (१) आनोगोत्राइत्येकैका (१) द्वादशानुवाकेषु चतुर्दश (१४)

इति शुक्लयजुर्वेदकाण्वसँहितापाठेअष्टाविंशतितमोऽध्यायः

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ एकोन - त्रिंशत्तमोऽध्यायः

(प्रथमोऽनुवाकः १)

समा स्त्वाग्न ऋतवो वर्धयन्तुसंव्वत्सऽरा ऋषयो यानि सत्या।

सन्दिव्येनदीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः ॥ १ ॥

सञ्चेध्यस्वाग्ने प्रचबोधयैनमुच्चतिष्ठ महते सौभगाय।

माचं रिषदुपसत्तातें अग्ने ब्रह्माणस्ते य शसस्सन्तु मान्ये ॥ २ ॥

त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने सँव्वरणे भवा नः।

सपत्नहानो अभिमातिजिच्चस्वे गये जागृह्यप्रयुच्छन् ॥ ३ ॥

इहैवाग्ने अधि धारया रयिम्मात्वा निक्रन्पूर्वचितो निकारिणः।

क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतान्ते अनिष्टृतः ॥ ४

क्षत्रेणाग्ने स्वायुस्सꣳरभस्व मित्रेणाग्ने मित्रधेयेयतस्व।

सजातानाम्मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥ ५ ॥

अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने।

विश्वाह्यग्ने दुरिता सहस्वाथा स्मभ्यꣳ सहवीरꣳ रयिन्दाः ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनाधृष्यो जातवेदा अनिष्टृतो विराळग्ने क्षत्रभृद्दीदिहीह ।

विश्वा आशाः प्रमुञ्चन्मानुषीर्भियश्शिवाभिरद्य परिपाहि नो वृधे ॥ ७ ॥

बृहस्पते सवितर्बोधयैनꣳ सꣳशितञ्चित्सन्तराꣳ सꣳशिशाधि ।

वर्धयैनम्महते सौभगाय विश्वे एनमनुमदन्तु देवाः ॥ ८ ॥

अमुत्रभूयादथ यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।

प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥ ९ ॥

उद्वयन्तमसस्परिस्वः पश्यन्त उत्तरम् ।

देवन्देवत्रा सूर्यमगन्मज्योतिरुत्तमम् ॥ १० ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्राशोचीꣳष्यग्नेः ।

द्युमत्तमा सुप्रतीकस्य सूनोः ॥ १ ॥

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः ।

पथो अनक्तु मध्वा घृतेन ॥ २ ॥

मध्वा यज्ञन्नक्षसे प्रीणानो नराशꣳसो अग्ने ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुक्रतुर्देवस्सँविता विश्ववारः ॥ ३ ॥

अच्छायमेति शवसा घृतेनेळानो वह्निर्नमसा ।

अग्निँ स्रुचो अध्वरेषु प्रयत्सु ॥ ४ ॥

स यक्षदस्य महिमानमग्नेस्सईम्मन्द्रा सुप्रयसः ।

वसुश्चेतिष्ठो वसुधातमश्च ॥ ५ ॥

द्वारोदेवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः ।

उरुव्यचसो धाम्ना पत्यमानाः ॥ ६ ॥

ते अस्य योषणे दिव्ये नयोना उषासा नक्ता ।

इमँय्यज्ञमवतामध्वरन्नः ॥ ७ ॥

दैव्या होतारा ऊर्ध्वमध्वरन्नोऽग्नेर्जिह्वा मभि गृणीतम् ।

कृणु तन्नस्स्विष्टिम् ॥ ८ ॥

तिस्रो देवीर्बर्हिरेदँ सदन्त्विळा सरस्वती भारती ।

महीगृणाना ॥ ९ ॥

तन्नस्तुरीपमद्भुतम्पुरुक्षु त्वष्टा सुवीरम् ।

रायस्पोषँव्विष्यतु नाभिमस्मे ॥ १० ॥

वनस्पतेऽवसृजा रराणस्त्मना देवेषु ।

अग्निर्हव्यँ शमिता सूदयाति ॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् ।

विश्वेदेवा हविरिदञ्जुषताम् १२ (२)

(तृतीयोऽनुवाकः ३)

पीवो अन्नारयि वृधस्सुमेधाः श्वेतस्सिषक्ति नियुतामभिश्रीः ।

ते वायवे समनसो वितस्थुर्विश्वेन्नरस्स्वपत्यानिचक्रुः ॥ १ ॥

राये नु यञ्जज्ञतूरोदसीमेराये देवी धिषणा धाति देवम् ॥

अध वायुन्नियुतस्सश्चत स्वा उतश्वेतँव्व सु धितिन्निरेके ॥ २ ॥

वायुरग्रे गा यज्ञप्रीस्साकञ्जन्मनसा यज्ञम् ।

शिवो नियुद्भिश्शिवाभिः ॥ ३ ॥

प्रयाभिर्यासि दाश्वाꣳसमच्छा नियुद्भिर्वाय इष्टये दुरोणे ।

निनो रयिꣳ सु भोजसँय्युवस्व निवीरङ्गव्यमश्व्यचश्वराधः ॥ ४ ॥

वायो ये ते सहस्रिणो रथासस्तेभिरागहि ।

नियु त्वा न्त्सोम पीतये ॥ ५ ॥

एकं याच दचभिश्च स्वभूते द्वाभ्यामिष्टये विꣳशती चं ।

तिसृभिश्च वहसे त्रिꣳ शताचनियुद्भि र्वाय इहताविमुञ्च ॥ ६ ॥

नियुत्वान्वाय आगं ह्ययꣳ शुक्रो अयामि ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्तासि सुन्वतो गृहम् ॥ ७ ॥

वायो शुक्रो अयामि ते मध्वो अग्रन्दिविष्टिषु ।

आयाहि सोमपीतये स्पार्हो देव नियुत्वता ॥ ८ ॥

आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ।

वायो अस्मिन्त्सवने मादयस्वयूयम्पात स्वस्तिभिस्सदा नः ॥ ९ ॥

तवं वायवृतस्पते त्वष्टुर्जामातरद्भुत ।

अवाꣳस्यावृणीमहे ॥ १० ॥ (३)

(चतुर्थोऽनुवाकः ४)

हिरण्य गर्भ इत्येषः ।

ये नद्यौरुग्रा पृथिवीचं दृहूळा येन स्वस्तभितँ य्येन नाकः ।

यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ १ ॥

यङ्क्रन्दसी अवसा तस्तभाने अभ्यैक्षेताम्मनसा रेजमाने ।

यत्राधिसूर उदिं तो विभाति कस्मै देवाय हविषाविधेम ॥ २ ॥

आपो हयद्बृहतीर्विश्वमायन्गर्भन्दधाना जनयन्तीरग्निम् ।

ततो देवानाꣳसमवर्तताऽसुरेकः कस्मै देवाय हविषा विधेम ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यश्चिदापो महिना पर्यपश्यद्दक्षन्दधाना जनयन्तीर्यज्ञम् ।

यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ।

मानो हिꣳसीज्जनिता यः पृथिव्या यो वादिवꣳ सत्यधर्मा जजान ।

यश्चापश्चन्द्राबृहतीर्जजान कस्मै देवाय हविषा विधेम ।

प्रजापते नत्वदेतान्यन्यो विश्वाजातानि परिता बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तुवयꣳस्यामपतयो रयीणाम् ॥ ४ ॥ (४)

(पचमोऽनुवाकः ५)

अग्न आयूꣳषि पवस आसुवोर्जमिषंश्चनः ।

आरेबाधस्व दुच्छुनाम् ॥ १ ॥

अग्ने पवस्व स्वपा अस्मे वर्चस्सुवीर्यम् ।

दधद्रयिम्मयिपोषम् ॥ २ ॥

अग्नि ऋषिःपवमानः पाञ्चजन्यः पुरोहितः ॥

तमीमहे महागयम् ॥ ३ ॥

अभित्वा शूरनोनुमोऽदुग्धा इव धेनवः ॥

ईशानमस्य जगतस्स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नत्वावाँ२अन्यो दिव्योन पार्थिवोन जातोनजंनिष्यते ।

अश्वा यन्तो मघवन्निन्द्र वाजिनो गव्यन्तंस्त्वा हवामहे ॥ ५ ॥

त्वामिद्धि हवामहे सातौ वाजंस्य कारवंः ।

त्वाँव्वृत्रेष्विन्द्र सत्पतिन्नरस्त्वांकाष्ठास्ववतः ॥ ६ ॥

सत्वन्नंश्चित्र वज्रहस्त धृष्णुया महस्तवानो अंद्रिवः ।

गामश्वंᳫ रथ्यंमिन्द्र स ङ्किर सत्रावाजन्न जिग्युषें ॥ ७ ॥

कया नाश्चित्र आभुवदूती सदावृधस्सखा ।

कया शचिष्ठया वृता ॥ ८ ॥

कस्त्वा सत्यो मदानाम्मᳫहिष्ठो मत्सदन्धसः ।

दृढ्ळाचिदारु जेवसु ॥ ९ ॥

अभीषुणस्सखीनामविता जरितृणाम् ।

शतम्भं वास्यूतयें ॥ १० ॥

यज्ञायंज्ञावो अग्नयें गिरा गिरा चदक्षसे ।

प्रप्रंवयममृतंञ्जातवेदसम्प्रियम्मित्रन्नशंᳫ सिषम् ॥ ११ ॥

ऊर्जो नपातᳫ सहिनाऽयमस्मयुर्दाशेम हव्यदातये ।

भुवद्वाजेष्ववि‍ता भुवंद्वृध उतत्राता तनूनाम् ॥ १२ ॥ (५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(षष्ठोऽनुवाकः ६)

सँव्वत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि ।
उष संस्ते कल्पन्तामहोरात्रास्तें कल्पन्तामर्धमासास्तें कल्पन्ता
म्मासास्ते कल्पन्तामृतवस्ते कल्पन्ताꣳ सँव्वत्सरस्तें कल्पताम् ॥ १ ॥
प्रेत्या एत्यै सञ्चाञ्च प्रचंसा रय ।
सुपर्णचिदंसि तया देवतंयाङ्गिर स्वद्ध्रुवस्सीद ॥ २ ॥ (६)

समास्त्वा दश (१०) ऊर्ध्वा द्वादश (१२) पीवो
अन्नादश (१०) हिरण्यगर्भश्चतस्रः (४) अग्नआयूꣳ
पिद्वादश (१२) सँव्वत्सरोद्वे (२) षडनु वाकेषु
पञ्चाशत् (५०) इषेदेवस्य समाःपञ्चाशत्

इति शुक्लयजुर्वेदकाण्व संहितापाठे एकोनत्रिंशतितमोऽध्यायायः

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ त्रिंशतितमोऽध्यायः

(प्रथमोऽनुवाकः (१)

होतायक्षत्समिधेन्द्रंमिळस्पदे नाभा पृथिव्याः अधि ।
दिवो वर्ष्मन्त्समिध्यत ओजिंष्ठश्चर्षणी सहाँ व्वे-
त्वाज्यंस्य होतर्यजं ॥ १ ॥

होतायक्ष त्तनूनपातमूतिभिर्जेतांरमपं राजितम् ।
इन्द्रंन्देवꣳ स्वर्विदंम्पथिभिर्मधुंमत्त मैर्नराशꣳसैंन-
तेजंसा बे त्वाज्यंस्य होतर्यजं ॥ २ ॥

होतायक्षदिळाभिरिन्द्रंमीळितमाजुह्वांनमर्मत्यम् ।
देवो देवैस्सवीर्यो वज्रहस्तः पुरन्दरो वे त्वाज्यंस्य होतर्यजं ॥ ३ ॥

होता यक्षद्बर्हिषीन्द्रंन्निषद्वरंव्वृंपभन्नर्यापसम् ।
वसुंभी रुद्रैरादित्यैस्सयु ग्भिर्बर्हिरासंदद्वे त्वाज्यंस्य होतर्यजं ॥ ४ ॥

होता यक्षदोजोन वीर्यꣳ सहो द्वार इन्द्रंमवर्धयन् ।
सुप्रायणा अस्मिन्यज्ञे विश्रयन्तामृतावृधो द्वार इन्द्राय-
मीढुषे व्यन्त्वाज्यंस्य होतर्यजं ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

होता यक्षदुषे इन्द्रस्य धेनू सुदुघे मातरा मही ।

स वातरौ न तेजसा वत्समिन्द्रमवर्धतांव्वीतामाज्यस्य होतर्यज ॥ ६ ॥

होतायक्षद्दैव्या होतारा भिषजा सखा या हविषेन्द्रम्भिषज्यतः ।

कवी देवौ प्रचेतसा इन्द्राय धत्तःइन्द्रियँव्वीतामाज्यस्य होतर्यज ॥७॥

होता यक्ष त्तिस्रो देवी र्न भेषजन्त्रयं स्त्रिधातवोपस-

इळा सरस्वती भारती महीः ।

इन्द्रं पत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज ॥ ८ ॥

होता यक्षत्त्वष्टारमिन्द्रन्देव म्भिषजꣳ सुयजङ्घृत श्रियम् ।

पुरु रूपꣳ सुरेतसम्मघोन मिन्द्राय त्वष्टा दधदिन्द्रियाणि-

वे त्वाज्यस्य होतर्यज ॥ ९ ॥

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुन्धियो जोष्टारमिन्द्रियम् ।

मध्वा समञ्जन्पथिभिस्सुगेभिस्स्वदाति य-

ज्ञम्मधुना घृतेन वे त्वाज्यस्य होतर्यज ॥ १० ॥

होता यक्षदिन्द्रꣳ स्वाहाज्यं स्य स्वाहा मेदसस्स्वाहा स्तोकानाꣳ-

स्वाहा स्वाहा कृतीनाꣳ स्वाहा हव्यसूक्ती नाम् ।

स्वाहा देवा आज्यपाजुषाणाइन्द्र आज्यस्य व्यन्तु होतर्यज ॥१॥ (११)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(द्वितीयोऽनुवाकः २)

देवम्बर्हिरिन्द्रꣳ सुदेवन्देवैर्वीरवत्स्तीर्णव्वेद्यामवर्धयत् ।
वस्तोर्वृतम्प्राक्तोर्भृतꣳरायाबर्हिष्मतोऽत्यगाद्वसु-
वने वसुधेयस्य वेतुयज ॥ १ ॥

देवीर्द्वार इन्द्रꣳ सङ्घाते वीड्वीर्यामन्नवर्धयन् ।
आवत्सेन तरुणेन कुमारेण च मीवताऽपार्वाणꣳ रेणुककाट-
न्नुदन्ताँव्वसुवने वसुधेयस्यन्यन्तु यज्ज ॥ २ ॥

देवी उषासा नक्ते न्द्रंय्यज्ञे प्रयत्यह्वेताम् ।
दैवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवने-
वसुधेयस्य वीताँव्यज ॥ ३ ॥

देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्धताम् ।
अयाव्य न्याघा द्वेषाꣳस्यान्यावक्षद्वसु वार्याणियजमानाय-
शिक्षिते वसुवने वसुधेयस्य वीताँय्यज ॥ ४ ॥

देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्धताम् ।
इषमूर्जमन्यावक्षत्सग्धिꣳ सपीतिमन्या नवेन पूर्वन्दयमाने-
पुराणेन नवमधातामूर्जमूर्जाहुतीऊर्जयमाने वसुवार्याणि-
यजमानाय शिक्षिते वसुवने वसुधेयस्य वीताँय्यज ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवा दैव्या होतारा देवमिन्द्रमवर्धताम् ।
हताघशंसाआभार्ष्टां वसुवार्याणियजमानाय-
शिक्षितौ वसुवने वसुधेयस्य वीतांयज ॥ ६ ॥

देवी स्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्धयन् ।
अस्पृक्षद्भारती दिवंरुद्रैर्यज्ञंसरस्वतीळा वसुमती-
गृहान्वसुवने वसुधेयस्य व्यन्तु यज ॥ ७ ॥

देवइन्द्रो नराशंसस्त्रि वरूथ स्त्रिबन्धुरो देवमिन्द्रमवर्धयत् ।
शतेन शितिपृष्ठानामाहितस्सहस्रेण प्रवर्तते मित्रा-
वरुणेदस्यहोत्रमर्हतोबृहस्पतिस्तोत्रमश्विनाध्वर्यवं वसुवने-
वसुधेयस्यवेतुयज ॥ ८ ॥

देवो देवैर्वनस्पतिर्हिरण्यपर्णो-
मधुशाखस्सुपिप्पलोदेवमिन्द्रमवर्धयत् ।
दिवमग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृंह-
हीद्वसुवने वसुधेयस्य वेतुयज ॥ ९ ॥

देवम्ब र्हिर्वारितीनान्देवमिन्द्रमवर्धयत् ।
स्वासस्थमिन्द्रेणासन्नमन्या बर्हीं-
ष्यभ्यभूद्वसुवने वसुधेयस्य वेतु यज ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवो अग्निस्स्विष्टकृद्देवमिन्द्रंमवर्धयत् ।
स्विष्टङ्कुर्वन्त्स्विष्टकृत्स्विष्टमद्य करोतुनो-
वसुवने वसुधेयस्य वेतु यज ॥ ११ ॥

अग्निमद्य होतारमवृणीतायँय्यजमानः-
पचन्पक्तीः पचन्पुरोळाशंम्बध्नन्निन्द्रायच्छागम् ।
सूपस्था अद्य देवो वनस्पतिरभवदिन्द्रायच्छागेन ।
अघत्तम्मेदस्तः प्रति पचताग्गृभीदवीवृधथतपुरोळाशेन ।
त्वामद्यऋषे ॥ १२ ॥ (२)

(तृतीयोऽनुवाकः ३)

होता यक्षत्समिधानम्महद्यशस्सुसमिद्धँव्वरेण्य-
मग्निमिन्द्रंव्वयो धसम् ।
गायत्रीञ्छन्द इन्द्रियन्त्र्यविङ्गाँवयो-
दधद्वेत्वाज्यस्य होतर्यज ॥ १ ॥

होताय क्षत्तनूनपातमुद्भिदँय्यङ्गर्भमदितिर्दधे-
शुचिमिन्द्रंव्वयोधसम् ।
उष्णिहञ्छन्द इन्द्रियदित्यवाहङ्गाँव्वयो-
दधद्वेत्वाज्यस्य होतर्यज ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

होता यक्षदीळेन्यमीळितव्वृत्रहन्तममिडाभिरीडाᳫ
सहस्सोममिन्द्रँव्वयो धसम् ।
अनुटुभण्टुभञ्छन्द इन्द्रियम्पञ्चाविङ्गाँव्वयो-
दधद्वेत्वाज्यस्य होतर्यज ॥ ३ ॥
होता यक्षत्सुबर्हिषम्पूषण्वन्तममर्त्यᳫ सीदन्तम्बर्हिषि-
प्रियेऽमृतेन्द्रव्वयोधसम् ।
बृहतीञ्छन्द इन्द्रियन्त्रिवत्सङ्गाँवयो-
दधद्वे त्वज्यस्य होतयज ॥ ४ ॥
होता यक्षद्व्य चस्वतीस्सुप्रायणा ऋता-
बृधो द्वारो देवीर्हिरण्ययी-
र्ब्रह्माणमिन्द्रव्वयोधसम् ।
यङ्क्तिञ्छन्दइहेन्द्रियन्तुर्यवाहंगांव्वयोद-
धद्व्यन्त्वाज्यस्य होतर्यज ॥ ५ ॥
होता यक्षत्सुपेशसा सुशिल्पे बृहती उभेनक्तोषासान-
दर्शते विश्वमिन्द्रँव्वयोधसम् ।
त्रिष्टुभञ्छन्द इहेन्द्रियम्पष्ठ वाहङ्गाँव्वयो-
दधद्वीतामाज्यस्य होतर्यज ॥ ६ ॥
होता यक्षत्प्रचेतसा देवानामुत्तमँय्यशो होतारा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैव्या॑ क॒वी स॒युजे॒न्द्रं॑व्वयो॒धसं॑म् ।
जग॑ती॒ञ्छन्द॑ इ॒न्द्रि॒यमं॑न॒ड्वाह॒ङ्गाँव्वयो॒-
द॒धंद्वी॒तामाज्यं॒स्य होत॒र्यज॑ ।। ७ ।।
होता॑ य॒क्षत्पेशं॑स्वती॒स्तिस्रो॑दे॒वीर्हि॑र॒ण्ययी॒र्भार॑तीर्बृ॒ह-
ती॒र्म॒हीः॒पति॑मिँन्द्रं॑व्वयो॒धसं॑म् ।
वि॒रा॒जञ्छन्द॑ इ॒हेन्द्रि॒यन्धे॒नुङ्गान्नवयो॒-
द॒ध॒द्व्यन्त्वाज्यं॒स्य होत॒र्यज॑ ।। ८ ।।
होता॑ य॒क्षत्सु॒रेतं॑स॒न्त्वष्टा॑रम्पुष्टि॒वर्धं॑नँ रू॒पाणि॒-
बिभ्रं॑तम्पृ॒थक्पुष्टि॑मिँन्द्रं॑व्वयो॒धसं॑म् ।
द्वि॒पद॒ञ्छन्द॑ इ॒न्द्रि॒यमु॒क्षाण॒ङ्गान्नवयो॒-
द॒धद्वे॒ त्वाज्यं॒स्य होत॒र्यज॑ ।। ९ ।।
होता॑य॒क्षद्व॒नस्पतिँ॑ श॒मि॒तारँ॑-
श॒तक्र॑तुँ॒ हिर॑ण्यपर्णमु॒क्थिन॑ँ-
र॒श॒नाम्बि॒भ्रं॑तँव्व॒शिम्भग॒मिँन्द्रं॑व्वयो॒धसं॑म् ।
क॒कु॒भ॒ञ्छन्द॑ इ॒हेन्द्रि॒यँव्व॒शाँव्वे॒हत॒ङ्गाँव्वयो॒-
द॒धद्वे॒त्वाज्यं॒स्य होत॒र्यज॑ ।। १० ।।
होता॑य॒क्षत्स्वाहा॑ कृ॒तीर॒ग्निङ्गृ॒हप॑ति॒म्पृथ॒ग्वरु॑ण॒म्भे॒ष॒जङ्क॒-
वि॒ङ्क्ष॒त्र॒मिँन्द्रं॑व्वयो॒धसं॑म् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिच्छन्दसञ्छन्दं इन्द्रियम्बृहद्वषभङ्गाँ व्वयोदधद्व्य-
न्त्वाज्यस्य होतर्यज ॥ ११ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

देवम्बर्हिर्वयो धसन्देवमिन्द्रमवर्धयत् ।
गायत्र्या च्छन्दसेन्द्रियञ्चक्षुरिन्द्रे वयो दधद्वसुवनै वसुधेयस्यवेतु यज ॥१॥
देवीर्द्वारो वयोधसꣳ शुचिमिन्द्रं मवर्धयन् ॥
उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रे-
वयो दधद्वसुवनैवसु धेयस्य व्यन्तु यज ॥ २ ॥
देवी उषासा नक्ता देवमिन्द्रँव्वयो धसन्देवी देवमवर्धताम् ॥
अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रे वयो-
दधद्वसुवनै वसुधेयस्य वीताँय्यज ॥ ३ ॥
देवी जोष्ट्री वसुधिती देवमिन्द्रँव्वयोधसन्देवी देवमवर्धताम् ॥
बृहत्या च्छन्दं सेन्द्रियꣳश्रोत्रमिन्द्रेवयो-
दधद्वसुवनै वसुधेयस्य वीताँय्यज ॥ ४ ॥
देवी ऊर्जा हुती दुघे सुदुघे पयसेन्द्रँव्वयो-
धसन्देवी देवमवर्धताम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पङ्क्त्या च्छन्दंसे न्द्रियꣳशुक्रमिन्द्रे-

वयो दधंद्वसुवनें वसुधेयंस्य वीताँय्यजं ॥ ५ ॥

देवा दैव्या होतांरा देवमिन्द्रँव्वयो-

धसंन्देवौ देवमंवर्धताम् ॥

त्रिष्टुभाच्छन्दंसेन्द्रियन्त्वि षिमिन्द्रे वयो-

दधंद्वसुवनें वसु धेयंस्यवीताँय्यजं ॥ ६ ॥

देवीस्तिस्रस्तिस्रो देवी र्वयो धसम्पतिमिन्द्रंमवर्धयन् ॥

जगंत्या च्छन्दंसेन्द्रियꣳ शूषमिन्द्रे वयो दधं-

द्वसुवनें वसुधेयंस्य व्यन्तु यजं ॥ ७ ॥

देवो नराशꣳसों देवमिन्द्रँव्वयो धसं न्देवो देवमंवर्धयत् ॥

विराजा च्छन्दंसेन्द्रियꣳ रूपमिन्द्रे वयो-

दधंद्वसुवनें व सुधेयंस्य वेतु यजं ॥ ८ ॥

देवो वनस्पतिर्देवमिन्द्रँव्वयो धसंन्देवो देवमंवर्ध यत् ।

द्विपदा च्छन्दंसेन्द्रियम्भगमिन्द्रे वयो दधंद्वसुवनें-

वसुधेयंस्य वेतुयजं ॥ ९ ॥

देवम्बर्हिर्वारितीनान्देवमिन्द्रँव्वयो धसंन्देवन्देवमंवर्धयत् ।

ककुभा च्छन्दंसेन्द्रियँय्यश इन्द्रे वयो दधंद्वसुवनें-

40

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसुधेयस्य वेतु यजं ॥ १० ॥

देवो अग्निस्स्विष्टकृद्देवमिन्द्रँस्वयो धसन्देवो देवमवर्धयत् ।

अतिच्छन्दसा च्छन्दसेन्द्रियङ्क्षत्रमिन्द्रे वयो-

दधद्वसुवने वसुधेयस्य वेतु यजं ॥ ११ ॥

अग्निमद्य होतारमवृणीतायँय्यजमानः पचन्पक्तीः-

पचन्पुरोळाशम्बध्नन्निन्द्राय वयो धसे छागम् ।

सूपस्थाः अद्यदेवो वनस्पतिरभवदिन्द्रायवयोधसेच्छागेन ।

अघत्तम्मेदस्तःप्रति पचताग्रृभीदवी वृधतपुरोळाशेन ।

त्वामद्य ऋषे ॥ १२ ॥ (४) हरिः ओम्

होतायक्षदेकादश (११) देवम्बर्हिर्द्वादश (१२) होताय-क्षकादश (११) देवम्बर्हिर्द्वादश (१२) चतुरनुवाकेषु षट्चत्वारिंशत् (४६) प्राणा वाज होता यज्जाषट्चत्वा-रिंक्षम् ।

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ एकत्रिंशतितमोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओं समिद्धो अञ्जन्कृदरम्मतीनाङ्घृतमग्ने मधुमत्पिन्वमानः ।
वाजी व हन्वाजिनञ्जातवेदो देवानाँव्वक्षि-
प्रियमा सधस्थम् ॥ १ ॥
घृतेनाञ्जन्त्सम्पथो देवयानान्प्रजानन्वाज्यप्येतु देवान् ।
अनु त्वा सप्तेप्रदिशस्सचन्ताꣳ स्वधामस्मै यजमानाय धेहि ॥ २ ॥
ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिस्सजोषाः प्रीतँव्वह्निंव्वहतु जातवेदाः ॥ ३ ॥
स्तीर्णम्बर्हिस्सुष्टरीमा जुषाणोरु पृथुप्रथमानम्पृथिव्याम् ।
देवेभिर्युक्तमदितिस्सजोषास्स्योनङ्कृण्वाना सुविते दधातु ॥ ४ ॥
एता उवस्सुभगा विश्वरूपा विपक्षोभिश्श्रयमाणा उदातैः ।
ऋष्वास्सतीः कवषश्शुम्भमाना द्वारोदेवीस्सुप्रायणा भवन्तु ॥ ५ ॥
अन्तरा मित्रावरुणा चरन्ती मुखँय्यज्ञानामभि सँव्विदाने ।
उषासा वाꣳसुहिरण्येसुशिल्पे ऋतस्य योना इह सादयामि ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमा वाँ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।

अपिप्रयश्चोदनावाम्मिमा ना-

होतारा ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥

आदित्यै र्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्नं आवीत् ।

इळोपहूता वसुभिस्सजोषा यज्ञन्नो देवीरमृतेषु धत्त ॥ ८ ॥

त्वष्टा वीरन्देवकामञ्जजान त्वष्टुरर्वा जायत आशुरश्वः ।

त्वष्टेदँ व्विश्वम्भुवनञ्जजान बहोः कर्तारमिह यक्षिहोतः ॥ ९ ॥

अश्वो घृते न त्मन्यासमक्त उप देवाँ२ऋतुशः पाथ एतु ।

वनस्पतिर्देवलोकम्प्रजानन्नग्नि नाहव्या स्वदितानि वक्षत् ॥ १० ॥

प्रजापतेस्तपसा वावृधानस्सद्यो जातो दधिषे यज्ञमग्ने ।

स्वाहा कृतेन हविषापुरोगा याहिसाध्या हविरदन्तुदेवाः ॥ ११ ॥ (१)

(द्वितीयोऽनुवाकः २)

केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे

समुषद्भिरजायथाः ॥ १ ॥

जीमूतस्येव भवति प्रतीकँय्यद्वर्मी याति समदामुपस्थे ।

अनाविद्धया तन्वा जयत्वꣳ सत्वा वर्मणो महिमापि पर्तु ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धन्वना गा धन्वनाजिञ्जयेम धन्वना तीव्रास्समदो जयेम ।
धनुश्शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ ३ ॥

ते आचरन्ती समनेव योषा मातेव पुत्रम्बिभृतामुपस्थे ।
अप शत्रून्विध्यताᳪं संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥४॥

वक्ष्यन्ती वेदागनीगन्ति कर्णम्प्रियᳪं सखायम्परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयᳪं समने पारयन्ती ॥ ५ ॥

अहिरिव भोगैः पर्येति बाहुञ्ज्याया हेतिम्परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमाᳪंसम्परिपातु विश्वतः ॥६॥

बह्वीनाम्पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य ।
इषुधिस्सङ्काःपृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ ७ ॥

सुपर्णंवस्तेमृगो अस्या दन्तो गोभिस्सन्नद्धा पतति प्रसूता ।
यत्रानरस्सञ्च वि च द्रवन्ति तत्रास्मभ्यमिषवश्शर्मयᳪंसन् ॥ ८ ॥

वनस्पते वीड्वङ्गोहि भूया अस्मत्सखा प्रतरणस्सुवीरः ।
गोभिस्सन्नद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥ ९ ॥

रथे तिष्ठन्नयति वाजिनःपुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनाम्महिमानम्पनायत मनःपश्चादनु यच्छन्ति रश्मयः ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आजंङ्घन्ति सान्वेंषाञ्जघनाँ२उपंजिघ्नते ।

अश्वांजनि प्रचेंतसोऽश्वांन्त्समत्सुं चोदय ॥ ११ ॥

उपंश्वासय पृथिवीमुतद्याम्पुंरु त्रातें मनुताँविष्ठिंतञ्जभंत् ।

सुदुंन्दुभे सजूरिन्द्रेंणदेवैंर्दूराद्दवीयोअपंसेधशत्रूंन् ॥ १२ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

यदक्रंन्दः प्रथमञ्जायंमान उद्यन्त्संमुद्रादुतवा पुरीषात् ।

श्येनस्यं पक्षा हंरिणस्यं बाहू उंपस्तुत्यम्महिं जातन्तें अर्वन् ॥ १ ॥

यमेनं दत्तन्त्रितएं नमा युनगिन्द्रं एणम्प्रथमो अध्यंतिष्ठत् ।

गन्धर्वो अंस्य रशनामंगृभ्णात्सूरादश्वं व्वसवो निरंतष्ट ॥ २ ॥

असिं यमो अस्यादित्यो अंर्वन्नसिं त्रितो गुह्येंन व्रते नं ।

असि सोमेंन समया विपृंक्त आहुस्ते त्रीणिंदिवि बन्धंनानि ॥ ३ ॥

त्रीणिं त आहुर्दिवि बन्धंनानि त्रीण्यप्सुत्रीण्यन्तस्संमुद्रे ।

उतेवंमे वरुंणश्छ न्त्स्यर्वन्यत्रा त आहुःपरमञ्जनित्रंम् ॥ ४ ॥

इमा तें वाजिन्नव मार्जनानीमा शफानाः सनितुर्निधाना ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥ ५ ॥

आत्मानन्ते मनसारादजानामवो दिवा पतयन्तम्पतङ्गम् ।

शिरो अपश्यम्पथिभिस्सुगेभिररेणुभिर्जेहमानम्पतत्रि ॥ ६ ॥

अत्रा ते रूपमुत्तममपश्यञ्जिगीषमाणमिष आ पदे गोः ।

यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः ॥ ७ ॥

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनुभगः कनीनाम् ।

अनु व्राता सस्तव सख्यमीयुरनु देवा ममिरे वीर्यन्ते ॥ ८ ॥

हिरण्यशृङ्गोऽयो अस्य पादा मनो जवा अवर इन्द्र आसीत् ।

देवा इदस्य हविरद्यमायन्यो अर्वन्तम्प्रथमो अध्यतिष्ठत् ॥ ९ ॥

ईर्मान्तासस्सिलिकमध्यमासस्सꣳशूरणासो दिव्यासो अत्याः ।

हꣳसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥ १० ॥

तव शरीरम्पतयिष्ण्वर्वन्तव चित्तँव्वात इव ध्रजीमान् ।

तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणाचरन्ति ॥ ११ ॥

उपप्रागाच्छसनँव्वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।

अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥ १२ ॥

उप प्रागात्परमँय्यत्सधस्थमर्वाँ२ अच्छा पितरम्मातरञ्च ।

अद्या देवाञ्जुष्टतमो हि गम्या अथाशास्ते दाशुषे वार्याणि ॥१३॥ (३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(चतुर्थोऽनुवाकः ४)

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।

आच वह मित्रमहश्चिकित्वान्त्वन्दूतः कविरसि प्रचेताः ॥ १ ॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदयासुजिह्व ।

मन्मानि धीभिरुत यज्ञमृन्धन्देवत्राचकृणुह्यध्वरन्नः ॥ २ ॥

नराशꣳसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।

ये सुक्रतवश्शुचयो धियन्धास्स्वदन्तिदेवा उभयानि हव्या ॥ ३ ॥

आजुह्वान ईड्योवन्द्यश्चाया ह्यग्ने वसुभिस्सजोषाः ।

त्वन्देवानामसि यह्व होता स एनान्यक्षी षितो यजीयान् ॥ ४ ॥

प्राचीनम्बर्हिः प्रदिशा पृथिव्या वस्तो रस्या वृज्यते अग्रे अह्नाम् ।

व्युप्रथते वितरँव्वरीयो देवेभ्यो अदितये स्योनम् ॥ ५ ॥

यचस्वतीरुर्विया विश्रयन्ताम्पतिभ्यो नजनयश्शुम्भमानाः ।

देवीर्द्वारो बृह तोर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ६ ॥

आसुष्वयन्ती यजते उपाके उषासानक्ता सदतान्नियोनौ ।

दिव्ये योषणे बृहती सुरुक्मे अधिश्रियꣳ शुक्रपिशन्दधाने ॥ ७ ॥

दैव्या होतारा प्रथमा सुवाचामिमाना यज्ञम्मनुषो यजध्यै ।

प्रचोदयन्ता विदथेषु कारूप्राचीनञ्ज्योतिः प्रदिशा दिशन्ता ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनो' यज्ञम्भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ।

तिस्रो देवीर्बर्हिरेदः स्योनः सरस्वती स्वपसस्सदन्तु ॥ ९ ॥

यइमे द्यावापृथिवी जनित्री रूपैरपिः शद्भुवनानि विश्वा ।

तमद्य होतरिषितो यजीयान्दे वन्त्वष्टारमिह यक्षिविद्वान् ॥ १० ॥

उपावसृज त्मन्या समञ्जन्देवा नाम्पाथ ऋतुथा हवीःषि ।

वनस्पतिश्शमिता देवो अग्निस्स्वदन्तु हव्यम्मधुना घृतेन ॥ ११ ॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।

अस्यहोतुः प्रदिश्यृतस्यवाचिस्वाहा कृतःहविरदन्तुदेवाः ॥ १२ ॥ (४)

——

(पञ्चमोऽनुवाकः ५)

अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल-

इन्द्राय त्रैष्टुभाय पञ्चदशायबा र्हतायैकादशकपालो-

विश्वेभ्यो देवेभ्यो जागतेभ्यस्ससप्तदशेभ्यो-

वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्या-

मेकविंःशाभ्याँव्वैराजाभ्याम् ।

41

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पयस्या बृहस्पतये पाङ्क्ताय त्रिणवायं शाक्करायं चरुस्संवित्र-

औष्णिहाय त्रयस्त्रिꣳशायं रैवताय द्वादशकपालः-

प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नयें-

वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकपालः ॥ १ ॥ (५)

(षष्ठोऽनुवाकः ६)

आग्नेयःकृष्णग्रीवस्सारस्वती मेवी बभ्रुस्सौम्यः पौष्णश्श्यामः-

शितिपृष्ठो बार्हस्पत्यःशिल्पोवैश्वदेवः ।

ऐन्द्रोऽरुणो मारुतः कल्माषं ऐन्द्राग्नस्संꣳहितोऽधोरा-

मस्सावित्रो वारुणः कृष्णः एकशितिपात्पेत्वः ॥ १ ॥ (६)

(सप्तमोऽनुवाकः ७)

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरा मौसावित्रौ-

पौष्णौरजतनाभी वैश्वदेवौ पिशङ्गौतूपरौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मारुतः कल्माषं आग्नेयः कृष्णोऽजस्सारस्वती-
मेषीवारुणः षेत्वंः ॥ १ ॥ ७ ॥ हरिः ओम्

समिद्धोअञ्जन्नेकादश (११) केतुङ्कृण्वन्द्वादश (१२)
यदक्रन्दस्त्रयोदश (१३) समिद्धोअद्यद्वादश (१२)
अग्नयेगायत्राय (१) अग्नेयःकृष्णाग्रीवः (१)
अग्नयेऽनीकवतइत्येकैका (१) सप्तानुवाकेष्वेकपञ्चाशत् (५१)

इति शुक्लयजुर्वेदकाण्वसंहितापाठेएकत्रिंशतितमोऽध्यायः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ द्वात्रिंशतिमोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओं अस्याजरासो दमामरित्राःअर्चद्धूमासो अग्नयःपावकाः ।

श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो नसोमाः ॥ १ ॥

हरयो धूमकेतवो वातजूता उपद्यवि ।

यतन्ते वृथगग्नयः ॥ २ ॥

यजानो मित्रावरुणा यजा देवाँ२ ऋतम्बृहत् ।

अग्ने यक्षि स्वन्दमम् ॥ ३ ॥

युक्ष्वाहि देवहूतमाँ२अश्वाँ२अग्ने रथीरिव ।

निहोता पूर्व्यस्सदः ॥ ४ ॥

द्वे विरूपे चरतस्स्वर्थे अन्यान्या वत्समुपधा पयेते ।

हरिरन्यस्याम्भवति स्वधावाञ्छुक्रो अन्यस्यान्ददृशे सुवर्चाः ॥ ५ ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।

यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रँविभ्वँविशेविशे ॥ ६ ॥

त्रीणि शतात्रीसहस्राण्यग्निन्त्रिंश्च देवा नवचासपर्यन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

औक्षन्घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारन्न्यं सादयन्त ॥ ७ ॥

मूर्धानन्दिवो अरतिम्पृथिव्या वैश्वानरमृत आजातमग्निम् ।

कविँ सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्त देवाः ॥ ८ ॥

अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया ।

समिद्धः शुक्र आहुतः ॥ ९ ॥

विश्वेभिस्सोम्यम्मध्वग्न इन्द्रेण वायुना ।

पिबा मित्रस्य धामभिः ॥ १० ॥

आयदिषे नृपतिन्तेजआनट्शुचिरेतो निषिक्तन्द्यौरभीके ।

अग्निश्शर्धमनवद्यँय्युवानँ स्वाध्यञ्जनयत्सूदयञ्च ॥ ११ ॥

अग्ने शर्धमहते सौभगाय तवद्युम्नान्युत्तमानि सन्तु ।

सञ्जास्पत्यँ सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाँसि ॥ १२ ॥

त्वाँ हिमन्द्रतममर्कशोकैर्ववृमहे महिनः श्रोष्यग्ने ॥

इन्द्रन्नत्वा शवसा देवता वायुम्पृणन्ति राधसानृतमाः ॥ १३ ॥

त्वे अग्ने स्वाहुत प्रियासस्सन्तु सूरयः ।

यन्ता रोये मघवानो ज नामा मूर्वान्दयन्त गोनाम् ॥ १४ ॥

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्नेसयावभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसींदन्तु बर्हिषिं मित्रो अंर्यमा प्रा॒र्ता॒त्राणो अध्वरम् ॥ १५ ॥

विश्वेषामदिं तिर्यज्ञियानाँव्वि श्वेषामतिथिर्मानुंषाणाम् ।

अग्निर्देवानामवं आवृणानस्सुंमृळी को भंवतु जातवेदाः ॥ १६ ॥

महो अग्नेस्समिधानस्य शर्मण्यनागा मित्रे वरुंणे स्वस्तयें ।

श्रेष्ठंस्याम सवितुस्सवींमनि तद्देवानामवों अद्यावृंणीमहे ॥ १७ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

आपश्चित्पिप्युस्तर्यो॒न गावो नक्षंन्नृतञ्जं रिता रंस्त इन्द्र ।

याहि वायुर्न निबुतों नो अच्छात्वꣳ हिधीभिर्दयंसे विवाजान् ॥ १ ॥

गाव उषावतावतम्महो य ज्ञस्यंरप्सुदा ।

उभाकर्णां हिरण्यया ॥ २ ॥

यदद्य सूर उदितेऽनागा मित्रो अंर्यमा ।

सुबातिंसविता भगंः ॥ ३ ॥

आसुते सिंञ्चत श्रियꣳ रोदंस्योरभिश्रियंम् ।

रसादंधीत वृषभम् ।

तम्प्रत्नथायँव्वेनश्चोदयत् ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आतिष्ठन्तम्परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।
महत्तद्वृष्णो असुरस्य नामाविश्वरूपो अमृतानि तस्थौ ॥ ५ ॥

प्रवो महे मन्दमानायान्धसोऽर्चाविश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमखꣳ सहोमहिश्रवो नृम्णञ्चरोदसी सपर्यतः ॥ ६ ॥

बृहन्निदि ध्मएषाम्भूरि शस्तम्पृथुस्वरुः ।
येषामिन्द्रो युवासखा ॥ ७ ॥

इन्द्रेहि मत्स्यन्धसोविश्वेभिस्सोमपर्वभिः ।
महाँ२अभिष्टिरोजसा ॥ ८ ॥

इन्द्रोवृत्रमवृणोच्छर्द्धनीतिःप्रमायिनाममिनाद्वर्पणीतिः ।
अहन्व्यꣳ समुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥ ९ ॥

कुतस्त्वमिन्द्रमाहिनस्सन्नेको यासि सत्पते किन्तइत्था ।
सम्पृच्छसे समराणःशुभानैर्वोचेस्तन्नो हरिवो यत्तेअस्मे ।
महाँ२इन्द्रोय ओजसा कदाचनस्तरीरसि कदाचन प्रयुच्छसि ॥ १० ॥

आतत्त इन्द्राऽयवःपनन्ताभिय ऊर्वङ्गोमन्ततिन्तृत्सान् ।
सकृत्स्वँय्ये पुरुपुत्राम्महीꣳ सहस्रधाराम्बृहतीन्दुदुक्षन् ॥ ११ ॥

इमान्ते धियम्प्रभरे महो महीमस्य स्तोत्रे धिषणा यत्तआनजे ।
तमुत्सवेच प्रसवेच सासहिमिन्द्रन्देवासश्शवसामदन्ननु ॥ १२ ॥ (२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

विभ्राड्बृहत्पिबतु सोम्यम्मध्वायुर्दधद्यज्ञपता अविहुतम् ।

वातंजूतो यो अभिरक्षतित्मना प्रजाःपुपोष पुरुधा विराजति ॥ १ ॥

उदुत्यञ्जातवेदसन्देवँव्वहन्ति केतवः ।

दृशे विश्वाय सूर्यम् ॥ २ ॥

येना पावक चक्षसा भुरण्यन्तञ्ज नाँ२अनु ।

त्वँव्वरुण पश्यसि ॥ ३ ॥

दैव्या अध्वर्यू आगतꣳ रथेन सूर्यत्वचा ।

मध्वा यज्ञꣳ समञ्जाथे ।

तम्प्रत्नथायँव्वेनश्चित्रन्देवानाम् ॥ ४ ॥

आनःइळाभिर्विदथेसुशस्ति विश्वानरस्सविता देव एतु ।

अपियथा युवानो मत्सथानो विश्वञ्जगदभि पित्वे मनीषा ॥ ५ ॥

यदद्य कच्चवृत्रहन्नुदगाअभि सूर्य ।

सर्वन्तदिन्द्र तेवशे ॥ ६ ॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।

विश्वमा भासि रोचनम् ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्सूर्यस्य देवत्वन्तन्महित्वम्मध्या कर्तोर्वितत सञ्जभार ।

यदेदयुक्त हरितंस्सधस्थादाद्रात्रीवासंस्तनुते सिमस्मै ॥ ८ ॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे ।

अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितस्सम्भरन्ति ॥ ९ ॥

बण्महाँ२असि सूर्यबळादित्य महाँ२असि ।

महस्ते सतो महिमा पनस्यतेऽद्धादेव महाँ२असि ॥ १० ॥

बट्सूर्य श्रवसा महाँ२असि सत्रा देव महाँ२असि ।

मह्ना देवानामसुर्यः पुरोहितो विभुज्योतिर दाभ्यम् ॥ ११ ॥

श्रायन्त इव सूर्यंविश्वेदिन्द्रस्य भक्षत ।

वसूनि जाते जन मान ओजसा प्रतिभागन्नदीधिम ॥ १२ ॥

अद्या देवा उदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात् ।

तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उतद्योः ॥ १३ ॥

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ १४ ॥ (३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(चतुर्थोऽनुवाकः ४)

प्रवाग्वृजे सुप्रया बर्हिरेषामा विश्पतीवबीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषास्वस्तये नियुत्वान् ॥ १ ॥
इन्द्रवायू बृहस्पतिम्मित्राग्निम्पूषणम्भगम् ।
आदित्यान्मारुतङ्गणम् ॥ २ ॥
वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः ।
करतान्नस्सुराधसः ॥ ३ ॥
अधिन इन्द्रैषाँव्विष्णो सजात्यानाम् ।
इतामरुतो अश्विना ।
तम्प्रत्नथायँव्वेनश्चोदयद्देवास आन इळाभिर्वि-
श्वेभिस्सोम्मध्वो मासश्चर्षणीधृतः ॥ ४ ॥
अग्न इन्द्र वरुण मित्र देवाश्शर्द्धः प्रयन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अधग्नाः पूषाभगस्सरस्वती जुषन्त ॥ ५ ॥
इन्द्राग्नी मित्रावरुणादितिꣳ स्वः पृथिवीन्द्याम्मरुतः पर्वताँ२ अपः ।
हुवे विष्णुम्पूषणम्ब्रह्मणस्पतिम्भगन्नुशꣳ संꣳ सवितारमूतये ॥ ६ ॥
अस्मे रुद्रा मेहना पर्वतासो वृत्र हत्ये भरहूतौ सजोषाः ।
यश्शꣳसंते स्तुवते धायि पज्र इन्द्रं ज्येष्ठा अस्मा२अवन्तु देवाः ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्वाञ्चो अद्या भवता यजत्रा आवो हार्दिभयमानोव्ययेयम् ।
त्राध्वन्नो देवा निजुरो वृकस्य त्राध्वङ्कर्तादवपदो यजत्राः ॥ ८ ॥

विश्वे अद्य म रुतो विश्व ऊती विश्वे भवन्त्वग्नयत्समिद्धाः ।
विश्वेनो देवा अवसागमन्तु विश्वमस्तुद्रविणँव्वाजो अस्मे ॥ ९ ॥

विश्वे देवाः शृणुतेमᳬ हवम्मेये अन्तरिक्षेय उपद्यविष्ठ ।
ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन्वर्हिषि मादयध्वम् ॥ १० ॥

देवेभ्योहि प्रथमँय्यज्ञियेभ्योऽमृतत्वᳬ सुवसि भागमुत्तमम् ।
आदिद्दामानᳬ स वितर्व्यूर्नुषेऽनूचीनाजीविता मानुषेभ्यः ॥ ११ ॥ (४)

—०—

(पचमोऽनुवाकः ५)

प्रवायुमच्छा बृहती मनीषा बृहद्रयिंव्विश्ववारᳬ रथप्राम् ।
द्युत द्यामानियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ १ ॥

इन्द्रवायू इमे सुताउपप्रयो भिरागतम् ।
इन्दवोवा मुशन्तिहि ॥ २ ॥

मित्रᳬ हुवे पूतदक्षँव्वरुणञ्चरिशादं सम् ।
धियङ्घृताचीᳬ साधन्ता ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दस्रा युवाकवस्सुता नासत्या वृक्तबर्हिषः ।

आयातꣳ रुद्रवर्तनी ।

तम्प्रत्नथायँव्वेनश्चोदयत् ॥ ४ ॥

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्र्यक्कः ।

अग्रन्नयत्सुपद्यक्षराणा मच्छारवम्प्रथमा जानतीगात् ॥ ५ ॥

नहि स्पशमविदन्नन्यमस्माद्वै श्वानरात्पुर एतारमग्नेः ।

एमेनमवृधन्नमृता अमर्त्यँव्वैश्वानरङ्क्षैत्रजित्याय देवाः ॥ ६ ॥

उग्रा विघनिना मृधइन्द्राग्नी हवामहे ।

तानो मृळात ईदृशे ॥ ७ ॥

उपास्मै गायता नरः पवमानायेन्दवे ।

अभिदेवाँ२इयक्षते ॥ ८ ॥

ये त्वाहिहत्ये मघवन्नवर्धन्ये साम्बरे हरिवो ये गविष्टौ ।

येत्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः ॥ ९ ॥

जनिष्ठा उग्रस्सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।

अवर्धन्निन्द्रम्मरुतश्चिदत्र माता यद्वीरन्दधनद्धनिष्ठा ॥ १० ॥

आतू न इन्द्र वृत्रहन्नस्माकमर्धमागहि ।

महान्महीभिरूतिभिः ॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असिस्पृधः ।

अशस्तिहा जनिता विश्वतूरसि त्वन्तूर्य तरुष्यतः ॥ १२ ॥

अनुते शुष्मन्तुरयन्तमीयतुःक्षोणी शिशुन्नमातरा ।

विश्वास्ते स्पृधः श्नथयन्त मन्यवेवृत्रँय्यदिन्द्र तूर्वसि ॥ १३ ॥

यज्ञो देवानाम्प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।

आवोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवो वित्तरासत् ॥ १४ ॥

अदब्धे भिस्सवितःपायुभिष्ट्वꣳ शिवेभिरद्य परिपाहिनो गयम् ॥

हिरण्यजिह्वस्सुवितायनव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥१५॥ (५)

(षष्ठोऽनुवाकः ६)

प्रवीरया शुचयो दद्रिरेवामध्वर्युभिर्मधु मन्तस्सुतासः ।

वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ १ ॥

गाव उपावतावतम्मही यज्ञस्य रप्सुदा ।

उभा कर्णा हिरण्यया ॥ २ ॥

काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे ।

रिशादसा सधस्थआ ॥ ३ ॥

दैव्या अध्वर्यू आगतꣳ रथेन सूर्यत्वचा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्वा यज्ञः समञ्जाथे ।

तम्प्रत्नथायँव्वेनश्चोदयत् ॥ ४ ॥

तिरश्चीनो विततो रश्मिरेषा मधस्विदासी३दुपरिस्विदासी३त् ।

रेतोधा आसन्महिमानं आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥ ५ ॥

आरोदसी अपृणदा स्वर्महज्जातँय्यदेनमपसो अधारयन् ।

सोअध्वराय परिणीयते कविरत्यो न वाजसातये चनोहितः ॥ ६ ॥

उक्थेभिर्वृत्रहन्तं माया मन्दाना चिदा गिरा ।

आङ्गूषैराविवासतः ॥ ७ ॥

उपन स्सूनवो गिरःशृण्वन्त्वमृतस्ययये ।

सुमृळीका भवन्तुनः ॥ ८ ॥

ब्रह्माणि मेमत यश्शः सुतासःशुष्म इयर्ति प्रभृतो मेअद्रिः ।

आशासते प्रतिहर्यन्त्युक्थेमाहरी वहतस्ता नोअच्छ ॥ ९ ॥

अनुत्तमाते मघवन्न किर्नुनत्वा वाँरअस्ति देवताविदानः ।

नजायमानो नशतेन जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ १० ॥

तदिदास भुवनेषु ज्येष्ठँय्यतो जज्ञउग्रस्त्वेष नृम्णः ।

सद्यो जज्ञानो निरिणाति शत्रूननुयँविश्वे मदन्त्यूमाः ॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमा उंत्वा पुरूवसो गिरो वर्धन्तु यामर्म ।

पावकवर्णाः शुर्चयो विपश्चितोऽभिस्तोमैरनूषत ॥ १२ ॥

यस्यायँव्विश्व आर्यो दासः शेवधिपा अरिः ।

तिरश्चिंदर्ये रुशमे पवीरवि तुभ्येत्सो अंज्यतेरयिः ॥ १३ ॥

अयꣳ सहस्रमृषिभिस्सहंस्कृतस्समुद्र इंव पप्रथे ।

सत्यस्सो अंस्य महिमा गृंणे शवो यज्ञेषुं विप्रराज्यें ॥ १४ ॥

अदंब्धेभिस्सवितः पायुभिष्ट्वꣳ शिवेभिरद्यपरिं पाहिनो गयंम् ।

हिरंण्यजिह्वस्सुविताय नव्यंसे रक्षामाकिंनो अघशंꣳ सईशत ॥१५॥ (६)

हरिः ओम्

अस्याजरासस्सप्तदश (१७) आपश्चिद्द्वादश (१२) विभ्राट्-चतुर्दश (१४): प्रवावृजएकादश (११) प्रवायुम्पञ्चदश (१५) प्रवीरयेतिच (१५) षडनु वाकेषुचतुरशीतिः (८४)

इति शुक्लयजुर्वेदकाण्वसँहितापाठेद्वात्रिंशतिमोऽध्यायः

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ द्वात्रिंशतिमोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओम् यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति ।

दूरङ्गमञ्ज्योतिषां ज्योतिरेकन्तन्मे मनःशिवसङ्कल्पमस्तु ॥ १ ॥

पितुन्नुस्तोषम्महो धर्माणन्त विषीम् ।

यस्यं त्रितो व्योजसा वृत्रँविपर्वमर्दयत् ॥ २ ॥

अन्विदनुमते त्वम्मन्यासै शश्च नस्कृधि ।

क्रत्वे दक्षाय नोहिनु प्रणआयूंषि तारिषः ॥ ३ ॥

सिनीवालि पृथुष्टुके यादेवानामसि स्वसा ।

जुषस्व हव्यमाहुतम्प्रजान्देविदिदिड्ढिनः ॥ ४ ॥

पञ्च नद्यस्सरस्वतीमपियन्ति सस्रोतसः ।

सरस्वती तुपञ्चधासो देशेऽभवत्सरित् ॥ ५ ॥

त्वमग्ने प्रथमो अङ्गिराऋषिर्देवोदेवानामभवश्शिवस्सखा ।

तवव्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥ ६ ॥

त्वन्नोअग्ने तवदेव पायुभिर्मघोनो रक्षतन्वश्च वन्द्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते ॥ ७ ॥

उत्तानायामवंभरा चिकित्वान्त्सद्यःप्रवीतावृषणञ्जजान ।

अरुषस्तूपोरुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥ ८ ॥

इळायास्त्वा पदे वयं नाभा पृथिव्या अधि ।

जातवेदो निधीमह्यग्ने हव्याय वोह्ळवे ॥ ९ ॥

प्रमन्म हेशवसानाय शूषमाङ्गूषङ्गिर्वणसे अङ्गिरस्वत् ।

सुवृक्तिभिस्तुवत ऋग्मियायार्चामार्कन्नरे विश्रुताय ॥ १० ॥

प्रवो महे महिनमो भरध्वमाङ्गूष्यꣳ शवसाना यसाम ।

येनानःपूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसोगाः अविन्दन् ॥ ११ ॥

इच्छन्तित्वा सोम्यासस्सखायस्सुन्वन्ति सोमन्दधति प्रयाꣳसि ।

तितिक्षन्ते अभिशस्तिञ्जनानामिन्द्र त्वदा कश्चन हिप्रकेतः ॥ १२ ॥

नते दूरे परमा चिद्रजाꣳस्या तु प्रयाहि हरिवो हरिभ्याम् ।

स्थिराय वृष्णे सवना कृते मा युक्ता ग्रावाणस्समिधाने अग्नौ ॥ १३ ॥

अषाह्ळँय्युत्सु पृतना सुपप्रिꣳ स्वर्षामप्साँव्वृजनस्य गोपाम् ।

भरेषुजाꣳ सुक्षितिꣳसुश्रवसञ्जयन्तन्त्वादनुमदेम सोम ॥ १४ ॥

सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरङ्कर्मण्यन्ददाति ।

सादन्यँव्विदथ्यꣳ सभेयम्पितृश्रवणँय्योददाशदस्मै ॥ १५ ॥

43

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वमिमा ओषधीस्सोम विश्वास्त्वमपो अंजनयस्त्वङ्गाः ।

त्वमातंतन्थोर्वन्तरिक्षन्त्वञ्ज्योतिषा वितमों ववर्थ ॥ १६ ॥

देवेनं नोमनंसा देवसोम रायो भागꣳ संहसावन्नभियुध्य ।

मात्वातंनदीशिषे वीर्यस्योभयेभ्यःप्रचिंकित्सा गर्विष्टौ ॥ १७ ॥

अष्टौ व्यंख्यत्ककुभंः पृथिव्यास्त्री धन्व योजंना सप्त सिन्धूंन् ।

हिरण्याक्षस्संविता देव आगाद्दधद्रत्नादाशुषेवार्याणि ॥ १८ ॥

हिरंण्यपाणिस्सविता विचंर्षणिरुभे द्यावांपृथिवी अन्तरीयंते ।

अपामीवाम्बाधंते वेतिसूर्यमभि कृष्णेन रजंसा द्यामृणोति ॥ १९ ॥

हिरंण्यहस्तो असुंरस्सुनीथस्सुंमृळीकस्स्ववां यात्ववाङ् ।

अपसेधंन्रक्षसों यातुधानानस्थाद्देवः प्रति दोषङ्गृंणानः ॥ २० ॥

येते पन्थास्सवितःपूर्व्यासोऽरेणवस्सुकृंता अन्तरिक्षे ।

तेभिंर्नोअद्यपथिभिंस्सुगेभीरक्षा चनो अधिंच ब्रूहि देव ॥ २१ ॥

उभा पिंबतमश्विनो भानश्शर्म यच्छतम् ।

अविद्रियाभिंरूतिभिंः ॥ २२ ॥

अप्नस्वतीमश्विना वाचंमस्मे कृतन्नों दस्रा वृषणा मनीषाम् ।

अद्यूत्येऽवंसेनिह्वंये वाँव्वृधे चंनो भवतँव्वाजंसातौ ॥ २३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः ।

तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवीउद्यौः ॥ २४ ॥

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।

हिरण्ययेनसविता रथेना देवोयातिभुवनानिपश्यन् ॥ २५ ॥ (१)

(द्वितीयोऽनुवाकः २)

आरात्रि पार्थिवꣳ रजः पितुरप्रायिधामभिः ।

दिवस्सदाꣳसि बृहती वितिष्ठस आत्वेषँव्वर्तते तमः ॥ १ ॥

उपस्तच्चित्रमाभरास्मभ्यँव्वाजिनीवति ।

येन तोकञ्च तनयञ्च धामहे ॥ २ ॥

प्रातर्जितम्भगमुग्रꣳ हुवेम वयम्पुत्रमदितेर्यो विधर्ता ।

आध्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजा चिद्यम्भगम्भक्षीत्याह ॥ ३ ॥

पूषन्तवव्रते वयन्नरिष्येम कदाचन ।

स्तोतारस्त इहस्मसि ॥ ४ ॥

पथस्पथःपरिपतिंव्वचस्या कामेन कृतो अभ्यानळर्कम् ।

सनो रासच्छुरुधश्चन्द्राग्राधियन्धियꣳ सीषधाति प्रपूषा ॥ ५ ॥

त्रीणिपदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।

अतो धर्माणि धारयेन् ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्विप्रासो विपन्यवो जागृवाꣳ सस्समिन्धते ।
विष्णो र्यत्परमम्पदम् ॥ ७ ॥
घृतवती भुवनानामभिश्रियोर्वी पृथ्वीमधुदुघे सुपेशसा ।
द्यावापृथिवीवरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ८ ॥
ये नस्सपत्ना अपते भवन्त्विन्द्राग्निभ्यामव बाधमहे तान् ।
वसवो रुद्रा आदित्या उपरि स्पृशम्मोग्रञ्चेत्तारमधिराजमक्रन् ॥ ९ ॥
आनासत्या त्रिभिरेकादशैरिहदेवेभिर्यात म्मधुपेयमश्विना ।
प्रायुस्तारिष्टन्नीरपाꣳसि मृक्षतꣳ सेधत न्द्वेषो भवतꣳ सचा भुवा ॥१०॥
एषवस्तोमो मरुत इयङ्गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषायासीष्ट तन्वे वयाँव्विद्यामेषँव्वृजनञ्जीरदानुम् ॥ ११ ॥
सहस्तोमास्सहछन्दस आवृतस्सहप्रमा ऋषयस्सप्त दैव्याः ।
पूर्वेषाम्पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो नरश्मीन् ॥ १२ ॥
आयुष्यँव्वर्चस्यꣳ रायस्पोषमौद्भिदम् ।
इदꣳ हिरण्यँव्वर्चस्व ज्जैत्रायाविशतादुमाम् ॥ १३ ॥
नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजः प्रथमजꣳह्येतत् ।
योबिभर्तिदाक्षायणꣳ हिरण्यꣳ सदेवेषु कृणुते-
दीर्घमायुस्समनुष्येषु कृणुते दीर्घमायुः ॥ १४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः ।
तन्म आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ १५ ॥
उतनोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानास्तुता मन्त्राः कविशस्ता अवन्तु ॥ १६ ॥
इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अꣳशः ॥ १७ ॥
सप्त ऋषयः प्रतिहिताश्शरीरे सप्तरक्षन्ति सदमप्रमादम् ।
सप्ता पस्स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ-
सत्रसदौच देवौ ॥ १८ ॥
उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उपप्रयन्तुमरुतस्सुदानव इन्द्रप्राशूर्भवा सचा ॥ १९ ॥
प्रनूनम्ब्रह्मणस्पतिर्मन्त्रंव्वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकाꣳसि चक्रिरे ॥ २० ॥
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधितनयश्च जिन्व ।
विश्वन्तद्भद्रंय्यदवन्ति देवा बृहद्वदेम विदथेसुवीराः ।
यइमाविश्वा विश्वकर्मायोनः पितान्नपतेऽन्नस्य नोदेहि ॥२१॥ (२) हरिःओं

यज्जाग्रतःपञ्चविंशतिः (२५) आराण्येकविंशतिः (२१) द्वयोरनुवाकयोः षट्चत्वारिंशत् (४६) प्राणायवाजस्यहोता-यज्जाग्रतश्चषट्चत्वारिंशत् ।

इति शुक्लयजुर्वेदकाण्वसँहितापाठेत्रयस्त्रिंशतिमोऽध्याय हरिःॐ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ चतुस्त्रिंशतिमोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओं देवं सवितः प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय ।
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नस्स्वदतु ॥ १ ॥
तत्संवितुर्वरेण्यम्भर्गो देवस्य धीमहि ।
धीयो यो नः प्रचोदयात् ॥ २ ॥
विश्वानि देव सवितदुरितानिपरा सुव ।
यद्भद्रन्तन्न आसुव ॥ ३ ॥
विभक्तारꣳ हवामहे वसोश्चि त्रस्य राधसः ।
सवितारन्नृचक्षसम् ॥ ४ ॥
ब्रह्मणे ब्राह्मणङ्क्षत्राय राजन्यम्मरुद्भ्यो वैश्यन्तपसेशूद्रन्तमसे-
तस्करन्नारकाय वीरहणम् ।
पाप्मनै क्लीबमाक्रयायां अयोगूङ्कामाय पुंश्चलू-
मतिक्रुष्टाय मागधम् ॥ ५ ॥
नृत्ताय सूतङ्गीताय शैलूषन्धर्माय सभाचरन्नरिष्ठायै भीमलम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नर्मायं रेभꣳ हसाय कारिमानन्दायं स्त्रीषखम्प्रमदे कुमारी-

पुत्रम्मेधायै रथकारन्धैर्याय तक्षाणम् ॥ ६ ॥

तपसे कौलालम्मायायै कर्मारꣳ रूपायं मणिकारꣳ शुभे-

वपꣳ शरव्यायाइषुकारꣳ हेत्यैधनुष्कारम् ।

कर्मणेज्याकारन्दिष्टायं रज्जुसर्जम्मृत्यवै मृगयुमन्तकाय श्वनिनम् ॥ ७ ॥

नदीभ्यः पौञ्जिष्टमृक्षीकाभ्यो नैषादम्पुरुषव्याघ्रायं-

दुर्मदङ्गन्धर्वाप्सरोभ्यो व्रात्यम् ।

प्रयुग्भ्य उन्मत्तꣳ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यता-

याअकितवम्पिशाचेभ्यो बिदलकारीं यातुधानेभ्यः-

कण्टकीकारीम् ॥ ८ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

सन्धयै जारङ्गेहायोपपतिमार्त्यै परिवित्तन्निर्ऋत्यै परिविविदानमरा-

ध्याएदिधिषुः पतिन्निष्कृत्यै पेशस्कारीꣳ सञ्ज्ञानाय स्मरकारीम् ।

प्रकामोद्यायोपसदँव्वर्णायानुरुधम्बलायो पदाम् ॥ १ ॥

उत्सादेभ्यःकुब्जम्प्रमुदे वामनन्द्वार्भ्यस्स्रामꣳ स्वप्नायान्ध-

मधर्माय बधिरम्पवित्रायभिषजम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रज्ञाताय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षाया अभिप्रश्निनम्मर्या-
दायै प्रश्नविवाकम् ॥ २ ॥

अर्मेभ्यो हस्तिपञ्जवा याश्वपम्पुष्टयै गोपालँव्वीर्यायाविपालन्तेजं-
सेऽजपालमिरायै कीनाशम् ।

कीलालाय सुराकारम्भद्राय गृहपꣳ श्रेयसे वित्तमाध्यक्ष्या-
यानुक्षत्तारम् ॥ ३ ॥

भायैदा र्वाहारम्प्रभायाअग्न्येधम्ब्रध्नस्यविष्टपायाभिषेक्तारँव्वर्षिष्ठाय-
नाकाय परिवेष्टारम् ।

देवलोकाय पेशितारम्मनुष्यलोकाय प्रकरितारꣳ सर्वेभ्यो-
लोकेभ्य उपसेक्तार मवऋत्यै वधायोपमन्थितारम्मेधाय-
वासः पल्पूलीम्प्रकामामाय रजयित्रीम् ॥ ४ ॥

ऋतयै स्तेनहृदयँव्वैरहत्याय पिशुनँव्विविक्तयै क्षत्तारमौ-
पद्रष्ट्र्यायानुक्षत्तारम्ब लायानु चरम्भूम्ने परिष्कन्दम् ।

प्रियाय प्रियवादिनमरिष्ट्या अश्वसादꣳ स्वर्गाय-
लोकाय भागदुघँव्वर्षिष्ठाय नाकाय परिवेष्टारम् ॥ ५ ॥ (२)

(तृतीयोऽनुवाकः ३)

मन्यवेऽयस्तापङ्क्रोधाय निसरँय्योगाय योक्तारꣳ-
शोकायाभिसर्तारङ्क्षेमाय विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वपुषे मानस्कृतꣳ शीलायाञ्जनीकारी निर्ऋत्यै कोशकारीं यमायासुम् ॥१॥

यमाय यमसूमथर्वभ्योऽवतोकाꣳ सँवत्सराय पर्यायिणीम्परि-

वत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्कद्वरीम् ।

वत्सराय विजर्जराꣳ सँव्यत्सराय पलिक्नीमृभुभ्यो-

ऽजिनसन्धꣳ साध्येभ्यं श्चर्मम्नम् ॥ २ ॥

सरोभ्यो धैवरमुपस्थावराभ्यो दाशँवैशन्ताभ्यो-

वैन्दन्नड्वलाभ्यः शौष्कलम् ।

पाराय मार्गारमवाराय केवर्तन्तीर्थेभ्य आन्दम्विषमेभ्यो मैनालम् ।

स्वनेभ्यः पर्णकङ्गुहाभ्यः किरातꣳ सानुभ्यो-

जम्भकम्पर्वतेभ्यः किम्पूरुषम् ॥ ३ ॥

बीभत्सायै पौल्कसँव्वर्णाय हिरण्यकारन्तुलायै-

वाणिजम्पश्चादोषाय ग्लाविनँ व्विश्वेभ्यो भूतेभ्यं स्सिध्मलम् ।

भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनँ-

व्व्यृध्याअपगल्भꣳ संꣳ शरायंप्रच्छिदम् ॥ ४ ॥

अक्षराजाय कितवङ्कृतायादि नवदर्शन्त्रेतायै-

कल्पिनन्द्वापरायाधिकल्पिनमास्कन्दाय-

सभास्थाणुम्मृत्यवेगोव्य च्छमन्तकाय गोघातम् ।

44

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुधे योगौँब्विकृन्तन्तम्भिक्षमाण उपतिष्ठंति-
दुष्कृता यच्चरंकाचार्यम्पाप्मनै सैलगम् ॥ ५ ॥ (३)

———

(चतुर्थोऽनुवाकः ४)

प्रतिश्रुत्कायाअर्तनंङ्घोषाय भषमन्ताय बहुवादिनंमनन्ताय-
मूकः शब्दा याळम्बराघातम् ।
महंसे वीणावादङ्क्रोशाय तूणवध्ममंवरस्पराय शङ्खध्मँव-
नाय वनपमन्यतोऽरण्यायदावपम् ॥ १ ॥
नर्माय पुंश्चलूं हसायकारिंय्यादंसे-
शाबल्याङ्ग्रामण्यङ्गणकमभि कोशंकन्तान्महंसे ।
वीणावादम्पाणिघ्नन्तूणवध्मन्तान्नृत्तायानन्दाय तलवम् ॥ २ ॥
अग्नयेऽपीवानम्पृथिव्यै पीठसर्पिणँब्वायवे-
चाण्डालमन्तरिक्षायवंशनर्तिनन्दिवेखलतिंसूर्याय हर्यक्षम् ।
नक्षत्रेभ्यः किर्मिरश्चन्द्रमंसे किलासमह्वे-
शुक्लम्पिङ्गाक्षं रात्र्यै कृष्णम्पिङ्गाक्षम् ॥ ३ ॥
अथ तानष्टौ विरूपानालंभतेति शुक्लञ्चाति-
कृष्णश्चाति दीर्घञ्चाति ह्रस्वञ्च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिस्थूलञ्चाति कृशञ्चाति कूल्वञ्चाति-

लोमशञ्चाशूद्रा अब्राह्मणास्ते प्राजापत्याः ।

मागधः पुंश्चलीक्लीवः कितवोऽशूद्रा अब्राह्मणास्ते-

प्राजापत्याः ॥ ४ ॥ (४)

हरिः ओम्

देवसवितरष्ट (८) सन्धयेजारम्पश्च मन्यवेच (५)
प्रतिश्रुत्कायै चतस्रः (४) चतुरनुवाकेषु द्वाविंशतिः (२२)

इति शुक्लयजुर्वेदकाण्वसंहितापाठे चतुस्त्रिंशतिमोऽध्यायः

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ पञ्चत्रिंशतितमोऽध्यायः ।

(प्रथमोऽनुवाकः १)

हरिः ओं सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ।
सभूमिꣳ सर्वतस्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
पुरुष एवेदꣳ सर्वय्यद्भूतय्यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमातो ज्यायाꣳश्चपूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥
त्रिपादूर्ध्व उदैत्पुरुषः पा दोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥ ४ ॥
ततो विराळजायत विराजो अधि पूरुषः ।
सजातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥
तस्माद्यज्ञात्सर्वहुतस्सम्भृतम्पृषदाज्यम् ।
पशूꣳस्ताꣳश्चक्रे वायव्यानारण्या ग्राम्याश्चये ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्माद्यज्ञात्सर्वहुतऋचस्सामानि जज्ञिरे।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥

तस्मादश्वाः अजायन्त येके चोभयादतः।
गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥

तँय्यज्ञम्बर्हिषि प्रौक्षन्पुरुष ञ्जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्चये ॥ ९ ॥

यत्पुरुषँव्व्यदधुःकतिधा व्यकल्पयन्।
मुखङ्किमस्यासीत्किम्बाहूकिमूरू पादा उच्येते ॥ १० ॥

ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यःकृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रोअजायत ॥ ११ ॥

चन्द्रमामनसो जातश्चक्षोस्सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राण श्चमुखादग्निरजायत ॥ १२ ॥

नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौस्समवर्तत।
पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथा लोकाँ२अकल्पयन् ॥ १३ ॥

यत्पुरुषेण हविषादेवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्मश्शरद्धविः ॥ १४ ॥

सप्तास्यास न्परिधयस्त्रिस्सप्त समिधः कृताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवा यद्यज्ञन्तंन्वानाःअबंध्नन्पुरुषम्पशुम् ॥ १५ ॥

यज्ञेनं यज्ञमंयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

तेह नाकंम्महिमानं स्सचन्त यत्र पूर्वे साध्यास्सन्ति देवाः ॥ १६ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

अद्भ्यस्सम्भृंतः पृथिव्यै रसाच्च विश्वकंर्मणस्समं वर्तताग्रे ।

तस्य त्वष्टा विदधंद्रूपमेंति तन्मर्त्यंस्य देवत्वमा जानमग्रे ॥ १ ॥

वेदाहमेतम्पुरुंषम्महान्तं मादित्यवंर्णन्तमंसःपरस्तात् ।

तमेवविंदित्वाति मृत्युमेंति नान्यःपन्था विद्यतेऽयंनाय ॥ २ ॥

प्रजापंतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।

तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्हतस्थुर्भुवंनानि विश्वा ॥ ३ ॥

यो देवेभ्यं आतपंति यो देवानाम्पुरोहिंतः ।

पूर्वो यो देवेभ्यों जातो नमों रुचाय ब्राह्मंये ॥ ४ ॥

रुचम्ब्राह्मञ्जनयंन्तो देवा अग्रे तदंब्रुवन् ।

यस्त्वैवम्ब्राह्मणो विद्यात्तस्यं देवा अंसन्वशें ॥ ५ ॥

श्रीश्चंते लक्ष्मीश्च पत्न्यां अहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुम्मं इषाण सर्वलोकम्मं इषाण ॥ ६ ॥ (२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(तृतीयोऽनुवाकः ३)

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।

तदेव शुक्रन्तद्ब्रह्म तदापस्त त्प्रजापतिः ॥ १ ॥

सर्वेनिमेषा जज्ञिरे विद्युतः पुरुषादधि ।

नैनंमूर्ध्वन्नातिर्यञ्चन्न मध्ये परिजग्रभत् ॥ २ ॥

नतस्य प्रतिमा अस्ति यस्यनामं महद्यशः ।

हिरण्य गर्भ इत्येषः ॥ ३ ॥

एषोहंदेवः प्रदिशोऽनु सर्वाः पूर्वोह जातस्सउगर्भे अन्तः ।

स एव जातस्सजंनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतो मुखः ।

यस्मान्नजा तइत्येषः ॥ ४ ॥

वेनस्तत्पंश्यन्निहिं तद्गुहा सद्यत्र विश्वम्भवत्येकंनीळम् ।

तास्मिन्निद्ँ सञ्चविचैति सर्वँ सओतःप्रोतश्च विभूःप्रजासु ॥ ५ ॥

प्रतद्वोचेदमृतन्नु विद्वान्गन्धर्वो धाम विभृंतङ्गुहा सत् ।

त्रीणि पदानि निहिंतागुहास्ययस्तानि वेद सपितुः पितासंऽत् ॥ ६ ॥

सनो वन्धुर्जनिता सविधाता धामानि वेद भुवं नानि विश्वा ।

यत्रंदेवाःअमृतंमानशानास्तृतीये धामंन्नध्यैरंयन्त ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीत्यंभूतानिं परीत्यं लोकान्परीत्यसर्वाःप्रदिशोदिशंश्च ।

उपस्थायं प्रथमजा मृत स्यात्मनात्मानंमभिसँविवेश ॥ ८ ॥

परिद्यावापृथिवी सद्यइत्वा परिंलोकान्परिदिशःपरिस्वंः ।

ऋतस्य तन्तुंव्वितंतँव्विचृत्य तदंपश्यत्तदंभवत्तदासीत् ॥ ९ ॥

सदंसस्पति मद्भुतम्प्रियमिन्द्रंस्य काम्यंम् ।

सनिम्मेधामंयासिषंऽ स्वाहा ॥ १० ॥

याम्मेधान्दैंवगणाः पितरंश्चोपासंते ।

तयामामद्य मेधयाग्नें मेधाविंनङ्कुरु स्वाहा ॥ ११ ॥

इदम्मे ब्रह्मंच क्षत्रश्चोभे श्रियंमश्नुताम् ।

मयिं देवा दंधतुश्रियमुत्तंमान्तस्यैंते स्वाहा ॥ १२ ॥ (३)

(चतुर्थोऽनुवाकः ४)

अपेतो यंन्तु पणयोऽसुंम्ना देवपीयवंः ।

अस्य लोकस्सुतावंतः ॥ १ ॥

द्युभिरहोभिरक्तुभिर्व्यक्तंय्यमो दंदात्ववसानंमस्मै ।

सविता ते शरींरेभ्यः पृथिव्याँ ल्लोकमिच्छतु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मै युज्यन्तामुस्रियाः ॥ २ ॥

वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा ।

विमुच्यन्तामुस्रियाः ॥ ३ ॥

अश्वत्थे वो निषदनम्पर्णे वो वसतिष्कृता ।

गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ४ ॥

सविता ते शरीराणि मातुरुपस्थ आवपतु ।

तस्मै पृथिवि शम्भव ।

प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ ॥ ५ ॥

परम्मृत्यो अनुपरेहि पन्थाँय्यस्तेऽअन्य इतरो देवयानात् ।

चक्षुष्मते शृण्वते ते ब्रवीमि मानः प्रजाꣳ रीरिषो मोत वीरान् ॥ ६ ॥

शँव्वातश्शꣳ हि ते घृणिश्शन्ते भवन्त्विष्टकाः ।

शन्ते भवन्त्वग्नयः पार्थिवासो मात्वाभि शूशुचन् ॥ ७ ॥

कल्पन्तान्ते दिशस्तुभ्यमापः शिवतमास्तुभ्यम्भवन्तु सिन्धवः ।

अन्तरिक्षꣳ शिवन्तुभ्यङ्कल्पन्तान्ते दिशस्सर्वाः ॥ ८ ॥

अश्मन्वती रीयते सꣳरभध्वमुत्तिष्ठत प्रतरता सखायः ।

अत्रा जहीमोऽशिवाये असञ्छिवान्वयमुत्तरेमाभि वाजान् ॥ ९ ॥

अपाघमप किल्विषमपकृत्यामपो रपः ।

45

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपा मार्ग त्वमस्मदप दुःष्वप्न्यंꣳसुव ॥ १० ॥

सुमित्रियान आप ओषधयस्सन्तु दुर्मित्रियास्तस्मै सन्तु ।

योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः ॥ ११ ॥

अनड्वाहमन्वारभामहे स्वस्तये ।

सन इन्द्रइव देवेभ्यो वह्निस्सन्तारणो भव ॥ १२ ॥

उद्वयन्तमसस्परिस्वः पश्यन्तउत्तरम् ।

देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १३ ॥

अग्नआयूꣳषि पवस आसुवोर्जमिषञ्चनः ।

आरे बाधस्वदुच्छुनाम् ॥ १४ ॥

आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयो निरेधि ।

घृतम्पीत्वा मधुचारु गव्यम्पितेव पुत्रमभिरक्षतादिमान्त्स्वाहा ॥ १५ ॥

इमञ्जीवेभ्यः परिधिन्दधामि मैषान्नु गादपरो अर्थमेतम् ।

शतञ्जीवन्तुशरदः पुरूचीरन्तर्मृत्युन्दधताम्पर्वतेन ॥ १६ ॥

परीमे गामनेषत पर्यग्निमहृषत ।

देवेष्वक्रत श्रवःकइमाँ२आदधर्षति ॥ १७ ॥

क्रव्यादमग्निम्प्रहिणोमिदूरय्यमराज्यमराज्यंग च्छतु रिप्रवाहः ।

इहैवायमितरो जातवेदा देवेभ्यो हव्यँव्वहतु प्रजानन् ॥ १८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वह वपाञ्जातवेदः पितृभ्यो यत्रैं नान्वेत्थ निहिंतान्पराके।
मेदंसःकुल्या उपता न्त्स्रवन्तु सत्या
एंषामाशिषस्सन्तु कामास्स्वाहां ॥ १९ ॥
स्योनापृथिविनो भवाऽनृक्षरा निवेशंनी।
यच्छां नश्शर्मं सप्रथाः।
अपंनश्शोशुंचदघम् ॥ २० ॥
अस्मा त्वमधिं जातोंऽसि त्वदयञ्जायतांम्पुनंः।
असौ स्वर्गायं लोकाय स्वाहां।
अपं नश्शोशुंचदघम् ॥ २१ ॥ (४) हरिः ॐ

सहस्त्रशीर्षाषोडश (१६) अद्भ्यस्सम्भृतःपट् (६)
तदेवाग्निर्द्वादश (१२) अपेतोयन्त्वेकविंशतिः (२१)
चतुरनुवाकेषुपञ्चपञ्चाशत् (५५) अग्नेस्तनूरसि सहस्त्रशी-
र्षाचपञ्चपञ्चाशत् ॥

इति शुक्लययजुर्वेद काण्वसँहितादाठेपंचशति तमोऽध्यायः हरि ओम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ शुक्लयजुर्वेदकाण्वसंहितापाठेषट्त्रिंशहितमोऽध्यायायः

(प्रथमोऽनुवाकः १)

हरिः ओम् ऋचँव्वाचम्प्रपंद्ये मनो यजुः प्रपंद्ये सामं-
प्राणम्प्रपंद्ये चक्षुःश्रोत्रम्प्रपंद्ये ।
वागोजंस्सहोजो मयिं प्राणापानौ ॥ १ ॥
यन्मे छिद्रञ्चक्षुंषो हृदंय स्यमनंसो वातिंतृण्णम्बृहस्पतिर्मे तद्दंधातु ।
शन्नोंभवतु भुवंनस्य यस्पतिः ॥ २ ॥
भूर्भुवस्वः ।
तत्संवितुर्वरेण्यम्भर्गोदेवस्यं धीमहि ।
धियोयोनंः प्रचोदयात् ॥ ३ ॥
कयानश्चित्र आभुवदूती सदावृंधस्सखा ।
कया शचिंष्ठया वृता ॥ ४ ॥
कस्त्वासत्यो मदानाम्मःहिंष्ठो मत्सदन्धंसः ।
दृढाचिं दारुजेवसुं ॥ ५ ॥
अभीषुणस्सखीं नामविता जंरितृणाम् ।
शतम्भंवास्यूतिभिः ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कया त्वन्नं ऊत्याभि प्रमंन्दसे वृषन् ।

कया स्तोतृभ्य आभंर ॥ ७ ॥

इन्द्रो विश्वंस्य राजति ।

शन्नों अस्तु द्विपदे शञ्चतुंष्पदे ॥ ८ ॥

शन्नों मित्रश्शँव्वरुंणश्शन्नों भवत्वर्यमा ।

शन्नइन्द्रो बृहस्पतिश्शन्नो विष्णुंरुरुक्रमः ॥ ९ ॥

शन्नो वातः पवताꣳशन्नंस्तपतुसूर्यः ।

शन्नःकनिंक्रदद्देवः पर्जन्यों अभि वंर्षतु ॥ १० ॥

अहांनि शम्भंवन्तु नश्शꣳरात्रिःप्रतिंधीयताम् ।

शन्नं इन्द्राग्नी भंवतामवोंभिश्शान्न इन्द्रावरुंणा रातहंव्या ।

शान्नं इन्द्रापूषणा वाजंसातौ शमिन्द्रासोमां सुविताय शँय्योः ॥ ११ ॥

शन्नों देवीरभिष्टंय आपों भवन्तु पीतयें ।

शँय्योरभिस्रंवन्तुनः ॥ १२ ॥

स्योना पृंथिविनो भवानृक्षरा निवेशंनी ।

वच्छांनश्शर्मं सप्रथोंः ॥ १३ ॥

आपोहिष्ठा मं योभुवस्तानं ऊर्जे दंधातन ।

महे रणाय चक्षंसे ॥ १४ ॥

योवंश्शिवतंमोरसस्तस्यं भाजयतेहनंः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उश तीरिव मातरः ॥ १५ ॥

तस्मा अरंङ्गमामवो यस्यक्ष याय जिन्वथ ।

आपोजनयथाचनः ॥ १६ ॥

द्यौश्शान्तिरन्तरिक्षꣳ शान्तिःपृथिवी शान्तिरापश्शान्तिरोषधयश्शान्तिः ।

वनस्पतयश्शान्तिश्शान्तिरेवशान्तिः ॥ १७ ॥

धृतेदृꣳहमामित्रस्य माचक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।

मित्रस्याहश्चक्षुषासर्वाणि भूतानि समीक्षे ।

मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥

धृतेदृꣳहमा ।

ज्योक्ते सन्दृशि जीव्यासञ्ज्योक्ते सन्दृशिजीव्यासम् ॥ १९ ॥

नमस्ते हरसे शोचिषेनमस्ते अस्त्वर्चिषे ।

अन्याꣳस्ते अस्मत्तपन्तु हेतयःपावको अस्मभ्यꣳ शिवोभव ॥ २० ॥

नमस्ते अस्तु विद्युते तमस्तेस्तनयित्नवे ।

नमस्ते भगवन्नस्तु यतस्स्वस्समीहसे ॥ २१ ॥

यतो यतस्समीहसे ततोनो अभयङ्कुरु ।

शन्नःकुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥ २२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुमित्रियान आप ओषधयस्सन्तुदुर्मित्रिया स्तस्मै सन्तु ।

योऽस्मान्द्वेष्टियञ्च वयन्द्विष्मः ॥ २३ ॥

तच्चक्षुर्देवहितम्पुरस्ताच्छु क्रमुच्चरत् ।

पश्येम शरदश्शतञ्जीवेम शरदश्शतꣳ-

शृणुयामशरदश्शतम् ॥ २४ ॥ (१) हरिःओम् ॥

ऋचँव्वाचमित्येकानुवाके चतुर्विंशातिः (२४)

इति शुक्लयजुर्वेदकाण्वसँहिता पाठे षट्त्रिंशतिमोऽध्यायः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ शुक्लयजुर्वेदकाण्व संहितापाठेसप्तत्रिंशतितमोऽध्यायः ।

(प्रथमोऽनुवाकः १)

हरिः ओम् ॥ देवस्यं त्वा सवितुः प्रसवेऽश्विनों-

र्बाहुभ्याम्पूष्णो हस्ताभ्याम् ।

आददे नारिरसि ॥ १ ॥

युञ्जते मनं उत युञ्जते धियो विप्रा विप्रस्य बृह तो विपश्चितः ।

विहोत्रां दधे वयुनाविदेक इन्मही देवस्य सवितुःपरिष्टुतिः ॥ २ ॥

देवी द्यावा पृथिवी मखस्यं वामद्यशिरों राध्यासन्देवसजने पृथिव्याः ।

मखायंत्वा मखस्यं त्वा शीर्ष्णे ॥ ३ ॥

देव्यों बम्रियो भूतस्यं प्रथमजा मखस्यं वोऽद्य-

शिरों राध्यान्देव यजने पृथिव्याः ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ॥ ४ ॥

इयत्यग्रं आसीर्मखस्यं तेऽद्यशिरों राध्यासन्देवयजं ने पृथिव्याः ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रस्यौजस्थ म खस्यं वोऽद्यशिरो राध्यासन्देवयजने पृथिव्याः ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ॥ ६ ॥

प्रैतु ब्रह्मणस्पतिः प्रदेव्यैतु सूनृता ।

अच्छावीरन्नर्यम्पङ्क्तिराधसन्देवा यज्ञन्नयन्तुनः ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ।

मखस्यं त्वा मखस्यं त्वा शीर्ष्णे ॥ ७ ॥

मखस्य शिरोऽसि ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ।

मखस्य शिरोऽसि ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ।

मखस्य शिरोऽसि ।

मखायं त्वा मखस्यं त्वा शीर्ष्णे ।

मखायं त्वा मखायं त्वा शीर्ष्णे मखायं त्वा मखस्यं त्वा-

शीर्ष्णे मखायंत्वा मखस्यं त्वा शीर्ष्णे ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्वस्य त्वा वृष्णश्शक्ना धूपयामि देवयजने पृथिव्याः ।

मखाय त्वा मखस्य त्वा शीर्ष्णे ।

अश्वस्य त्वा वृष्णश्शक्ना धूपयामि देवय जने पृथिव्याः ।

मखाय त्वा मखस्य त्वा शीर्ष्णे ।

अश्वस्य त्वा वृष्णश्शक्ना धूपयामि देवयजने पृथिव्याः ।

मखाय त्वा मखस्य त्वा शीर्ष्णे ।

मखाय त्वा मखस्य त्वा शीर्ष्णे

मखाय त्वा मखस्य त्वा शीर्ष्णे ।

मखाय त्वा मखस्य त्वा शीर्ष्णे ।। ९ ।।

ऋजवेत्वा साधवेत्वा सुक्षित्यैत्वा ।

मखास्य त्वा मखस्य त्वा शीर्ष्णे ।

मखाय त्वा मखस्य त्वा शीर्ष्णे ।

मखाय त्वा मखस्य त्वा शीर्ष्णे ।। १० ।। (१)

—०—

(द्वितीयोऽनुवाकः ३)

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ।

देवस्त्वा सविता मध्वानक्तु पृथिव्यास्सꣳ स्पृशस्पाहि ।

अर्चिरसि शोचिरसि तपोऽसि ।। १ ।।

अनाधृष्टा पुरस्तादग्नेराधिपत्य आयुर्मेदाः पुत्रवती दक्षिणत-

इन्द्रस्याधिपत्ये प्रजाम्मेदाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपदा पश्चाद्देवस्यं सवितुराधिपत्ये चक्षुर्मेदाः आश्रुति-
रुत्तरतो धातुराधि पत्ये रायस्पोषंम्मेदाः ।
विधृंतिरुपरिष्टाद्बृहस्पते राधिपत्य ओजोंमेदा विश्वाभ्यो-
मानाष्ट्राभ्यं स्पाहिमनो रश्वासि ॥ २ ॥
स्वाहा मरुद्भिः परिंश्रीयस्व दिवस्सꣳ स्पृशंस्पाहि ।
मधु मधु मधुं ॥ ३ ॥ (२)

(तृतीयोऽनुवाकः ३)

गर्भो' देवानाम्पिता मंतीनाम्पतिःप्रजानांम् ।
सन्देवो देवेनं सवित्रागंतसꣳ सूर्येण रोचते ॥ १ ॥
समग्निरग्निनागत सन्दैवेन सवित्रासꣳ सूर्येणारोचिष्ट ।
स्वाहा समग्निस्तपंसागत सन्दैव्येन सवित्रासꣳ सूर्येणारूरुचत ॥ २॥
धर्ता दिवो विभाति तपंसस्पृथिव्यान्धर्ता देवो देवानाममंर्त्यस्तपोजाः ।
वाचंमस्मे नियंच्छ देवायुवंम् ॥ ३ ॥
अपंश्यङ्गोपामनिंपद्यमानमाचपराच पथिभिश्चरंन्तम् ।
ससध्रीचीस्सविषूचीर्वसान आवंरीवर्ति भुवंनेष्वन्तः ॥ ४ ॥
विश्वासाम्भुवाम्पते विश्वंस्य मनसस्पते विश्वंस्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचसस्पते सर्वस्य वचसस्पते ।

देवश्रुत्त्वन्देवघर्मदेवो देवान्पाह्यत्रप्रावीरनु वान्देव वीतये ॥

मधु माध्वीभ्याम्मधुमाधूचीभ्याम् ।

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ।

ऊर्ध्वो अध्वरन्दिवि देवेषु धेहि ॥५ ॥

पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मामा हिꣳसीः ।

त्वष्टृमन्तस्त्वा सपेम पुत्रान्पशून्मयि धेह्यरिष्टाहꣳ सहपत्त्या-

भूयासम् ॥ ६ ॥

अहः केतुना जुषताꣳ सुज्योतिज्योतिषा स्वाहा ।

रात्रिः केतुना जुषताꣳ सुज्योतिज्योतिषा स्वाहा ॥ ७ ॥ (३) हरिः ओम्

देवस्य त्वा दश (१०) यमाय तिस्रः (३) गर्भो देवानां

सप्त (७) त्रिष्वनुवाकेषु विंशतिः (२०)

इति शुक्लयजुर्वेद काण्व संहितापाठे सतत्रिंश तितमोऽध्यायः हरिःॐ

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ अष्टत्रिंशत्तितमोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओम् देवस्य त्वा सवितुः-

प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ।

आददेऽदित्यै रास्नासि ॥ १ ॥

इळ एह्यदित एहि सरस्वत्येहि ।

असावेह्य सावेह्यसावेहि ॥ २ ॥

अदित्यै रास्नासीन्द्राण्याः उष्णीषः ।

पूषासि घर्माय दीष्व ॥ ३ ॥

अश्विभ्याम्पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ।

स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ४ ॥

यस्ते स्तनश्शशयो योमयोभूर्यो रत्नधा वसु विद्यस्सुदत्रः ।

येन विश्वा पुष्यसि वार्याणि सरस्वतितमिह धातवेऽकः ।

उर्वन्तरिक्षमन्वेमि ॥ ५ ॥

गायत्रञ्छन्दोऽसि त्रैष्टुभञ्छन्दोऽसि द्यावापृथिवीभ्यान्त्वा-

परिगृह्णाम्यन्तरिक्षेणोपयच्छामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्राश्विना मधुंनस्सारघस्यं घर्मम्पात वसंवोयजंतवाट् ।

स्वाहा सूर्यस्य रश्मये वृष्टिवनंये ॥ ६ ॥ (१)

—०—

(द्वितीयोऽनुवाकः २)

समुद्रायंत्वा वाताय स्वाहा सरिरायंत्वा वाताय स्वाहा ।

अनाधृष्यायंत्वा वाताय स्वाहाऽप्रतिधृष्यायंत्वा वाताय स्वाहा ।

अवस्यवेंत्वा वाताय स्वाहाऽशिमिदायंत्वा वाताय स्वाहा ॥ १ ॥

इन्द्रायत्वा वसुंमते रुद्रवंते स्वाहेन्द्रांयत्वादि त्यवंते स्वाहां ।

इन्द्रांयत्वाभिमातिघ्ने स्वाहां सवित्रेत्वं ऋभुमतें विभुमते वाजं-

वतेस्वाहा बृहस्पतंयेत्वा विश्वदेंव्यावते स्वाहां ॥ २ ॥

यमाय त्वाङ्गिरस्वते पितृमतेस्वाहां ।

स्वाहा घर्माय स्वाहा घर्मःपित्रे ॥ ३ ॥

विश्वा आशां दक्षिणसत्सर्वान्देवानंयाळिह ।

स्वाहां कृतस्य घर्मस्य मधोः पिबतमश्विना ॥ ४ ॥

दिविधाइमँय्यज्ञमिमँय्यज्ञन्दिविधाः ।

स्वाहाग्नयेंयज्ञियांयशँय्यजुंभ्यः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्विनाघर्मम्पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः ।
तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥ ६ ॥
अपातामश्विना घर्ममनुद्यावापृथिवी अमꣳसाताम् ।
इहैवरातयस्सन्तु ॥ ७ ॥
इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व-
क्षत्राय पिन्वस्व द्यावापृथिवीभ्याम्पिन्वस्व ।
धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय-
ब्रह्म धारय क्षत्रन्धारय विशन्धारय ॥ ८ ॥ (२)

—०—

(तृतीयोऽनुवाकः ३)

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यस्स्वाहा प्रतिरवेभ्यः ।
स्वाहा पितृभ्य ऊर्ध्वबर्हिभ्यो घर्मपावभ्यस्स्वाहा-
द्यावापृथिवीभ्याꣳ स्वाहा विश्वेभ्यो देवेभ्यः ॥ १ ॥
स्वाहा रुद्राय रुद्रहूतये स्वाहा सञ्ज्योतिषाज्योतिः ।
अहः केतुनाजुषताꣳ सुज्योतिर्ज्योतिषास्वाहारात्रिः-
केतुनाजुषताꣳ सुज्योतिर्ज्योतिषास्वाहा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मधुं हुत सिन्द्रंतमे अग्ना अश्यामंते-

देवघर्म नमंस्ते अस्तुमामा हि॑ꣳसीः ॥ २ ॥ (३)

—०—

(चतुर्थोऽनुवाकः ४)

अभोमम्मंहिमा दिवंव्विप्रों बभूव सप्रथाः ।

उतश्रवंसा पृथिवीꣳ सꣳसीद स्वमहाँ२अंसि रोचंस्वदेव वीतंमः ॥

विधूममंग्ने अरुषम्मियेध्य सृजप्रंशस्त दर्शतम् ॥ १ ॥ (४)

—०—

(पञ्चमोऽनुवाकः ५)

यातें घर्म दिव्या शुग्या गायत्र्याꣳ हंविर्धानें ।

सात आप्यायतान्निष्टयाय तान्तस्यें ते स्वाहा ।

यातें घर्मान्तरिंक्षे शुग्या त्रिष्टुभ्याग्नींध्रे ।

सात आप्यायतान्निष्टयायतान्तस्यैं ते स्वाहा ।

यातें घर्मपृथिव्याꣳ शुग्याजगंत्याꣳ सदस्या ।

सात आप्यायतान्निष्टयायतान्तस्यैं ते स्वाहा ॥ १ ॥

क्षत्रस्यंत्वा परस्पाय ब्रह्मंण स्तन्वंम्पाहि ।

विशंस्त्वा धर्मंणा वयमनुंक्रामाम सुविताय नव्यंसे ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुं स्स्रक्तिर्नाभिर्ऋतस्यं सप्रथास्सनों-

विश्वायुंस्सप्रथास्सनंस्सर्वायुंस्सप्रथाः ।

अपद्वे षोअपह्वरोऽन्यव्रंतस्य सश्चिम ॥ ३ ॥

घर्भैतत्ते पुरीषन्तेन वर्धस्वचाऽचंप्यायस्व ।

वर्धिषीमहिंच वयमाचंप्यासिषीमहि ॥ ४ ॥

अचिंक्रदद्वृषा हरिर्महान्मित्रो नदंर्शतः ।

सꣳसूर्येण दिद्युंतदुदधिर्निधिः ॥ ५ ॥

सुमित्रियान आपओषंधयस्सन्तु दुर्मित्रियास्तस्मैं सन्तु ।

योऽस्मान्द्वेष्टि यश्चं वयन्द्विष्मः ॥ ६ ॥

उद्वयन्तमंसस्परिस्वः पश्यंन्त उत्तंरम् ।

देवन्देवत्रा सूर्यमगंन्मज्योतिरुत्तमम् ।

एधोऽस्येधिषीमहिं समिदंसि तेजोऽसि तेजो मयिं धेहि ॥ ७ ॥ (५)

—०—

(षष्ठोऽनुवाकः ६)

यावंती द्यावा पृथिवी यावंच सप्त सिन्धवो वितस्थिरे ।

तावंन्तमिन्द्र ते ग्रहंमूर्ज्जा गृह्णाम्यक्षि तम्मयिं गृह्णाम्यक्षितम् ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मयि त्यदिन्द्रियम्बृहन्मयि दक्षोमयि क्रतुः ।

घर्मस्त्रिशुग्विराजति विराजाज्योतिषा सह ब्रह्मणा तेजं सा सह ।

पयंसो रेत आभृतन्तस्य दोहमशीमह्युत्तरामुत्तराँ समाम् ॥ २ ॥ (६)

—०—

(सप्तमोऽनुवांकः ७)

त्विपंस्सँव्वृक्क्रत्वे दक्षस्य ते सुषुम्णस्यं ते सुषुम्णाग्निहुतः ।

इन्द्रं पीतस्य प्रजापंति भक्षितस्य मधुंमत-

उपहूत उपहूतस्य भक्षयामि ॥ १ ॥ ७ ॥ हरिः ओम्

देवस्य त्वा षट् (६) समुद्रायत्वाष्ट (८) स्वाहापूर्णेद्वे (२)
अभीममेका (१) याते सप्त (७) यावती द्वे (२) त्विष-
स्सँव्वृगेका (१) सप्तानुवाकेषु सप्तविंशतिः (२७)

इति शुक्लयजुर्वेदकाण्वसंहितापाठे अष्टत्रिंशोऽध्यायः हरिः ओम्

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ शुक्लयजुर्वेद काण्वासँहितापाठे एकोनचत्वारिंशोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओम् स्वाहा प्राणेभ्यस्साधिं पतिकेभ्यः पृथिव्यै स्वाहाग्नये-
स्वाहान्तरिं क्षाय स्वाहा वायवे स्वाहा दिवे स्याहा सूर्याय स्वाहा ।
दिग्भ्यस्स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यस्स्वाहाद्भ्यस्स्वाहा-
वरुणाय स्वाहा ।
नाभ्यै स्वाहा पूता यस्वाहा ॥ १ ॥ (१)

———

(द्वितीयोऽनुवाकः २)

वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा ।
चक्षुंषे स्वाहा च क्षुंषे स्वाहा श्रोत्राय स्वाहाश्रोत्रायस्वाहा ॥ १ ॥
मनंसःकाममाकूंतिंव्वाचस्सत्यमंशीय ।
पशूनाॅं रूपमन्नंस्य रसो यशःश्रीःश्रंयताम्मयिस्वाहा ॥ २ ॥ (२)

———

(तृतीयोऽनुवाकः ३)

प्रजापंतिस्सम्भ्रियमाणस्सम्राट्संम्भृं तो वश्वैदेवस्सं सन्नो-
धर्मःप्रवृक्तंस्तेज उद्यंत आश्विनः पयंस्यानीयमाने पूषा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्यन्दमाने मारुतःक्वथन् ।
मैत्रश्शरंसि सन्ताय्यमाने वायव्यौ ह्रियमाण आग्नेयो-
हूयमानो वाघ्युतः ॥ १ ॥ (३)

(चतुर्थोऽनुवाकः ४

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थे-
चन्द्रमाःपञ्चम ऋतुःषष्ठे मरुतस्सप्तमे बृहस्पतिरष्टमे ।
मित्रोनवमे वरुणो दशम इन्द्रएकादशे-
विश्वेदेवा द्वादशे ॥ १ ॥ (४)

(पञ्चमोऽनुवाकः ५)

उग्रश्भीमश्चध्वान्तश्चधुनिश्च ।
सासह्वाँश्चाभियुग्वाचविक्षिपस्स्वाहा ॥ १ ॥ (५)

(षष्ठोऽनुवाकः ६):

अग्निँ हृदयेनाशनिँ हृदयाग्रेण पशुपतिङ्कृत्स्न हृदयेन भवँय्यक्ना ।
शर्वम्पतस्नाभ्या भीशानम्मन्युना महादेवमन्त पर्शव्ये-
नोग्रन्देवँव्वनिष्ठुना वसिष्ठ हनुश्शिङ्गीनि कोश्याभ्याम् ॥ १ ॥ (६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(सप्तमोऽनुवाकः ७)

उग्रँल्लोहितेन मित्रꣳ सौव्रत्येन रुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीळेनं-
मरुतो बलेन सा ध्यान्प्रमुदां ।
भवस्य कण्ठ्यꣳ रुद्रस्यान्तःपार्श्वचम्महादेवस्ययकृच्छर्वस्य-
वनिष्ठुः पशुपतेः पुरीतत् ॥ १ ॥ (७)

(अष्टमोऽनुवाकः ८)

लोमभ्यस्स्वाहा लोमभ्यस्स्वाहा त्वचे स्वाहा त्वचे स्वाहा-
लोहिताय स्वाहा लोहिताय स्वाहा मेदसे स्वाहा मेदसे स्वाहा ।
माꣳसेभ्यस्स्वाहा माꣳसेभ्यस्स्वाहा स्नावभ्यास्वहास्नावभ्यस्वा-
हाऽस्थभ्यस्वाहास्थभ्यस्वाहा-
मज्जभ्य स्स्वाहा मज्जभ्यस्स्वाहा ।
रेतसे स्वाहा पायवे स्वाहा ॥ १ ॥ (८)

(नवमोऽनुवाकः ९)

आयासाय स्वाहा प्रायासाय स्वाहा सँय्यासाय-
स्वाहा वियासाय स्वाहोद्यासाय स्वाहा ।
शुचेस्वाहा शोचते स्वाहा शोकाय स्वाहा ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपसे स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा ।

निष्कृत्यै स्वाहा प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा ॥ २ ।

यमाय स्वाहान्तकाय स्वाहा मृत्यवेस्वाहा ।

ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यस्स्वाहा-

द्यावापृथिवीभ्यांꣳस्वाहा ॥ ३ ॥ (९) हरिःओम्

स्वाहाप्राणेभ्यएका (१) वाचेद्वे (२) प्रजापतिस्सम्भ्रि-
यमाणः (१) सविता प्रथमे (१) उग्रश्च (१) अग्निꣳहृद-
येन (१) उग्रँल्लोहितेन (१) लोमभ्यस्स्वाहाचेत्येकैका (१)
आयासायतिस्रः (३) नवानुवाकेषुद्वादश (१२)

इति शुक्लयजुर्वेदकाण्वसँहितापाठे एकोनचत्वारिंशोऽध्यायः हरिः ओम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

अथ शुक्लयजुर्वेद काण्वसँहिता पाठे चत्वारिंशतितमोऽध्यायः

(प्रथमोऽनुवाकः १)

हरिः ओम् ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्याञ्जगत् ।
तेन त्यक्तेन भुञ्जीथाःमागृधःकस्यं स्विद्धनम् ॥ १ ॥
कुर्वन्नेवेह कर्माणि जिजीविषे च्छतꣳ समाः ।
एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यतेनरे ॥ २ ॥
असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताꣳस्ते प्रेत्याभिगच्छन्ति येके चात्मह नो जनाः ॥ ३ ॥
अनेजदेकम्मनसोजवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धा वतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥
तदेजति तन्नेजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदुसर्वस्यास्य बाह्यतः ॥ ५ ॥
यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।
सर्वभूतेषुचात्मानन्ततो नविजुगुप्सते ॥ ६ ॥
यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्रकोमोहःकश्शोकःएकत्वमनुपश्यतः ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सपर्य्यगाच्छुक्रमं कायमंत्रणमंस्नाविरः शुद्ध मपापविद्धम् ।

कविर्मनीषी परिभूस्स्वयम्भूर्यथातथ्यतोऽर्थान्व्यंदधाच्छाश्वती-

भ्यस्समाभ्यः ॥ ८ ॥

अन्धन्तमः प्रविंशन्ति येऽविंद्यामुपासंते ।

ततो भूयं इवते तमोय उंविद्यायाः रताः ॥ ९ ॥

अन्यदेवाहुर्विद्ययान्यदाहुरविंद्यया ।

इति शुश्रुम धीराणाँय्येनस्तद्विचचक्षिरे ॥ १० ॥

विद्याञ्चाविंद्याञ्चयस्तद्वेदो भयः सह ।

अविंद्यया मृत्युन्तीर्त्वा विद्ययामृतंमश्नुते ॥ ११ ॥

अन्धन्द्रमःप्रविंशन्ति येऽसंम्भूतिमुपासंते ।

ततोभूयं इवते तमोय उसम्भूंत्याः रताः ॥ १२ ॥

अन्यदेवा हुस्संम्भवादन्यदाहुरसंम्भवात् ।

इतिशुश्रुम धीराणाँय्येनस्तद्विचचक्षिरे ॥ १३ ॥

सम्भूंतिञ्च विनाशञ्च यस्तद्वेदो भयः सह ।

विनाशेनं मृत्युन्तीर्त्वा सम्भूंत्यामृतंमश्नुते ॥ १४ ॥

हिरण्मयेन पात्रेण सत्यस्यापिंहितम्मुखंम् ॥

तत्त्वम्पूंषन्नपावृंणु सत्य धर्माय दृष्टये ॥ १५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूषंन्नेकर्षेयमसूर्य प्राजापत्य व्यूहरश्मीन्त्समूह-
तेजो यत्तें रूपङ्कल्याणतमन्तत्तें पश्यामि ।
योऽसावसौपुरुंषस्सोऽहमंस्मि ॥ १६ ॥
वायुरनिलममृ तमथेदम्भस्मान्तꣳ शरीरम् ।
ॐ ३क्रतोस्मरं कृतꣳ स्मंरक्रतो स्मरं कृतꣳ स्मंर ॥ १७ ॥
अग्ने नयं सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्म ज्जुंहुराणमेनो भूयिंष्ठान्ते नमं उक्तिँविधेम ॥ १८ ॥ (१)

हरिः ओम्

ईशावास्यमित्येकानुवाके अष्टादश ॥ १८ ।

इति शुक्लयजुर्वेद काण्वसँहिता पाठे चत्वारिंशतितमोऽध्यायः ॥ हरिः ॐ ॥

॥ इति शुक्लयजुर्वेदकाण्वसँहिता समाप्ता ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री शुक्लयजुर्वेदकाण्वशाखान्तर्गता

बृहदारण्यकोपनिषत्

ओं पूर्णमदः पूर्णमिदं ॥ पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ओं शान्तिः शान्तिः शान्तिः ॥

ओं उषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य ॥ द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यम् । दिशः पार्श्वे अवान्तदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो माꣳसानि ऊवध्यꣳसिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमानि उद्यन् पूर्वार्धो निम्लोचञ्जघनार्धोयद्विजृम्भते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॥ १ ॥ अहर्वा अश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावभितः संबभूवतुः । हयो भूत्वा देवानवहद्वाजी गन्धर्वानर्वाऽसुरानश्वो मनुष्यान् समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ २ ॥ इति प्रथमं ब्राह्मणम् ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत् अशनाययाशनाया हि मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वम् कꣳ ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद ॥ १ ॥ आपो वा अर्कस्तद्यदपाꣳ शर आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रान्तस्य तप्तस्य तेजो रसो निरवर्तताग्निः ॥ २ ॥ स त्रेधात्मानं व्यकुरुतादित्यं तृतीयँ वायु तृतीयꣳ स एष प्राणस्त्रेधा विहितः तस्य प्राची दिक्छिरोऽसौ चासौ चेर्मौ अथास्य प्रतीची दिक् पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौः पृष्ठमन्तरिक्षमुदमियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतिष्ठित्येवंविद्वान् । ॥ ३ ॥ सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मिथुनꣳ समभवदशनाया मृत्युस्तद्यद्रेत आसीत्स संवत्सरोऽभवत् न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभः । यावान्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जातमभिव्याददात्स भाणकरोत्सैव वागभवत् ॥ ४ ॥ स ऐक्षत यदि वा इममभिमꣳस्ये कनीयोऽन्नं करिष्य इति स तया वाचा तेनात्मनेदꣳ सर्वमसृजत यदिदं किंचर्चो यजूꣳषि सामानि छन्दाꣳसि यज्ञान् प्रजाः पशून् स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वꣳ सर्वस्यैत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यात्ता भवति सर्वपस्यान्नं भवति य एवमेतददितेरदितित्वं वेद ॥ ५ ॥ सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत्स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत् प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रान्तेषु शरीरꣳश्वयितुमध्रियत तस्य शरीर एव मन आसीत् ॥ ६ ॥ सोऽकामयत मेध्यं म इदꣳ स्यादात्मन्व्यनेन स्यामिति ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम्---एष ह वा अश्वमेधं वेद य एनमेवं वेद तमनवरुद्ध्यैवामन्यत तꣳ संवत्सरस्य परस्तादात्मन आलभत पशून्देवताभ्यः प्रत्यौहत् तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्त एष ह वा अश्वमेधो य एष तपति तस्य संवत्सर आत्मायमग्निरर्कस्तस्येमे लोका आत्मानस्तावेतावर्काश्वमेधौ सोपुनरेकैव देवता भवति मृत्युरेवापपुनर्मृत्युं जयति नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवत्येतासां देवतानामेको भवति ॥ ७ ॥ इति द्वितीयं ब्राह्मणम् ॥ २ ॥

द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति ॥ १ ॥ ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायत् यो वाचि भोगस्तं देवेभ्य आगायत् यत् कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनावि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मा ॥ २ ॥ अथ ह प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः प्राण उदगायद्यः प्राणे भोगस्तं देवेभ्य आगायद्यत् कल्याणं जिघ्रति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविऽध्यन्त्स यः स पाप्मा यदेवेमप्रतिरूपं जिघ्रति स एष स पाप्मा ॥ ३ ॥ अथ ह चक्षुरूचुस्त्वं न उद्गायेति तथेति तेभ्यश्चक्षुरुदगायत् यश्चक्षुपि भोगस्तं देवेभ्य आगायद्यत्कल्याणं पश्यति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥ ४ ॥ अथ ह श्रोत्रमूचुस्त्वं न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ शृणोति तदात्मने ते बिदुरनेन वै न उद्गात्रात्येप्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ शृणोति स एव स पाप्मा ॥ ५ ॥ अथ ह मन ऊचुस्त्वं न उद्गायेति तथेति तेभ्यो मन उदगायद्यो मनसि भोगस्तं देवेभ्य आगायद्यत् कल्याणꣳ संकल्पयति तदात्मने ते विदुरनेन वै न उद्गात्रास्येप्यन्तीतिं तमभिद्रुत्य पाप्मनाऽविध्यन्त्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ संकल्पयति स एव स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपासृजन्नेवमनाः पाप्मनाऽ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विध्यन् ॥ ६ ॥ अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तदभिद्रुत्य पाप्मनाविध्यन्त्स यथाऽश्मानमृत्वा लोष्ठो विध्वंसेतैवंहैव विध्वंसमाना विष्वञ्चो विनेशुस्ततो देवा अभवन् पराऽसुरा भवत्यात्मना परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद ॥ ७ ॥ ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आङ्गिरसोऽङ्गानांहि रसः ॥८॥ सा वा एषा देवता दूर्नाम दूरं ह्यस्या मृत्युर्दूरं ह वा अस्मान्मृत्युर्भवति य एवं वेद ॥ ९ ॥ सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयांचकार तदासां पाप्मनो विन्यदधात्तस्मान्न जनमियान्नान्तमियान्नेत्पाप्मानं मृत्युमन्ववायानीति ॥१०॥ सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैना मृत्युमत्यवहत् ॥ ११ ॥ स वै वाचमेव प्रथमामत्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥ १२ ॥ अथ प्राणमत्यवहत्स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥ १३ ॥ अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवभवत्सोऽसावादित्यः परेण मृत्युमतिक्रान्तस्तपति ॥ १४ ॥ अथ श्रोत्रमत्यवहत्तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वꣳस्ता इमा दिशः परेण मृत्युमतिक्रान्ताः ॥ १५ ॥ अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा अभवत्सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भात्येवꣳ ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद ॥ १६ ॥ अथात्मनेऽन्नाद्यमागायद्यद्धि किंचान्नमद्यतेऽनेनैव तदद्यत इह प्रतितिष्ठति ॥ १७ ॥ ते देवा अब्रुवन्नेतावद्वा इदꣳ सर्वं यदन्नं तदात्मन आगासीरनु नोऽस्मिन्नन्न आभजस्वेति ते वै माभिसंविशतेति तथेति तꣳ समन्तं परिण्यविशन्त तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्त्येवꣳ ह वा एनꣳ स्वा अभिसंविशन्ति भर्ता स्वानाꣳ श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य एवं वेद य उहैवं विदꣳस्वेषु प्रतिप्रत्तिर्बुभूषति न हैवालं भार्येभ्यो भवत्यथ य एवैतमनुभवति यो वै तमनुभार्यान्बुभूर्षति स हैवालं भार्येभ्यो भवति ॥ १८ ॥ सोऽयास्य आङ्गिरसोऽङ्गानाꣳ हि रसः प्राणो वा अङ्गानाꣳ रसः प्राणो हि वा अङ्गानाꣳ रसस्तस्माद्यस्माच्चाङ्गात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वा अङ्गानाꣳ रसः ॥ १९ ॥ एष उ एव बृहस्पतिर्वाग् वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः । ॥ २० ॥ एष उ एव ब्रह्मणस्पतिर्वाग् वै ब्रह्म तस्या एव पतिस्तस्मादु ब्रह्मणस्पतिः ॥ २१ ॥ एष उ एव साम वाग् वै सामैष सा चामश्चेति तत्साम्नः सामत्वं यद्वेद समः प्लुषिणा समो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव सामाश्नुते साम्नः सायुज्यꣳ सलोकतां य एवमेतत्साम वेद ॥ २२ ॥ एष उ वा उद्गीथः प्राणो वा उत् प्राणेन हीदꣳ सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेति स उद्गीथः ॥ २३ ॥ तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षनन्नुवाचायं त्यस्य राजा मूर्धानं विपातयताद्यदितोऽयास्य आङ्गिरसोऽन्येनोदगायदिति वाचा च ह्येव स प्राणेन चोदगायदिति ॥ २४ ॥ तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वं तस्य वै स्वर एव स्वं तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत तया वाचा स्वरसंपन्नयार्त्विज्यं कुर्यात्तस्माद्यज्ञे स्वरवन्तं दिदृक्षन्त एवाऽथो यस्य स्वं भवति भवति हास्य स्वं य एवमेतत्साम्नः स्वं वेद ॥ २५ ॥ तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥ २६ ॥ तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वागेव प्रतिष्ठा वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्न इत्यु हैक आहुः ॥ २७ ॥ अथातः पवमानानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं अगमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्मामृतं गमयामृतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह मृत्योर्माऽमृतं गमयेति नात्र तिरोहितमिवास्ति। अथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वरं वृणीत यं कामं कामयेत तꣳ स एष एवंविदुद्गातात्मने वा यजमानाय वा यं कामं कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्यताया आशास्ति य एवमेतत्साम वेद ॥ २८ ॥ इति तृतीयं ब्राह्मणम् ॥ ३ ॥

आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाथान्यन्नाम प्रब्रूते यदस्य भवति स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष औषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद ॥१॥ सोऽबिभेत्तस्मादेकाकी बिभेति स हायमीक्षांचक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्यभेष्यद्द्वितीयाद्वै भयं भवति ॥ २ ॥ स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् स हैतावानास यथा स्त्रीपुमाꣳसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधाऽपातयत्ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव ताꣳ समभवत्ततो मनुष्या अजायन्त।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ३ ॥ सो हेयमीक्षांचक्रे कथं नु मात्मन एव जनयित्वा संभवति हन्त तिरोऽसानीति सा गौरभवदृषभ इतरस्ताᳬसमेवाभवत्ततो गावोऽजायन्त वडवेतराभवदश्ववृष इतरो गर्दभीतरा गर्दभ इतरस्ताᳬसमेवाभवत्तत एकशफमजायताऽजेतराभवद्बस्त इतरोऽविरितरा मेष इतरस्ताᳬसमेवाभवत्ततोऽजावयोऽजायन्तैवमेव यदिदं किंच मिथुनमापिपीलिकाभ्यस्तत्स र्वमसृजत ॥ ४ ॥ सोऽवेदहं वाव सृष्टिरस्म्यहᳬहीदᳬसर्वमसृक्षीति ततः सृष्टिरभवत्सृष्ट्याᳬहास्यैतस्यां भवति य एवं वेद ॥ ५ ॥ अथेत्यभ्यमन्थत्स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतोऽलोमका हि योनिरन्तरतस्तद्यदि दमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा अथ यत्किंचेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदᳬसर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः सैषा ब्रह्मणोऽतिसृष्टिर्यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिरतिसृष्ट्याᳬहास्यैतस्यां भवति य एवं वेद ॥ ६ ॥ तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौनामायमिदᳬरूप इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौनामायमिदᳬरूप इति स एष इह प्रविष्ट आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वंभरो वा विश्वंभरकुलाये तं न पश्यन्ति अकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वदन् वाक्पश्यꣳश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव स योत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्व एकं भवन्ति तदेतत्पदनीयमस्य सर्वस्य यदयमात्मानेन ह्येतत्सर्वं वेद यथा ह वै पदेनानुविन्देदेवं कीर्तिꣳ श्लोक विन्दते य एवं वेद ॥ ७ ॥ तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात् प्रियꣳ रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति ॥ ८ ॥ तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्याः मन्यन्ते किमु तद्ब्रह्माऽवेद्यस्मात्तत्सर्वमभवदिति ॥ ९ ॥ ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत् तद्यो यो देवानां प्रत्युबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवꣳ सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाऽहं ब्रह्मास्मीति स इदꣳ सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषाꣳ स भवत्यथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवꣳ स देवानां यथा ह वै बहवः पशवो मनुष्यं भुञ्जुरेवमेकैकः पुरुषो देवान् भुनक्त्येकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्म वा इदमग्र आसीदेकमेव तदेकꣳ सन्न व्यभवत्तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति तस्मात् क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं य उ एनꣳ हिनस्ति स्वाꣳ स योनिमृच्छति स पापीयान् भवति यथा श्रेयाꣳसꣳ हिꣳसित्वा ॥ ११ ॥ स नैव व्यभवत् स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति ॥ १२ ॥ स नैव व्यभवत् स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयꣳ हीदꣳ सर्वं पुष्यति यदिदं किंच ॥ १३ ॥ स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत् क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान् बलीयाꣳसमाशꣳसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात् सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तꣳ सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति ॥ १४ ॥ तदेतद्ब्रह्म क्षत्रं विट् शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्याꣳहि रूपाभ्यां ब्रह्माभवत् अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स एनमविदितो न भुवक्ति यथा वेदो वाननूक्तोऽन्यद्वा कर्माकृतं यदिह वा अप्यनेवंविद्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते ऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते ॥ १५ ॥ अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितृणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयाꣳस्यापिपीलिकाभ्य उपजीवन्ति तेन तेषां लोको यथाह वै स्वाय लोकायारिष्टिमिच्छेदेवꣳ हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति तद्वा एतद्विदितं मीमाꣳसितम् ॥ १६ ॥ आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान् वै कामो नेच्छꣳश्च नातो भूयो विन्देत्तत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्यो कृत्स्नता मन एवास्यात्मा वाग्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विन्दते श्रोत्रं दैवꣳ श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्मात्मना हि कर्म करोति स एष पाङ्क्तो यज्ञः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाङ्क्तः पशुः पाङ्क्तः पुरुषः पाङ्क्तमिदꣳ सर्वं यदिदं किंच तदिदꣳ सर्वमाप्नोति य एवं वेद ॥ १७ ॥ इति चतुर्थं ब्राह्मणम् ॥ ४ ॥

यत्सप्तान्नानि मेधया तपसा जनयत्पिता । एकमस्य साधारणं द्वे देवानभाजयत् । त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत्तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न । कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा । यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन । स देवानपि गच्छति स ऊर्जमुपजीवतीति श्लोकः ॥ १ ॥ यत्सप्तान्नानि मेधया तपसाजनयत्पितेति मेधया हि तपसाऽजनयत्पितैकमस्य साधारणमिती- दमेवास्य तत्साधारणमन्नं यदिदमद्यते स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रꣳ ह्येतद्द्वे देवानभाजयदितिहुतं च प्रहुतं च तस्माद्देवेभ्यो जुह्वति च प्रच जुह्वत्यथो आहुर्दर्शपूर्णमासाविति तस्मान्नेष्टियाजुकः स्यात्पशुभ्य एकं प्रायच्छदिति तत्पयः पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवन्ति तस्मात् कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वानुधापयन्त्यथ वत्सं जातमाहुरतृणाद इति । तस्मिन् त्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि हीदꣳ सर्वं प्रतिष्ठित यच्च प्राणिति यच्च न तद्यदिदमाहुः संवत्सरं पयसा जुह्वदपपुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवंविद्वा न्सर्वꣳ हि देवेभ्योऽन्नाद्यं प्रयच्छति कस्मात्तानि न क्षीयन्तेऽद्यमानानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वेदेति पुरुषो वा अक्षितिः स हीदमन्नं पुनः पुनर्जनयते यो वै तामक्षितिं वेदेति पुरुषो वा अक्षितिः स हीदमन्नं धियाधिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत ह सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत्स देवानपि गच्छति स ऊर्जमुपजीवतीति प्रशꣳसा ॥ २ ॥ त्रीण्यात्मनेकुरुतेति मनो वाचं प्राणं तान्यात्मनेऽकुरुतान्यत्रमना अभूवं नादर्शमन्यत्रमनाः अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सैषा ह्यन्तमायत्तैषा हि न प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एवैतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥ ३ ॥ त्रयो लोका एत एव वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥ ४ ॥ त्रयो वेदा एत एव वागेवर्ग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥ ५ ॥ देवाः पितरो मनुष्याः एत एव वागेव देवाः मनः पितरः प्राणो मनुष्याः ॥ ६ ॥ पिता माता प्रजैत एव मन एव पिता वाङ्माता प्राणः प्रजा ॥ ७ ॥ विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत्किंच विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वाऽवति ॥ ८ ॥ यत्किंच विजिज्ञास्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद्भूत्वाऽवति। ॥ ९ ॥ यत्किंचाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वाऽवति ॥ १० ॥ तस्यै वाचः पृथिवी शरीरं ज्योती रूपमयमग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः ॥ ११ ॥ अथैतस्य मनसो द्यौः शरीरं ज्योती रूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनꣳ समैतां ततः प्राणोऽजायत स इन्द्रः स एषोऽसपत्नोऽद्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद ॥ १२ ॥ अथैतस्य प्राणस्यापः शरीरं ज्योती रूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य: आपस्तावानसौ चन्द्रस्त एते सर्व एव समाः सर्वेऽनन्ताः स यो हैतानन्तवत उपास्तेऽन्तवन्तꣳ स लोकं जयत्यथ यो हैताननन्तानुपास्तेऽनन्तꣳ स लोकं जयति ॥ १३ ॥ स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदशकला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्यतेऽप च क्षीयते सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै ॥ १४ ॥ यो वै स संवत्सरः प्रजापतिः षोडशकलोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पञ्चदशकला आत्मैवास्य षोडशी कला स वित्तेनैवा च पूर्यतेऽप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनागादित्येवाहुः ॥ १५ ॥ अथ त्रयो वाव लोकाः मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानाꣳ श्रेष्ठस्तस्माद्विद्यां प्रशꣳ सन्ति ॥ १६ ॥ अथातः संप्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किंचानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता। ये वै के च यज्ञास्तेषाꣳ सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषाꣳ सर्वेषां लोक इत्येकतैतावद्वा इदꣳ सर्वमेतन्मा सर्वꣳ सन्नयमितोऽभुनजदिति तस्मात् पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदेवंविदस्माल्लोकात्प्रैत्यथैभिरेव प्राणैः सह पुत्रमाविशति स यद्यनेन किंचिदक्ष्णया कृतं भवति तस्मादेनꣳ सर्वस्मात्पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिँल्लोके प्रतितिष्ठत्यथैनमेते दैवाः प्राणा अमृता आविशन्ति ॥ १७ ॥ पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥ १८ ॥ दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनानन्द्येव भवत्यथो न शोचति ॥ १९ ॥ अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः संचरꣳश्चासंचरꣳश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न व्यथतेऽथो न रिष्यति स एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतैवꣳ स यथैतां देवताꣳ सर्वाणि भूतान्यवन्त्येवꣳ हैवं विदꣳ सर्वाणि भूतान्यवन्ति यदु किंचेमाः प्रजाः शोचन्त्यमैवासां तद्भवति पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छति ॥ २० ॥ अथातो व्रतमीमाꣳसा प्रजापतिर्ह कर्माणि ससृजे तानि सृष्टान्यन्योन्ये-नास्पर्धन्त वदिष्याम्येवाहमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म तानि मृत्युः श्रमो मृत्वोपयेमे तान्याप्नोत्तान्याप्त्वा मृत्युरवारुन्धत्तस्माच्छ्राम्यत्येव वाक् श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नोद्योऽयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरेऽयं वै नः श्रेष्ठो यः संचरꣳश्चासंचरꣳश्च न व्यथतेऽथो न रिष्यति हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवꣳस्तस्मादेत एतेनाख्यायन्ते प्राणा इति तेन ह वाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद य उहैवंविदा स्पर्धतेऽनुशुष्यत्यनुशुष्य हैवान्ततो म्रियत इत्यध्यात्मम् ॥ २१ ॥ अथा-धिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे तप्स्याम्यहमित्यादित्यो भा-स्याम्यहमिति चन्द्रमा एवमन्या देवता यथादैवतꣳ स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानांवायुर्म्लोचन्ति ह्यन्या देवता न वायुः सैषाऽनस्तमिता देवता यद्वायुः ॥ २२ ॥ अथैष श्लोको भवति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति ते देवाश्चक्रिरे धर्मꣳ स एवाद्य स उ श्व इति यद्वा एतेऽमुर्ह्यध्रियन्त तदेवाप्यद्य कुर्वन्ति । तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरेत्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति ॥ २३ ॥ इति पञ्चमं ब्राह्मणम् ॥ ५ ॥

त्रयं वा इदं नामरूपं कर्म तेषां नाम्नां वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्ति ॥ १ ॥ अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठन्त्येतदेषाꣳ सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्ति ॥ २ ॥ अथ कर्मणामात्मेत्यतदेषामुक्थमतो हि सर्वाणि कर्माण्युत्तिष्ठन्त्येतदेषाꣳ सामैदद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्ति तदेतत्त्रयꣳ सदेकमयमात्माऽत्मो एकः सन्नेतत्त्रयं तदेतदमृतꣳ सत्येन छन्नं प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥ इति षष्ठं ब्राह्मणम् ॥ ६ ॥ इति प्रथमोऽध्यायः ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयोऽध्यायः

ॐ ॥ दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ।
॥ १ ॥ स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति
॥ २ ॥ स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहन्पाण्डरवासाः सोमो राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते
॥ ३ ॥ स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति
॥ ४ ॥
स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति स य एतमेवमुपास्ते पूर्यते प्रजया पशुभिनास्यास्माल्लोकात्प्रजोद्वर्तते ॥ ॥ ५ ॥ स होवाच गार्ग्यो य एवायं वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी ॥ ६ ॥ सहोवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संषदिष्ठाः विषासहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्ह भवति विषासहिर्हास्य प्रजा भवति ॥ ७ ॥ स होवाच गार्ग्यो य एवायमप्सु पुरुष एतमेवाहं-ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स य एतमेवमुपास्ते प्रतिरूपꣳ हैवैनमुपगच्छति नाप्रतिरूपमथो प्रतिरूपोऽस्माज्जायते॥ ॥ ८ ॥ स होवाच गार्ग्यो य एवायमादर्शे पुरुष एतमेवाहं ब्रह्मोपास- इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा रोचिष्णुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते रोचिष्णुर्ह भवति रोचिष्णुर्हास्य प्रजा-भवत्यथो यैः सन्निगच्छति सर्वाꣳस्तानतिरोचते ॥ ९ ॥ स होवाच गार्ग्यो य एवायं यन्तं पाश्चाच्छब्दोऽनूदेत्येतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्सवदिष्ठा असुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुरा का-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लात्प्राणो जहाति ॥ १० ॥ स होवाच गार्ग्यो य एवायं दिक्षु पुरुष-
एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः
द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेव-
मुपास्ते द्वितीयवान् ह भवति नास्माद्गणश्छिद्यते ॥ ११ ॥
स होवाच गार्ग्यो य एवायं छायामयः पुरुष एतमेवाहं
ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा मृत्युरिति
वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वँ᳘ हैवास्मिँ-
ल्लोक आयुरेति नैनं पुरा कालान्मृत्युरागच्छति ॥ १२ ॥ स होवाच
गार्ग्यो य एवायमात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचा-
जातशत्रुर्मा मैतस्मिसंवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य
एतमेवमुपास्त आत्मन्वीह भवत्यात्मन्विनी हास्य प्रजा भवति स ह
तूष्णीमास गार्ग्यः ॥ १३ ॥ स होवाचाजातशत्रुरेतावन्नु३ इत्येतावद्धीति
नैतावता विदि तं भवतीति स होवाच गार्ग्य उपत्वायानीति ॥ १४ ॥
स होवाचाजातशत्रुः प्रतिलोमं चैतद्यद्ब्राह्मणः क्षत्रियमुपेयाद्ब्रह्म मे
वक्ष्ययतीति व्येव त्वा ज्ञपयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह
पुरुषँ᳘ सुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयांचक्रे बृहन् पाण्डरवासः
सोमराजन्निति स नोत्तस्थौ तं पाणिनाऽऽपेषं बोधयांचकार स होत्तस्थौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ १५ ॥ स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति तदु ह न मेने गार्ग्यः ॥ १६ ॥ स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाग् गृहीतं चक्षुर्गृहीतꣳ श्रोत्रं गृहीतं मनः ॥ १७ ॥ स यत्रैतत्स्वप्न्यया चरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेतैवमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ॥ १८ ॥ अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ॥१९॥ स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ २० ॥ प्रथमं ब्राह्मणम् ॥ १ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो ह वै शिशुꣳ साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्धयं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाधानमिदं प्रत्याधानं प्राणः स्थूणान्नं दाम ॥ १ ॥ तमेताः सप्ताक्षितय उपतिष्ठन्ते तद्या इमा अक्षन् लोहिन्यो राजयस्ताभिरेनꣳ रुद्रोऽन्वायत्तोऽथ या अक्षन्नापस्ताभिः पर्जन्यो या कनीनका तयादित्यो यत्कृष्णं तेनाग्निर्यच्छुक्लं तेनेन्द्रोऽधरयैनं वर्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद ॥ २ ॥ तदेष श्लोको भवति। अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपं तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेत्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो विश्वरूपं प्राणानेतदाह तस्यासत ऋषयः सप्त तीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्घ्यष्टमी ब्रह्मणा संवित्ते ॥ ३ ॥ इमावेव गोतम भरद्वाजावयमेव गोतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद ॥ ४ ॥ इति द्वितीयं ब्राह्मणम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च ॥ १ ॥ तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्चै-तन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥ २ ॥ अथामूर्तं वायु-श्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यन्तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतम् ॥ ३ ॥ अथाध्यात्ममिदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमन्तरात्मन्नाकाश एतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो-ह्येषं रसः ॥ ४ ॥ अथामूर्तं प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमृतमेत-द्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं दक्षिणेऽक्षन्पुरुषस्त्यस्य ह्येष रसः ॥ ५ ॥ तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाऽग्न्य-र्चिर्यथा पुण्डरीकं यथासकृद्विद्युत्तꣳ सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेदाथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयꣳ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ ६ ॥ इति तृतीयं ब्राह्मणम् ॥ ३ ॥

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात्स्थाना-दस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥ १ ॥ सा होवाच

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्रैयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति। ॥ २ ॥ सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्हां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ३ ॥ सं होवाच याज्ञवल्क्यः प्रिया वतारे नः सती प्रियं भाषस एह्यास्व व्याख्या-स्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४ ॥ स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति न वा अरे पुत्राणां कामाय पुत्राः प्रियाः भवन्त्यात्मनस्तु कामाय पुत्राः प्रियाः भवन्ति न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रियाः भवन्ति न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे भूतानां कामाय भूतानि प्रियाणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम् ॥ ५ ॥ ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ६ ॥ स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ७ ॥ स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ८ ॥ स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ ९ ॥ स यथार्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि ॥ १० ॥ स यथा सर्वासामपाꣳ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुद्र कायनमेवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनमेवꣳ सर्वेषां गन्धानां नासिके कायनमेवꣳ सर्वेषाꣳ रसानां जिह्वैकायनमेवꣳ सर्वेषां रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ संकल्पानां मन एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामानन्दानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वेषामध्वनां पादावेकायनमेवꣳसर्वेषां वेदानां वागेकायनम् ॥ ११ ॥ स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवैवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवाऽनु विनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १२ ॥ सा होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यलं वा अर इदं विज्ञानाय ॥ १३ ॥ यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरꣳ शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कꣳ शृणुयात्तत्केन कमभिवदेत्तत् केन कं मन्वीत तत् केन कं विजानीयाद्ये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेदꣳ सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥ इति चतुर्थं ब्राह्मणम् ॥ ४ ॥

इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १ ॥ इमा आपः सर्वेषां भूतानां मध्वासामपाꣳ सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ २ ॥ अयमग्निःसर्वेषां भूतानां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमस्मिध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मदꣳ सर्वत् ॥ ३ ॥ अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन्वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ४ ॥ अयमादित्यः सर्वेषां भूतानां मध्यस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ५ ॥ इमाः दिशः सर्वेषां भूतानां मध्यासां दिशाꣳ सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वन् ॥ ६ ॥ अयं चन्द्रः सर्वेषां भूतानां मध्वस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिँꣳश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यत्मं मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृततिदं ब्रह्मेदꣳ सर्वम् ॥ ७ ॥ इयं विद्युत्सर्वेषां भूतानां मध्वस्यै विद्युतः सर्वाणि भूतानि मधु यश्चायमस्यां विद्युति तेयोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳसर्वम् ॥ ८ ॥ अयꣳ स्तनयित्नुः सर्वेषां भूतानां मध्वस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिन्स्तनयित्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिद ब्रह्मेदꣳ सर्वम् ॥ ९ ॥ अयमाकाशः सर्वेषां भूतानां मध्वस्याकाशस्य सर्वाणि भूताति मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १० ॥ अयं धर्मः सर्वेषां-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूतानां मध्वस्य धर्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमयः पुरुषोयश्चायमध्यात्मे धार्मत्तेजोमयो मृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ ११ ॥ इदꣳ सत्यꣳ सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चाऽयमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चाऽयमध्यात्मꣳ सात्यस्तेजोमयोऽमृतमयःपुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम् ॥ १२ ॥ इदं मानुषꣳ सर्वेषां भूतानां मध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चाऽयमस्मिन्मानुषे तेजोमयोऽतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १३ ॥ अयमात्मा सर्वेषां भूतानां मध्वस्यात्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वम् ॥ १४ ॥ स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानाꣳ राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिताः एवमैवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥ १५ ॥ इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् । तद्वां नरा सनयेदꣳस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिं । दध्यङ्ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्रयदीमु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचेति ॥ १६ ॥ इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् । आथर्वणायाश्विना दधीचेऽश्व्यꣳशिरः प्रत्यैरयतं। स वां मधु प्रवोचदृतायन्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति ॥ १७ ॥ इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् । पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति । स वा अयं पुरुषः सर्वासु पूर्षु पुरुशयो नैनेन किंचनानावृतं नैनेनकिंचानासंवृतम् ॥ १८ ॥ इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् । रूपꣳ रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय । इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥ १९ ॥ इति पञ्चमं ब्राह्मणम् ॥ ५ ॥

अथ वꣳशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥ आग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चानभिम्लात आनभिम्लातादानभिम्लात आनभिम्लातादानभिम्लातो गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्याꣳसैतवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाद्भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात् पाराशर्यो बैजवापायनाद्बैजवापायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥ घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात् कैशोर्यः काप्यः कुमारहारीतात्कुमारहारीतो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथःसौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीचः आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवोमृत्योः प्राध्वꣳसनान्मृत्युः प्राध्वꣳ सनः प्रध्वꣳसनात्प्रध्वꣳसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ३ ॥ इति षष्ठं ब्राह्मणम् ॥ ६ ॥ इति द्वितीयोऽध्यायः ॥ २ ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयोऽध्यायः

ओ३म् ॥ जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कः स्विदेषां ब्राह्मणानामनूचानतम इति स ह गवाꣳ सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥ १ ॥ तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति ते ह ब्राह्मणा न दधृषुरथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सोम्योदज सामश्रवा ३ इति ता होदाचकार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रुवीतेत्यथ ह जनकस्य वैदेहस्य होताश्वलो बभूव सहैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी ३ इति स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामाः एव वयꣳ स्म इति तꣳ ह तत एव प्रष्टुं दध्रे होताश्वलः ॥ २ ॥ याज्ञवल्क्येति होवाच यदिदꣳ सर्वं मृत्युनाप्तꣳ सर्वं मृत्युनाभिपन्नं केन यजमानो मृत्योराप्तिमतिमुच्यत इति होत्रर्त्विजाग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक् सोऽयमग्निः स होता स मुक्तिः सातिमुक्तिः ॥ ३ ॥ याज्ञवल्क्येति होवाच यदिदꣳ सर्वमहोरात्राभ्यामाप्तꣳ सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतिमुच्यत इत्यध्वर्युणर्त्विजा चक्षुषाऽऽदित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिदं चक्षुः सोऽसावादित्यः सोऽध्वर्युः स मुक्तिः सातिमुक्तिः ॥ ४ ॥ याज्ञवल्क्येति होवाच यदिदꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योऽयं प्राणः स वायुः स उद्गाता स मुक्तिः सातिमुक्तिः ॥ ५ ॥ याज्ञवल्क्येति होवाच यदिदमन्तरिक्षमनारम्बणमिव केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ब्रह्मणर्त्विजा मनसा चन्द्रेण मनो वै यज्ञस्य ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः साऽतिमुक्तिरित्यतिमोक्षा अथ संपदः ॥ ६ ॥ याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होतास्मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीया किं ताभिर्जयतीति यत्किंचेदं प्राणभृदिति ॥ ७ ॥ याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति या हुता अतिनेदन्ते या हुता अधिशेरते किं ताभिर्जयतीति या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि मनुष्यलोकः ॥ ८ ॥ याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्येकयेति कतमा सैकेति मन एवेत्यनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति ॥ ९ ॥ याज्ञवल्क्येति होवाच कत्ययमद्योद्गातास्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्याऽपानो याज्या व्यानः शस्या किं ताभिर्जयतीति पृथिवीलोकमेव पुरोनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्युलोकः शस्यया ततो ह होताश्वल उपरराम ॥ १० ॥ इति प्रथमं ब्राह्मणम् ॥ १ ॥

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इत्यष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति ॥ १ ॥ प्राणो वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन हि गन्धाञ्जिघ्रति ॥ २ ॥ वाग्वै ग्रहः स नाम्नातिग्राहेण गृहीतो वाचा हि नामान्यभिवदति ॥ ३ ॥ जिह्वा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान्विजानाति ॥ ४ ॥ चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥ श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दाञ्छृणोति ॥ ६ ॥ मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान्कामयते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ७ ॥ हस्तौ वै ग्रहः स कर्मणातिग्राहेण गृहीतो हस्ताभ्याᳪं हि कर्म करोति ॥ ८ ॥ त्वग्वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेद यत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः ॥ ९ ॥ याज्ञवल्क्येति होवाच यदिदᳪं सर्वं मृत्योरन्नं का स्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमप पुनर्मृत्युं जयति ॥१०॥ याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो ३ नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते सउच्छ्वयत्याध्मायत्याध्मातो मृतः शेते ॥ ११ ॥ याज्ञवल्क्येति होवाच-यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ताः विश्वेदेवा अनन्तमेव स तेन लोकं जयति ॥ १२ ॥ याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीᳪं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्तभागाऽऽवामेवैतस्य वेदिष्यावो न नावेतत् स जन इति तौ होत्क्रम्य मन्त्रयांचक्राते तौ ह यदूचतुः कर्म हैव तदुचतुरथ यत्प्रशशᳪंसतुः कर्म हैव तत्प्रशशᳪंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम ॥ १३ ॥ इति द्वितीयं ब्राह्मणम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेषु चरकाः पर्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाऽऽङ्गिरस इति तं यदा लोकानामन्तानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन् स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति ॥ १ ॥ स होवाचोवाच वै सोऽगच्छन्वै ते तद्यत्राश्वमेधयाजिनो गच्छन्तीति क्व न्वश्वमेधयाजितो गच्छन्तीति द्वात्रिꣳशतं वै देवरथाह्न्यान्ययं लोकस्तꣳ समन्तं पृथिवी द्विस्तावत्पर्येति ताꣳ समन्तं पृथिवीं द्विस्तावत्समुद्रः पर्यैति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्तरेणाकाशस्तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभवन्नित्येवमिव वै स वायुमेव प्रशशꣳस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरपपुनर्मृत्युं जयति य एवं वेद ततो ह भुज्युर्लाह्यायनिरुपरराम ॥ २ ॥ इति तृतीयं ब्राह्मणम् ॥ ३ ॥

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति स त आत्मा सर्वान्तरो यो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यानेन व्यानिति स त आत्मा सर्वान्तरो य उदानेनोदानिति स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः ॥ १ ॥ स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारꣳ शृणुयान मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वान्तरोऽन्यदार्तं ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥ इति चतुर्थं ब्राह्मणम् ॥ ४ ॥

अथ हैन कहोलः कौषीतकेयः पप्रच्छ याज्ञवल्क्येति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य स र्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोमे ह्येते एषणे एव भवतस्तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याऽथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एवातोऽन्यदार्तं ततो ह कहोलः कौषीतकेय उपरराम ॥ १ ॥ इति पञ्चमं ब्राह्मणम् ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिद२ँ सर्वमप्स्वोतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति गन्धर्वलोकेषु गार्गीति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीन्द्रलोकेषु गार्गीति कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति प्रजापति लोकेषु गार्गीति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गिमातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम ॥ १ ॥ इति षष्ठं ब्राह्मणम् ॥ ६ ॥

अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतञ्चलस्य काप्यस्य गृहेषु यज्ञमधीयानास्तस्यासीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबन्ध आथर्वण इति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिका२ँश्च वेत्थ नु त्वं काप्य तत्सूत्रं येनायं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तद्भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं परं च लोकꣳ सर्वाणि च भूतानि योऽन्तरो यमयतीति सोऽब्रवीत्पतञ्चलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतञ्चलं काप्यं याज्ञिकाꣳश्च यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वाꣳस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति यो वा इदं कश्चिद्ब्रूयाद्वेदवेदेति यथा वेत्थ तथा ब्रूहीति ॥ १ ॥ स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रꣳसिषतास्याङ्गानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवन्तीत्येवमेवैतद्याज्ञवल्क्यान्तर्यामिणं ब्रूहीति ॥ २ ॥ यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ३ ॥ योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ ४ ॥ योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ५ ॥ योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षꣳ शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ६ ॥ यो वायौ तिष्ठन्वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ७ ॥ यो दिवि तिष्ठन्दिवोऽन्तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ८ ॥ य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ९ ॥ यो दिक्षु तिष्ठन्दिग्भ्योऽन्तरो य दिशो न विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १० ॥ यश्चन्द्रतारके तिष्ठꣳश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद यस्य चन्द्रतारकꣳ शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ ११ ॥ य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १२ ॥ यस्तमसि तिष्ठꣳस्तमसोऽन्तरो यं तमो न वेद यस्य तमः शरीरं यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १३ ॥ यस्तेजसि तिष्ठꣳस्तेजसोऽन्तरो यं तेजो न वेद

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य तेजः शरीरं यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिदैवतमथाधिभूतम् ॥ १४ ॥ यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यꣳ सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीर यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिभूतमथाध्यात्मम् ॥ १५ ॥ यः प्राणे तिष्ठन्प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १६ ॥ यो वाचि तिष्ठन्वाचोऽन्तरो यं वाङ्न वेद यस्य वाक् शरीरं यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १७ ॥ यश्चक्षुषि तिष्ठꣳश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १८ ॥ यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यꣳ श्रोत्रं न वेद यस्य श्रोत्रꣳ शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ १९ ॥ यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ २० ॥ यस्त्वचि तिष्ठꣳस्त्वचोऽन्तरो यं त्वङ् न वेद यस्य त्वक् शरीरं यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ २१ ॥ यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानꣳ शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ॥ २२ ॥ यो रेतसि तिष्ठन् रेतसोऽन्तरो यꣳ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्यम्यमृतोऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्तं ततो होद्दालक आरुणिरुपरराम ॥ २३ ॥ इति सप्तमं ब्राह्मणम् ॥ ७ ॥

अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति पृच्छ गार्गीति॥ १ ॥ सा होवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति ॥ २ ॥ सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिꣳस्तदोतं च प्रोतं चेति ॥ ३ ॥ स होवाचयदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति ॥ ४ ॥ सा होवाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽऽपरस्मै धारयस्वेति पृच्छगार्गीति ॥ ५ ॥ सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्चेत्याचक्षते कस्मिँस्तदोतं च प्रोतं चेति ॥ ६ ॥ स होवाच यदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ ७ ॥ स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किंचन न तदश्नाति कश्चन ॥ ८ ॥ एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासामासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्त्येतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमन्वेतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशꣳसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः ॥ ९ ॥ यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः ॥ १० ॥ तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतꣳ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रोत्रमतं मंत्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥ ११ ॥ सा होवाच ब्राह्मणा भगवन्तस्तदेव बहुमन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ततो ह वाचक्नव्युपरराम ॥ १२ ॥ इति अष्टमं ब्राह्मणम् ॥ ८ ॥

अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति । ॥ १ ॥ स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति ॥ २ ॥ कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नक्षत्राणि चैते वसव एतेषु हीदं वसु सर्वꣳ हितमिति तस्माद्वसव इति ॥ ३ ॥ कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति ॥ ४ ॥ कतम आदित्या इति द्वादश वै मासाः संवत्सरस्यैत आदित्या एते हीदꣳ सर्वमाददाना यन्ति ते यदिदꣳ सर्वमाददाना यन्ति तस्मादादित्या इति ॥ ५ ॥ कतम इन्द्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति ॥ ६ ॥ कतमे षडित्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चा दित्यश्च द्यौश्चैते षडेते हीदꣳ सर्वꣳ षडिति ॥ ७ ॥ कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं पवत इति ॥ ८ ॥ तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निदꣳ सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षते ॥ ९ ॥ पृथिव्येव यस्यायतनमग्नि-र्लोकोमनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं-यमात्थ य एवायꣳ शारीरः पुरुषः स एष वदैव शाकल्य तस्य का देवतेत्यमृतमिति होवाच ॥ १० ॥ काम एव यस्यायतनꣳ हृदयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय इति होवाच ॥ ११ ॥ रूपाण्येव यस्यायतनं चक्षुर्लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेदवा अहं तं पुरुषꣳ सर्व स्यात्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य तस्य का देवतेति सत्यमिति होवाच ॥ १२ ॥ आकाश एव यस्यायतनꣳ श्रोत्रं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ श्रौत्रः प्रातिश्रुत्कः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति दिश इति होवाच ॥ १३ ॥ तम एव यस्यायतनꣳ हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं छायामयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति मृत्युरिति होवाच ॥ १४ ॥ रूपाण्येव यस्यायतनं चक्षुर्लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यत्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञववल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परायणं यमात्थ य एवायमादर्शे पुरुषः स एष वदैव शाकल्या-तस्य का देवतेत्यसुरिति होवाच ॥ १५ ॥ आप एव यस्यायतनꣳ हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायमप्सु पुरुषः स एष वदैव शाकल्य तस्य का देवतेति वरुण इति होवाच ॥ १६ ॥ रेत एव यस्यायतनꣳ हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मणः परायणं यमात्थ य एवायं पुत्रमयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति प्रजापतिरिति होवाच ॥ १७ ॥ शाकल्येति होवाच याज्ञ-वल्क्यस्त्वाꣳ स्विदिमे ब्राह्मणा अङ्गारावक्षयणमकता ३ इति ॥ १८ ॥ याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ १९ ॥ किंदेवतोऽस्यां प्राच्यां दिश्यसीत्यादि-त्यदेवत इति स आदित्यः कस्मिन् प्रतिष्ठित इति चक्षुपीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदय इति होवाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपायि प्रतिष्ठितानि भवन्तीत्येवमेवैत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्याज्ञवल्क्य ॥ २० ॥ किंदेवतोऽस्यां दक्षिणायां दिश्यसीति यमदेवत इति स यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति कस्मिन्नु यज्ञः प्रतिष्ठित इति दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति श्रद्धायाँ ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति होवाच हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येव-मेवैतद्याज्ञवल्क्य ॥ २१ ॥ किंदेवतोऽस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्न्वापः प्रतिष्ठिताः इति रेतसीति कस्मिन्नु रेतः प्रतिष्ठितमिति हृदय इति तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तो हृदयादिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥ २२ ॥ किंदेवतोऽस्या-मुदीच्यां दिश्यसीति सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति तस्मादपि-दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति होवाच हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्यक्य ॥ २३ ॥ किंदेवतोऽस्यां ध्रुवायां दिश्यसीत्यग्निदेवत इति सोऽग्निः कस्मि-न्प्रतिष्ठित इति वाचीति कस्मिन्नु वाक् प्रतिष्ठितेति हृदय इति कस्मिन्नु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृदयं प्रतिष्ठितमिति ॥ २४ ॥ अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासै यद्ध्येतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयाꣳसि वैनद्विमथ्नीरन्निति ॥ २५ ॥ कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्वपानः प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नूदानः प्रतिष्ठित इति समान इति स एष नेतिनेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्यतेऽसितो न व्यथते न रिष्यत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान्पुरुषान्निरुह्य प्रत्युह्या-त्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति तꣳ ह न मेने शाकल्यस्तस्य ह मूर्धा विपपातापि हास्य यरिमोषिणोऽस्थीन्यपजहुरन्यन्मन्यमानाः ॥ २६ ॥ अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥ तान् हैतैः श्लोकैः पप्रच्छ ॥ यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा ॥ तस्य लोमानि पर्णानि त्वगोस्योत्पाटिका बहिः ॥ त्वच एवास्य रुधिरं प्रस्यन्दित्वच उत्पटः ॥ तस्मात्तदा तृण्णात्प्रैति रसो वृक्षादिवाहतात् ॥ माꣳसान्यस्य शकराणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किनाटꣳस्नाव तत्स्थिरम् ॥ अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥ यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः ॥ मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ रेतस इति मावोचत जीवतस्तत्प्रजायते ॥ धानारुह इव वै वृक्षोऽञ्जसा प्रेत्यसंभवः ॥ यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् ॥ मर्त्यःस्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥ जात एव न जायते कोन्वेनं जनयेत्पुनः ॥ विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विद इति ॥ २८ ॥ इति नवमं ब्राह्मणम् ॥ ९ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ चतुर्थोऽध्यायः

जनको ह वैदेह आसांचक्रेऽथ ह याज्ञवल्क्य आवव्राज तꣳ होवाच याज्ञवल्क्य किमर्थमचारीः पशूनिच्छन्नण्वन्तानित्युभयमेव सम्राडिति होवाच ॥ १ ॥ यत्ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छैलिनिरब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य। वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता याज्ञवल्क्य वागेव सम्राडिति होवाच वाचा वै सम्राड्बन्धुः प्रज्ञायत ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्या नानीष्टꣳहुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट्प्रज्ञायन्ते वाग्वै सम्राट् परमं ब्रह्म नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ २ ॥ यदेव ते कश्चिदब्रवीत्तच्छृण-वामेत्यब्रवीन्म उदङ्कः शौल्बायनः प्राणो वै ब्रह्मेति यथा मातृमान्पितृमा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाचार्यवान्ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवायतनमाकाशः प्रतिष्ठा प्रियमित्येनदुपसीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट् कामायायाज्यं याजयत्यप्रतिगृह्यस्या-प्रतिगृह्णात्यपि तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट् कामाय प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवंविद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ३ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवा-मेत्यब्रवीन्मे बर्कुर्वार्ष्णश्चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रू-यात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य चक्षुरेवायतनमाकाशः प्रतिष्ठा सत्यमित्येनदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्राट् पश्यन्तमाहु-रद्राक्षीरिति स आहाद्राक्षमिति तत्सत्यं भवति चक्षुर्वै सम्राट् परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवंविद्वानेतदुपास्ते हस्त्युषभꣳ सहस्रं ददामीति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य श्रोत्रमेवायतनमाकाशः प्रतिष्ठानन्त इत्येनदुपासीत कानन्तता याज्ञवल्क्य दिश एव सम्राडिति होवाच तस्माद्वै सम्राळपि यां कां च दिशं गच्छति नैवास्या अन्तं गच्छत्यनन्ता हि दिशो दिशो वै सम्राट् श्रोत्रꣳ श्रोत्रं वै सम्राट् परमं ब्रह्म नैनꣳ श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ५ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे सत्यकामो जाबालो मनो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य मन एवायतनमाकाशः प्रतिष्ठाऽऽनन्द इत्येनदुपासीत काऽऽनन्दता याज्ञवल्क्य मन एव सम्राडिति होवाच मनसा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वै सम्राट् स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट् परमं ब्रह्म नैनं मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति॥ ६॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे विदग्धः शाकल्यो हृदयं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्योऽब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य हि किꣳस्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवायतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितता याज्ञवल्क्य हृदयमेव सम्राडिति होवाच हृदयं वै सम्राट् सर्वेषां भूतानामायतनꣳ हृदयं वै सम्राट् सर्वेषां भूतानां प्रतिष्ठा हृदये ह्येव सम्राट् सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति हृदयं वै सम्राट् परमं ब्रह्म नैनꣳ हृदयं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति। ॥७॥ इति बृहदारण्यके चतुर्थेऽध्याये प्रथमं ब्राह्मणम् ॥ १ ॥ जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन् रथं वा नावं वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्मास्येवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क गमिष्यसीति नाहं तद्भगवन्वेद यत्र गमिष्यामीत्यथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥ १ ॥ इन्धो ह नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥ अथैतद्वामेऽक्षणि पुरुषरूपमेषास्य पत्नी विराट् तयोरेष सꣳस्तावो य एषोऽन्तर्हृदय आकाशोऽथैनयोरेतदन्नं यएषोन्तर्हृदये लोहितपिण्डोऽथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिवाथैनयोरेषासृतिः संचरणी यैषा हृदयादूर्ध्वा नाड्युच्चरति यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्त्ये ताभिर्वा एतदास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मनः ॥ ३ ॥ तस्य प्राची दिक् प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणे प्राणाः प्रतीची दिक् प्रत्यञ्चः प्राणा उदीची दिगुदञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः सः होवाच जनको वैदेहोऽभयं त्वागच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे नमस्तेऽस्त्विमे विदेहा अयमहमस्मि॥ ॥ ४ ॥ इति चतुर्थे द्वितीयं ब्राह्मणम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तꣳहास्मै ददौ तꣳ सम्राडेव पूर्वः पप्रच्छ ॥ १ ॥ याज्ञवल्क्य किंज्योतिरयं पुरुष इत्यादित्यज्योतिः सम्राडिति होवाचादित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ २ ॥ अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ३ ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ४ ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य ॥ ५ ॥ अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव सहि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥ स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः सꣳसृज्यते स उत्क्रामन् म्रियमाणः पाप्पनोविजहाति ॥ ८ ॥ तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च सन्ध्यं तृतीयꣳ स्वप्नस्थानं तस्मिन्त्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं चाथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रम-माक्रम्योभयान्पाप्मन आनन्दाꣳश्च पश्यति स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंजोतिर्भवति ॥ ९ ॥ न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान् मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते स हि कर्ता ॥ १० ॥ तदेते श्लोका भवन्ति ॥ स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति ॥ शुक्रमादाय पुनरैतिस्थानꣳ हिरण्मयः पुरुष एक-हꣳसः ॥ ११ ॥ प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्या । स ईयतेऽमृतो यत्र कामꣳ हिरण्मयः पुरुष एकहꣳसः ॥ १२ ॥ स्वप्नान्त

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि । उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ॥ १३ ॥ आराममस्य पश्यन्ति न तं पश्यति कश्चनेति तं नायतं बोधयेदित्याहुः ॥ दुर्भिषज्यꣳ हास्मै भवति यमेष न प्रतिपद्यतेऽथो खल्वाहुर्जागरितदेश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयंज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥ १४ ॥ स वा एष एतस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव स यत्तत्र किंचित्पश्यत्य-नन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १५ ॥ स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १६ ॥ स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥ १७ ॥ तद्यथा महामत्स्य उभे कूलेऽनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनु-संचरति स्वप्नान्तं च बुद्धान्तं च ॥ १८ ॥ तद्यथास्मिन्नाकाशे श्येनो वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपर्णो वा विपरिपत्य श्रान्तः सꣳहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति ॥ १९ ॥ ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेदꣳ सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥ २० ॥ तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयꣳ रूपं तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरं तद्वा अस्यैतदाप्तकाममात्मकाममकामꣳ रूपꣳ शोकान्तरम् ॥ २१ ॥ अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदा अत्र स्तेनोऽस्तेनो भवति भ्रूणहा-ऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तप-सोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोका-न्हृदयस्य भवति ॥ २२ ॥ यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्य-द्विभक्तं यत्पश्येत् ॥ २३ ॥ यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ २४ ॥ यद्वै तन्न रसयते रसयन्वै तन्न रसयते नहि रसयितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत् ॥ २५ ॥ यद्वै तन्न वदति वदन्वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ २६ ॥ यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ २७ ॥ यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २८ ॥ यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति नहि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्वितीययस्वि ततोऽम्यद्विभक्तं यत्स्पृशेत् ॥ ॥ २९ ॥ यद्वै तन्न विजानाति विजानन्वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥ यत्र वा अन्यदिव स्यात्त-त्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्य-च्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात् ॥ ३१ ॥ ससिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैनमनुशशास

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

याज्ञवल्क्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुप-जीवन्ति ॥ ३२ ॥ स यो मनुष्याणाꣳ राद्धः समृद्धो भवत्यन्येषामधि-पतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितॄणां जितलोकानामानन्दोऽथ ये शतं पितॄणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसंपद्यन्तेऽथ ये शतं कर्मदेवानामानन्दाः स एकः आजान देवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रि-योऽवृजिनोऽकामहतोऽथ येशतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतोऽथैष एव परम आनन्द एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयां-चकार मेधावी राजा सर्वेभ्यो माऽन्तेभ्य उदरौत्सीदिति ॥ ३३ ॥ स वा एष एतस्मिन्स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव ॥ ३४ ॥ तद्यथाऽनः सुसमा-हितमुत्सर्जद्यायादेवमेवायꣳ शारीर आत्मा प्राज्ञेनात्मनान्वारूढ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्सर्जन्याति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥ स यत्रायमणिमानन्येति जरया वोपतपता वाणिमानं निगच्छति तद्यथाम्रं वोदुम्बरं वा पिप्पलं वा बन्धनात्प्रमुच्यत एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव ॥ ३६ ॥ तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीत्येवꣳ हैवंविदꣳ सर्वाणि भूतानि प्रतिकल्पन्त इदं ब्रह्मायातीदमागच्छतीति ॥ ३७ ॥ तद्यथा राजानं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योभिसमायन्त्येवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३८ ॥ इतीतृतीयं-ब्राह्मणम् ॥ ३ ॥

स यत्रायमात्माऽबल्यं न्येत्यसंमोहमिव न्येत्यथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति ॥ १ ॥ एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकीभवति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेनप्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति स विज्ञानो भवति स विज्ञानमेवान्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ २ ॥ तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमाक्रममाक्रम्यात्मानमुपसꣳहरत्येवमेवायमात्मेदꣳ शरीरं निहत्याऽविद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसꣳहरति ॥ ३ ॥ तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यान्नवतरं कल्याणतरꣳ रूपं तनुत एवमेवायमात्मेदꣳ शरीरं निहत्याऽविद्यां गमयित्वान्यन्नवतरं कल्याणतरꣳ रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानाम् ॥ ४ ॥ स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेनाथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते ॥ ५ ॥ तदेष श्लोको भवति ॥ तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य ॥ प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् ॥ तस्माल्लोकात्पुनरेत्यस्मै

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति ॥ ६ ॥ तदेष श्लोको भवति। यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥ यद्यथा-ऽहिनीर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदꣳ शरीरꣳ शेते-ऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः ॥ ७ ॥ तदेते श्लोका भवन्ति ॥ अणुः पन्था विततः पुराणो माꣳ स्पृष्टोऽनुवित्तो मयैव ॥ तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ८ ॥ तस्मिन्छुक्लमुत नीलमाहुः पिङ्गलꣳ हरितं लोहितं च ॥ एष पन्था ब्रह्मणहानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥ ९ ॥ अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ॥ ततो भूय इव ते तमो य उ विद्यायाꣳरताः। ॥ १० ॥ अनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः ॥ ताꣳस्ते प्रेत्याभिगच्छन्त्यविद्वाꣳसोऽबुधो जनाः ॥ ११ ॥ आत्मानं चेद्विजानी-यादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ १२ ॥ यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्त्संदेह्ये गहने प्रविष्टः ॥ स विश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव ॥ १३ ॥ इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदिर्महती विनष्टिः ॥ ये तद्विदुरमृ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तास्ते भवन्त्यथेतरे दुःखमेवापियन्ति ॥ १४ ॥ यदैतमनुपश्यत्यात्मानं देवमञ्जसा ॥ ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ १५ ॥ यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते ॥ तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥ १६ ॥ यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ॥ तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतम् ॥ १७ ॥ प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः ॥ ते निचिक्युर्ब्रह्म पुराणमग्र्यम् ॥ १८ ॥ मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ १९ ॥ एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ॥ विरजः पर आकाशादज आत्मा महान्ध्रुवः ॥ २० ॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनꣳ हि तदिति ॥ २१ ॥ स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवति एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति एतद्ध स्म वैतत्पूर्वे विद्वाꣳसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः ॥ स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्जतेऽसितो न व्यथते न रिष्यत्येतमुहैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः ॥ २२ ॥ तदेतदृचाभ्युक्तम् । एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् ॥ तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽत्मन्ये-वात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजो विचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राळिति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान् ददामि मां चापि सह दास्यायेति ॥ २३ ॥ स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु य एवं वेद ॥ २४ ॥ स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयꣳ हि वै ब्रह्म भवति य एवं वेद ॥ २५ ॥ इति चतुर्थे चतुर्थं ब्राह्मणम् ॥ ४ ॥

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ १ ॥ मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥ २ ॥ सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्स्यां न्वहं तेनामृताऽऽहो३ नेति नेति होवाह याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ ३ ॥ सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ४ ॥ स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृधद्धन्त तर्हि भवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥ स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रियाः भवन्ति न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे पशूनां कामाय पशवः प्रिया भवन्त्यात्मनस्तु कामाय पशवः प्रिया भवन्ति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे वेदानां कामाय वेदाः प्रिया भवन्त्कात्मनस्तु कामाय वेदाः प्रिया भवन्ति न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदꣳ सर्वं विदितम् ॥ ६ ॥ ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मेनो लोकान्वेद देवास्तं परादुर्योऽन्यत्रात्मनो लोकान्वेद वेदास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादुर्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदꣳ सर्वं यदयमात्मा ॥ ७ ॥ स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥ स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ९ ॥ स यथा वीणायै वाद्यमानयै न बाह्याञ्छ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥ स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि ॥ ११ ॥ स यथा सर्वासामपाꣳ समुद्र एकायनमेवꣳ सर्वेषाꣳ स्पर्शानां त्वगेकायनमेवꣳ सर्वेषां गन्धानां नासिके कायनमेवꣳ सर्वेषाꣳ रसानां जिह्वैकायनमेवꣳ सर्वेषाꣳ रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ संकल्पानां मन एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामानन्दानामुपस्थ एकायनमेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वेषामध्वनां पादावेकायनमेवꣳ सर्वेषां वेदानां वागेकायनम् ॥ १२ ॥ स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १३ ॥ सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्तमापीपिपन्न वा अहमिमं विजानामीति स होवाच

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा। ॥ १४ ॥ यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरꣳ रसयते तदितर इतरमभिवदति तदितर इतरꣳ शृणोति तदितर इतरं मनुते तदितर इतरꣳ स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कꣳ रसयेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत तत्केन कꣳ स्पृशेत्तत्केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति तं केन विजानीयात्स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि शीर्यतेऽसङ्गो न हि सज्जतेऽसितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥ १५ ॥ इति पञ्चमं ब्राह्मणम् ॥ ५ ॥

अथ वꣳशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥ आग्निवेश्यादाग्निवेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवात्सैतवः पाराशर्यायणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यन्दिनायनान्माध्यन्दिनायनः सौकरायणात्सौकरायणः काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥ घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभुब्रह्मणे नमः ॥ ३ ॥

इति षष्ठं ब्राह्मणम् ॥ ६ ॥ चतुर्थोऽध्यायः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चमोऽध्यायः

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ॥ पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ओं ३ खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ॥१॥ इति प्रथमं ब्राह्मणम् ॥ १ ॥

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा ३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ १ ॥ अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा ३ इति व्यासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ २ ॥ अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाचद इति व्यज्ञासिष्टा ३ इति व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति तदेतत्त्रयꣳ शिक्षेद्दमं दानं दयामिति ॥ ३ ॥ इति द्वितीयं ब्राह्मणम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एष प्रजातिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरꣳहृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ॥ १ ॥ इति तृतीयं ब्राह्मणम् ॥ ३ ॥

तद्वै तदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकान् जित इन्न्वसावसद्य एवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यꣳ ह्येव ब्रह्म ॥ १ ॥ इति चतुर्थं ब्राह्मणम् ॥ ४ ॥

आप एवेदमग्र आसुस्ता आपः सत्यमसृजन्त सत्यं ब्रह्म ब्रह्म प्रजापतिं प्रजापतिर्देवाꣳस्ते देवाः सत्यमेवोपासते तदेतत्त्र्यक्षरꣳ सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतꣳ सत्यभूयमेव भवति नैनं विद्वाꣳसमनृतꣳ हिनस्ति ॥ १ ॥ तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिꣳल्स यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मण्डलं पश्यति नैनमेते रश्मयः प्रत्यायन्ति ॥ २॥ य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ३ ॥ योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ४ ॥ इति पञ्चमं ब्राह्मणम् ॥ ५ ॥

मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच ॥ १ ॥ इति षष्ठं ब्राह्मणम् ॥ ६ ॥

विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युद्विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म ॥ १ ॥ इति सप्तमं ब्राह्मणम् ॥ ७ ॥

वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राणः ऋषभो मनो वत्सः ॥ १ ॥ इत्यष्टमं ब्राह्मणम् ॥ ८ ॥

अयमग्निर्वैश्वानरो योयमन्तः पुरुषे येनेदमन्नं पच्यते यदिद-मद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्र-मिष्यन्भवति नैनं घोषꣳ शृणोति ॥ १ ॥ इति नवमं ब्राह्मणम् ॥ ९ ॥

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा लम्बरस्य खं तेन स ऊर्ध्व आक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खं तेन स ऊर्ध्व आक्रमते स लोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीः समाः ॥ १ ॥ इति दशमं ब्राह्मणम् ॥ १० ॥

एतद्वै परमं तपो यद्व्याहितस्तप्यते परमꣳ हैव लोकं जयति य एवं वेदेतद्वै परमं तपो यं प्रेतमरण्यꣳ हरन्ति परमꣳ हैव लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति परमꣳ हैव लोकं जयति य एवं वेद ॥ १ ॥ इति एकादशं ब्राह्मणम् ॥ ११ ॥

अन्नं ब्रह्मेत्येक आहुस्तन्न तथा पूयति वा अन्नमृते प्राणात्प्राणो ब्रह्मेत्येक आहुस्तन्न तथा शुष्यति वै प्राण ऋतेऽन्नादेते हत्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतस्तद्ध स्माह प्रातृदः पितरं किꣳ स्विदेवैवं विदुषे साधु कुर्यां किमेवास्मा असाधु कुर्यामिति स ह स्माह पाणिना मा प्रातृद कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति तस्मा उ हैतदुवाच वीत्यन्नं वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणा वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एवं वेप ॥ १ ॥ इति द्वादशं ब्राह्मणम् ॥ १२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्थं प्राणो वा उक्थं प्राणो हीदं सर्वमुत्थापयत्युद्धास्मादुक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यं सलोकतां जयति य एवं वेद ॥ १ ॥ यजुः प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्यं सलोकतां जयति य एवं वेद ॥ २ ॥ साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते साम्नः सायुज्यं सलोकतां जयति य एवं वेद ॥ ३ ॥ क्षत्रं प्राणो वै क्षत्रं प्राणो वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्र क्षत्रमत्रमाप्नोति क्षत्रस्य सायुज्यं सलोकतां जयति य एवं वेद ॥ ४ ॥ इति त्रयोदशं ब्राह्मणम् ॥ १३ ॥

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ १ ॥ ऋचो यजूंषि सामानीत्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ २ ॥ प्राणोऽपानो व्यान इत्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदिदं प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेदाथास्या एतदेव तुरीयं दर्शतं पदं परो रजा य एष तपति यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृश इव ह्येष परोरजा

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति सर्वमु ह्येवैष रज उपर्युपरि तपत्येवꣳ हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ३ ॥ सैषा गायत्र्येतस्मिꣳ स्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता तद्वैतत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम तद्वै तत्सत्यं बले प्रतिष्ठितं प्राणो वै बलं तत्प्राणे प्रतिष्ठितं तस्मादाहुर्बलꣳ सत्यादोजीय इत्येवं वैषा गायत्र्यध्यात्मं प्रतिष्ठिता सा हैषा गयाꣳस्तत्रे प्राणा वै गयास्तत्प्राणाꣳस्तत्रे तद्यद्गयाꣳस्तत्रे तस्माद्गायत्री नाम स यामेवामूꣳ सावित्रीमन्वाहैषैवसा स यस्मा अन्वाह तस्य प्राणाꣳस्त्रायते ॥ ४ ॥ ताꣳहैतामेके सावित्रीमनुष्टुभमन्वाहुर्वागनुष्टुबेद्वताचमनुब्रूम इति न तथा कुर्याद्गायत्रीमेव सावित्रीमनुब्रूयाद्यदिह वा अप्येवविद्बह्विव प्रतिगृह्णाति न हैव तद्गायत्र्या एकं चन पदं प्रति ॥ ५ ॥ स य इमाꣳस्त्रींल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोऽस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति नैव केनचनाप्यं कुत उ एतावत्प्रतिगृह्णीयात् ॥ ६ ॥ तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदाय परोरजसेऽसावदोमा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवास्मै स कामः समृद्ध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ ७॥ एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रूथाः अथ कथꣳ हस्तीभूतो वहसीति मुखꣳ ह्यस्याः सम्राण्ण विदांचकारेति होवाच तस्या अग्निरेव मुखं यदिहवा अपि बह्विवाग्नावभ्यादधति सर्वमेव तत्संदहत्येवꣳ हैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति ॥ ८ ॥ इति पञ्चमस्य चतुर्दशं ब्राह्मणम् ॥ १४ ॥

हिरण्मयेन पात्रेण सत्ययस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये । पूषन्नेकर्षे यमसूर्यप्राजापत्य व्यूहरश्मीन्समूह तेजो यते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि । वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् । ॐ ३ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर । अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥ इति पञ्चमोऽध्यायः ॥ ५ ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षष्ठोऽध्यायः

ॐ ॥ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ १ ॥ यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ २ ॥ यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति स मे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥ ३ ॥ यो ह वै संपदं वेद सꣳ हास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपच्छ्रोत्रे हीमे सर्वे वेदा अभिसंपन्नाः सꣳहास्मै पद्यते यं कामं कामयते य एवं वेद ॥ ४ ॥ यो ह वा आयतनं वेदायतनꣳ स्वानां भवत्यायतनं जनानां य एवं वेद ॥ ५ ॥ यो ह वै प्रजापतिं वेद प्रजायते ह प्रजया पशुभी रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेद ॥ ६ ॥ ते हेमे प्राणा अहꣳश्रेयसे विवदमाना ब्रह्म जग्मुस्तद्धोचुः को नो वसिष्ठ इति तद्धोवाच यस्मिन्व उत्क्रान्त इदꣳ शरीरं पापीयो मन्यते स वो वसिष्ठ इति ॥ ७ ॥ वाग्घोच्चक्राम सा संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितमिति ते होचुर्यथा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥ ८ ॥ चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा अन्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः ॥ ९ ॥ श्रोत्रꣳ होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥ १० ॥ मनो होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा अविद्वाꣳसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥ ११ ॥ रेतो होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥ १२ ॥ अथ ह प्राण उत्क्रमिष्यन्यथा महासुहयः सैन्धवः पड्वीशशङ्कून्संवृहेदेवꣳ हैवेमान्प्राणान्त्संववर्ह ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

होचुर्मा भगव उत्क्रमीर्न व शक्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥ १३ ॥ सा ह वागुवाच यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसीति यद्वा अहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुर्यद्वा अहꣳ संपदस्मि त्वं तत्संपदसीति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदायतनमसीति मनो यद्वा अहं प्रजातिरस्मि त्वं तत्प्रजातिरसीति रेतस्तस्यो मे किमन्नं किं वास इति यदिदं किंचाश्वभ्य आक्रमिभ्य आकीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास इति न ह वा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतं य एवमेतदनस्यान्नं वेद तद्विद्वाꣳसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते ॥ १४ ॥ इति षष्ठे प्रथमं ब्राह्मणम् ॥ १ ॥

श्वेतकेतुर्ह वा आरुणेयः पञ्चालानां परिषदमाजगाम स आजगाम जैवलिं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमारा ३ इति स भो ३ इति प्रतिशुश्रावानुशिष्टो न्वसि पित्रेत्योमिति होवाच ॥ १ ॥ वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता ३ इति नेति होवाच वेत्थो यथेमं लोकं पुनरापद्यन्ता ३ इति नेति हैवोवाच वेत्थो यथासौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यता ३ इति नेति हैवोवाच वेत्थो यतिथ्यामाहुत्याꣳ हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती ३ इति नेति हैवोवाच वेत्थो देवयानस्य वा पथः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपदं पितृयाणस्य वा यत्कृत्वा देवयानं प्रतिपद्यन्ते पितृयाणं वापि हि न ऋषेर्वचः श्रुतम् । द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चेति नाहमत एकंचन वेदेति होवाच ॥ २ ॥ अथैनं वसत्योपमन्त्रयांचक्रेऽनादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं तꣳ होवाचेति वाव किल नो भवान्पुरानुशिष्टानवोचदिति कथꣳ सुमेध इति पञ्च मा प्रश्नान् राजन्यबन्धुरप्राक्षीत्ततो नैकंचन वेदेति कतमे त इतीम इति ह प्रतीकान्युदाजहार ॥ ३ ॥ स होवाच तथा नस्त्वं तात जानीथा यथा यदहं किंच वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास तस्मा आसनमाहृत्योदकमाहारयांचकाराथ हास्मा अर्घ्यं चकार तꣳ होवाच वरं भगवते गौतमाय दद्म इति ॥ ४ ॥ स होवाच प्रतिज्ञातो म एष वरो यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति ॥ ५ ॥ स होवाच दैवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति ॥ ६ ॥ स होवाच विज्ञायते हास्ति हिरण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां परिधानस्य मा नो भवान्बहोरनन्तस्यापर्यन्तस्याभ्यवदान्योऽभूदिति स वै गौतम तीर्थेनेच्छासा इत्युपैम्यहं भवन्तमिति वाचाह स्मैव पूर्व उपयन्ति स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ह्योपायनकीर्त्योवास ॥ ७ ॥ स होवाच तथा नस्त्वं गौतम मापराधा-
स्तव च पितामहा यथेयं विद्येतः पूर्वं न कस्मिमँश्चन ब्राह्मण उवास
तां त्वहं तुभ्यं वक्ष्यामि को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति
॥ ८ ॥ असौ वै लोकोऽग्निर्गौतम तस्यादित्य एव समिद्रश्मयो
धूमोऽहरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गात्तस्मिन्नेतस्मिन्नग्नौ
देवाः श्रद्धां जुह्वति तस्या आहुत्ये सोमो राजा संभवति ॥ ९ ॥
पर्जन्योवा अग्निर्गौतम तस्य संवत्सर एव समिदाभ्राणि धूमो
विद्युदचिरंशनिरङ्गारा हादुनयो विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः
सोमः राजानं जुह्वति तस्या आहुत्यै वृष्टिः संमयति ॥ १० ॥
अयं वै लोकोऽग्निर्गौतम तस्य पृथिव्यैव समिदग्निर्धूमो रात्रिरर्चिश्च-
न्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं
जुह्वति तस्या आहुत्या अन्नः संभवति ॥ ११ ॥ पुरुपो वाऽग्निर्गौतम
तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फु-
लिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः
संभवति ॥ १२ ॥ योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लो-
मानि धूमो योनिरर्चियदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गा-
स्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुपः संभवति
स जीवति यावज्जीवत्यथ यदा म्रियते ॥ १३ ॥ अथैनमग्नये हरन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्याग्निरेवाग्निर्भवति समित्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गारा विस्फुलिङ्गा विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति ॥ १४ ॥ ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धाꣳ सत्यमुपासते तेऽर्चिरभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं तान्वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान् गमयति तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः ॥ १५ ॥ अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति ते धूममभिसंभवन्ति धूमाद्रात्रिꣳ रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति ताꣳस्तत्र देवा यथा सोमꣳ राजानमाप्यायस्वापक्षीयस्वेत्येवमेनाꣳस्तत्र भक्षयन्ति ते पां यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यन्त आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृतिवीं प्राप्यान्नं भवन्ति ते पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ जायन्ते तेलोकान्प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्तेऽथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम् ॥ १६ ॥ इति षष्टे द्वितीयं ब्राह्मणम् ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स यः कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कꣳसे चमसे वा सर्वौषधं फलानीति संभृत्य परिसमुह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्याव्वृताज्यꣳ सꣳस्कृत्य पुꣳसा नक्षत्रेण मन्थꣳ संनीय जुहोति। यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कामान्। तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः कामैस्तर्पयन्तु स्वाहा। या तिरश्ची निपद्यतेऽहं विधरणी इति। तां त्वा घृतस्य धारया यजे सꣳराधनीमहꣳ स्वाहा ॥ १ ॥ ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमनयति चक्षुषे स्वाहा संपदे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति श्रोत्राय स्वाहाऽयतनाय स्वाहेऽऽत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ २ ॥ अग्नये स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सोमाय स्वहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भुवः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूर्भुवःस्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ब्रह्मणे स्वाहेत्ग्नौ हुत्वा मन्थे सꣳवमव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नयति क्षत्राय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूताय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भविष्यते स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति विश्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सर्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्रजापतये स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ ३ ॥ अथैन-मभिमृशति भ्रमदसि ज्वलदसि पूर्णमसि प्रस्तब्धमस्येकसभमसि हिंकृतमसि हिंक्रियमाणमस्युद्गीथमस्युद्गीथमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे संदीप्तमसि विभूरसि प्रभूरस्यन्नमसि ज्योतिरसि निधनमसि संवर्गोऽसीति ॥ ४ ॥ अथैनमुद्यच्छत्यामꣳ स्यामꣳ हि ते महि स हि राजेशानोऽधिपतिः स माꣳ राजेशानोऽधिपतिं करोत्विति ॥ ५ ॥ अथैनमाचामति तत्सवितुर्वरेण्यं मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीर्भूः स्वाहा भर्गो देवस्य धीमहि मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः मधु द्यौरस्तु नः पिता भुवः स्वाहा धियो यो नः प्रचोदयान्मधुमान्नो वनस्पतिर्मधुमाँ २ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः स्वः स्वाहेति सर्वां च सा-वित्रीमन्वाह सर्वाश्च मधुमतीरहमेवेदꣳ सर्वं भूयासं भूर्भुवः स्वः स्वाहेत्यन्तत आचम्य पाणी प्रक्षाल्य जघनेनाग्निं प्राक्शिराः संविशति प्रातरादित्यमुपतिष्ठते दिशामेकपुण्डरीकमस्यहं मनुष्याणामेकपुण्डरीकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो वꣳशं जपति ॥ ६ ॥ तꣳ हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ७ ॥ एतमुहैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैङ्ग्यायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ८ ॥ एतमुहैव मधुकः पैङ्ग्यश्चूलाय भागवित्तयेऽन्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ९ ॥ एतमु हैव चूलो भागवित्तिर्जानकाय आयस्थूणायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १० ॥ एतमु हैव जानकिरायस्थूणः सत्यकामाय जाबालायान्तेवासिन उक्त्वोवाचापि य नएꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ११ ॥ एतमु हैव सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति तमेतन्नापुत्राय वानन्तेवासिने वा ब्रूयात् ॥ १२ ॥ चतुरौदुम्बरो भवत्यौदुम्बरः स्रुव औदुम्बरश्चमस औदुम्बर इध्म औदुम्बर्या उपमन्थन्यौ दश ग्राम्याणि धान्यानि भवन्ति व्रीहियवास्तिलमाषा अणुप्रियङ्गवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान् पिष्टान्दधनि मधुनि

12

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घृत उपसिंचत्याज्यस्यजुहोति ॥ १३ ॥ इति षष्ठे तृतीयं ब्राह्मणम् ॥ ३ ॥

एषां वै भूतानां पृथिवी रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥ १ ॥ स ह प्रजापतिरीक्षांचक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियꣳ ससृजे ताꣳ सृष्ट्वाऽध उपास्त तस्मात्स्त्रियमध उपासीत स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत् ॥ २ ॥ तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान् ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति य एवं विद्वानधोपहासंचरत्यासाꣳ स्त्रीणाꣳ सुकृतं वृङ्क्तेऽथ य इदमविद्वानधोपहासंचरत्यास्य स्त्रियः सुकृतं वृञ्जते ॥ ३ ॥ एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहैतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य आहैतद्ध स्म वै तद्विद्वान्कुमारहारित आह बहवो मर्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्माल्लोकात्प्रयन्ति य इदमविद्वाꣳसोऽधोपहासं-चरन्तीति बहु वा इदꣳ सुप्तस्य वा जाग्रतो वा रेतः स्कन्दति ॥ ४ ॥ तदभिमृशेदनु वा मन्त्रयेत यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधीरप्य-सरद्यदप इदमहं तद्रेत आददे पुनर्मामैत्विन्द्रियं पुनस्तेजः पुनर्भगः पुनरग्निर्धिष्ण्या यथास्थानं कल्पन्तामित्यनाभित्यनामिकाङ्गुष्ठाभ्यामा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दायान्तरेण स्तनौ वा भ्रुवौ वानि मृज्यात् ॥ ५ ॥ अथ यद्युदक आत्मानं परि पश्येत्तदभिमन्त्रयेत मयि तेज इन्द्रियं यशो द्रविणꣳ सुकृतमिति श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासास्तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमन्त्रयेत ॥ ६ ॥ सा चेदस्मै न दद्यात्काममेनामवक्रीणीयात् सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेदिन्द्रियेण ते यशसा यश आदद इत्ययशा एव भवति ॥ ७ ॥ सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आदधामीति यशस्विनावेव भवतः ॥ ८ ॥ स यामिच्छेत्कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायोपस्थमस्या अभिमृश्य जपेत् अङ्गादङ्गात्संभवसि हृदयादधि जायसे । स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेमाममूं मयीति ॥ ९ ॥ अथ यामिच्छेन्न गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायाभिप्राण्यापान्यादिन्द्रियेण ते रेतसा रेत आदद इत्यरेता एव भवति ॥ १० ॥ अथ यामिच्छेद्दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायापान्याभिप्राण्यादिन्द्रियेण रेतसा रेत आदधामीति गर्भिण्येव भवति ॥ ११ ॥ अथ यस्य जायायै जारः स्यात्तं चेद्द्विष्यादामपात्रेऽग्निमुपसमाधाय प्रतिलोमꣳ शरबर्हिस्तीर्त्वा तस्मिन्नेताः शरभृष्टीः प्रतिलोमाः सर्पिषाक्ता जुहुयान्मम समिद्धेऽहौषीः प्राणापानौ त आददेऽसाविति मम समिद्धेऽहौषीः पुत्रपशूꣳस्त आद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देऽसाविति मम समिद्धेऽहौषीरिष्टासुकृते त आददेऽसाविति मम समिद्धेऽहौषीराशापराकाशौ त आददेऽसाविति स वा एष निरिन्द्रियो विसुकृतोऽस्माल्लोकात्प्रैति यमेवं विद्वान्ब्राह्मणः शपति तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति ॥ १२ ॥ अथास्य जायामार्तवं विन्देत्त्र्यहं कꣳसेन पिबेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥ १३ ॥ स य इच्छेत्पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १४ ॥ अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १५ ॥ अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रुवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १६ ॥ अथ य इच्छेद्दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १७ ॥ अथ य इच्छेत्पुत्रो मे पण्डितो विजिगीतः समितिंगमः शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदाननुब्रुवीत सर्वमायुरियादिति माꣳसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवा औक्षेण वार्षभेण वा ॥ १८ ॥ अथाभिप्रातरेव स्थालीपाकावृताज्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेष्टित्वा स्थालीपाकस्योपघातं जुहोत्यग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति हुत्वोद्धृत्य प्राश्नाति प्राश्येतरस्याः प्रयच्छति प्रक्षाल्य पाणी उदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्षत्युत्तिष्ठातो विश्वावसोऽन्यामिच्छ प्रपूर्व्यां संजायां पत्या सहेति ॥ १९ ॥ अथैनामभिपद्यतेऽमोहमस्मि सा त्वꣳ सा त्वमस्यमोऽहं सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेहि सꣳरभावहै सह रेतो दधावहै पुꣳसे पुत्राय वित्तय इति ॥ २० ॥ अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधाय त्रिरेनामनुलोमामनुमार्ष्टि । विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २१ ॥ हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ । तं ते गर्भं हवामहे दशमे मासि सूतये । यथाऽग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी । वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति ॥ २२ ॥ सोष्यन्तीमद्भिरभ्युक्षति यथा वायुः पुष्करिणीꣳ समिङ्गयति सर्वतः एवा ते गर्भ एजतु सहावैतु जरायुणा । इन्द्रस्यायं व्रजः कृतः सार्गलः सपरिश्रयः । तमिन्द्र निर्जहि गर्भेण सावराꣳ सहेति ॥ २३ ॥ जातेऽग्निमुपसमाधायाङ्क आधाय कꣳसे पृषदाज्यꣳ संनीय पृषदाज्यस्योपघातं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जुहोत्यस्मिन्सहस्रं पुष्यासमेधमानः स्वे गृहे। अस्योपसंद्यां मा च्छैत्सीत् प्रजया च पशुभिश्च स्वाहा। मयि प्राणाꣳस्त्वयि मनसा जुहोमि स्वाहा। यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्टꣳ सुहुतं करोतु नः स्वाहेति ॥ २४ ॥ अथास्य दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिरथ दधिमधुघृतꣳ संनीयानन्तर्हितेन जातरूपेण प्राशयति भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥ २५ ॥ अथास्य नाम करोति वेदोऽसीति तदस्य तद्गुह्यमेव नाम भवति ॥ २६ ॥ अथैनं मात्रे प्रदाय स्तनं प्रयच्छति। यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि। यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवेऽकरिति ॥ २७ ॥ अथास्य मातरमभिमन्त्रयते। इलासि मैत्रावरुणी वीरे वीरमजीजनत्। सा त्वं वीरवती भव यास्मान् वीरवतोऽकरदिति तं वा एतमाहुरतिपिता बताभूरतिपितामहो बताभूः परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मवर्चसेन य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ॥ २८ ॥ इति षष्ठे चतुर्थं ब्राह्मणम् ॥ ४ ॥

अथ वꣳशः पौतिमाषी पुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्र औपस्वस्तीपुत्रा दौपस्वस्तीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कात्यायनीपुत्रात्कात्यायनीपुत्रः कौशिकीपुत्रात्कौशिलीपुत्र आलम्बीपुत्राच्च वैयाघ्रपदीपुत्राच्च वैयापघ्रदीपुत्रः काण्वीपुत्राच्च कापीपुत्राच्च कापीपुत्रः ॥ १ ॥ आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वात्सीपुत्राद्वात्सीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्र शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्र आलम्बीपुत्रादालम्बीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रोमाण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः कौश्चिकीपुत्राभ्यां क्रौश्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगोपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः वाश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरिः ॥ २ ॥ याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाध्योगाज्जिह्वावान्बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्ये-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाख्यायन्ते ॥ ३ ॥ समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूकायने-र्माण्डूकायनिर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थे-र्माहित्थिर्वामकक्षायणाद्वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्या-द्वात्स्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचाराजस्तम्बायनस्तु-रात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभुब्रह्मणे नमः ॥ ४ ॥ इति षष्ठे पञ्चमं ब्राह्मणम् ॥ ५ ॥

॥ इति बृहदारयकोपनिषत्समाप्ता ॥ १० ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ॥ पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुद्धाऽशुद्धपत्रिका

पुटं	अशुद्धं	शुद्धं
३	पविप्रै	पवित्रै
,,	यज्ञं	यज्ञं
,,	द्रुस्त	द्रुस्त
४	कु क्कु टोंस	कु क्कु टोंऽसि
,,	मामादं	मामादं
५	धूतः	धूतः
,,	प्रेसवं	प्रंसवे
६	ध्वरं	ध्वर
,,	यंचं	यंचं
,,	अपाररुं	अपाररुं
७	तमतो	तमतो
,,	प्रप्युष्टः	प्रप्युंष्ठः
,,	सस्ना	रास्ना
,,	विन्दा	विन्द
९	जुष्टं	जुष्टां
,,	भूतानां	भूतानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धं
,,	धर्मणा	धर्मणा
१०	मांयज्ञन्यं	मांयज्ञन्यं
,,	स्थेषं	स्थेषं
११	अवतां	अवतां
१२	ज्योतिषां	ज्योतिंषां
,,	आदंददे	आदंदे
,,	ऊर्ग	ऊर्ग
,,	क्षेष्ठा	क्षेष्ठाः
१२	सवितुर्यज्ञं	सवितर्यज्ञं
१३	मनूज्जेषं	मनूज्जैषं
,,	वाजस्ये	बाजंस्यैर्न
,,	मावह	मावंह
१४	दुरिष्टयैं	दुरिष्टै
,,	मरुद्भिः	मरुद्भिः
१५	यथासत्	यथाऽसंत्
,,	च्च	च्चं
,,	जागतेन	जागंतेन
,,	पृभिव्या	पृथिव्यां
१६	तन्मेराधि	तन्मैंऽराधि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठं	अशुद्धं	शुद्धं
२२	रिपुरघ	रिपुरघ
,,	मभिसह	मभिसह
२८	मदेम	मंदेम
,,	रन्तरिं	रन्तरिंक्षात्
२९	मनंसे	मनंसे
३०	स्भर	स्थः
,,	उच्छ	उच्छं
,,	रुद्रे	रुद्रे
,,	रमृ	रमृ
३१	स्वाहाकृताः	स्वाहाकृताः
३२	पुन	पुन
३२	मावयं	
३३	चोदनौ	चोदंनौ
३८	धृष्टं	धृष्टं
३९	हि	हि-
४०	सधस्यथं	सधस्थं
४१	वीयैंण	वीर्येण
४२	देवमसि	देवमंसि
४७	मनुष्याणां	मनुष्यौणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठं	अशुद्धं	शुद्धम्
४८	संयंजमान-	संयजंमानः
४९	प्रयुतं	प्रयुंतं
५०	अन्तरिक्षं	अन्तरिंक्षं
५३	तादेंवीः	तादेंवीः
५४	सोमस्य	सोमंस्य
,,	मत्य	मर्त्यम्
५५	रि क्षं	रिंक्षं
६३	वावृ	वावृधानं
६८	चेक्रतुरग्रे	चक्रतुरग्रैं
,,	धूनो	धूनो
७७	शत्रून्	शत्रूंन्
७८	ददाातु	ददातु
७९	देवाः	देवाः
८०	जक्षि	जक्षि
८१	वक्षि	वक्षि
,,	गर्भो	गर्भो
९२	अग्ने	अग्ने
१०४	क्षत्रस्य	क्षत्रस्य
१०५	त्वष्टा	त्वष्टा
१०६	जुग्मुः	जग्मुः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धं
,,	मन्वन्य	मन्वन्य
१०९	केतपूः	केतपूः
१०९	इमन्नो	इमन्नों
,,	पुरीष्य	पुंरीष्यं
,,	सधस्थ	सधस्थ
११०	योगेयोगे	योगेंयोगे
११६	निपीदन्नो	श्रिपीदंन्नो
११७	स्वौपशा	स्वौंपशा
११८	रायस्पोष	राय स्योषं
१२४	विरूपे	तिरुंपे
,,	विराजति	विराजति
,,	तनूः	तनूः
१२६	मेनां	मेनां
,,	मह्म	मह्मं
१२७	जज्ञानो	जंज्ञानो
,,	रोद्सी	रोदंसी
,,	सोम	सोमं
१२८	सुशेवो	सुशेवों
१३०	अक्रविमं	अक्रंन्निमं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धं
१३०	शश्वत्तमं	शश्वत्रमं
१४१	पूर्वः	पूर्वीः
१४२	तपूँ	तपूँ
१४३	पृष्ठे	पृष्ठे
१४४	वैश्वानरः	वैश्वानरः
,,	सुकृतस्य	सुकृतस्यं
,,	अनुष्टुभाच	अनुष्टुभा च
१४५	देवहूतमान्	देवहूतंमान्
,,	अश्वान्	अश्वान्
१४६	व्योमन्	व्योंमन्
,,	द्विपादं	द्विपादम्
,,	जतायाग्ने	जनायाग्ने
१४९	श्रोत्रं	श्रोत्रं
१५१	ध्रुवासि	ध्रुवासिं
,,	जुषाण-	जुंषाणा
,,	नाध्वर्यू	नाध्वर्यू
,,	सिद्व	सीद
,,	धत्रीं	धर्त्री
१५३	सजूः	सजूः
,,	वृष्टि	वृष्टि
१५४	पुरुषो	पुरुंषो
,,	अस्येन्द्रं	अस्येन्द्रं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धं
१५४	पृष्ठेन	पृष्ठेन
५१५	नभस्यश्च	नभस्यंश्च
१६४	हेतीनां	हेतीनां
१६६	सर्वे	सर्वे'
१६९	स्वध्वरं	स्वध्वरं
१७१	सोचिष्ठ	शोचिष्ठ
१७३	ताअत्य	ताःअंस्य
१७४	आदस्य	आदस्य
,,	सीदतं	सीदतं
,,	उतनं	उतैंनं
१८४	इषेव;	इषैवः
१८८	मनीषिणो	मनीषिणो
१९०	पूर्वे	पूर्वे'
१९२	उक्षास	उक्षासंमुद्रो
१९४	मितासश्च	मितासंश्च
,,	आधीतं	आधीतं
,,	अक्षितत्तमे	अक्षितंचमे
१९४	सप्त	सप्त
२००	आधीतं	आधीतं
,,	महश्चमे	सहंश्चमे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुट	अशुद्धं	शुद्धं
२०२	अक्षुच्चमे	अक्षुंच्चमे
२०५	तुर्यौंही	तुर्यौंही
२०८	विश्वे	विश्वं
२०९	गुन्धर्वः	गन्धर्वः
२१०	रुधं	रुचं
,,	ताभि	ताभिंर्नो
उ११	संपर्ण	सुंपर्ण
२१४	बयंते	वयन्तें
,,	धामच्छत्	धामच्छत्
२१५	परिस्तु	परिस्तुतः
२१६	बलायत्वा	बलायत्वा
,,	व्याघ्रं	व्याघ्रं
२१७	सोमापु	सोंमाः
२१९	संभृंत	संभृंत
२२०	पुनन्तुमा	पुनन्तुंमा
२२१	मवंर	मवंर
२२२	षितृभिः	पितृभिंः
२२३	षितरः	पितरः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठं	अशुद्धं	शुद्धं
२२४	मन्धसः	मन्धंसः
२२६	वहुधा	वहुधा
,,	स्वधांपि	स्वधांपितृभ्यः
२२७	वृकस्य	वृकंस्य
२३४	उपहूत	उपंहूत
२३६	एवेद्विन्द्रं	एवेदिन्द्रं
२३७	सायमिन्द्रियः	सायमिन्द्रियैः
२३९	सरस्वती	सरंस्वती
२४०	वरिवोविर्दं	वरिवोविर्दं
२४१	विंत्रे	विप्रंजूतः
२४३	गव्यूति	गव्यूंतिं
२४४	महीव्रह्मा	महीर्व्रह्मा
२४७	मधु	मधु
,,	परिस्रुतो	परिस्रुता
२४८	अश्विनौ छागं	अश्विनौच्छागंस्य
२४९	अङ्गोदङ्गात्	अगांदंगात्
२५७	विधून्वानाय	विधून्वानाय
,,	कुर्वंते	कुर्वते
,,	तस्मं	तस्मैं
,,	भर्गे	भर्गो'

2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धम्
२५८	संवितुरीं	संवितुरींमहे
२५९	गोधीरया	गोजीरया
२६१	व्यानायस्वहाय	व्यानायस्वाहा
२६३	रश्मिभ्य	रश्मिभ्यस्वाहा
,,	स्वाहा	स्वाहा
२६६	महित्वकै	महित्वैक
२६७	काम्या	काम्या
,,	अगनीगन्	अगनीगन्
,,	त्तेना	तेना
२७०	मध्य	मध्यं
२७२	इहेहैषां	इहेहैषां
२७३	वर्षीयः	बर्षीयः
२७४	बृहतो	बृहतो
२७६	अश्वंस्तूपरो	अश्वंस्तूपरो
,,	सौमा	सौमा
,,	ता क्षो	ता क्षौ
२७७	पार्जन्याः	पार्जम्याः
२७८	भुर्य	तुर्य
२८०	मित्राय	मित्रायं
,,	पत्नीभ्यः	पत्नीभ्यः
२८४	अथ नवमोऽध्यायः	सप्तविंशतितमोऽध्यायः
२८५	,,	,,
२८७	,,	,,
२८७	विड्भि,	विघुडिंभर्नीहारं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धं
,,	कुलज्ञान्	कुलज्ञान्
२८१	मुयुः	मयुः
२८२	आतिर्वाहं	आतिर्वाहिसो
,,	तेय्कूं	तेकूं
२८४	विद्युतंकनीनं	विद्युतंकनीनं
,,	मूर्ध्नास्तंन	मूर्ध्नास्तंन
२८५	मृक्षरा	मृक्षलाभिः
,,	मति	मंतिरुऽस्यां
,,	ष्ठुना	ष्ठुना
२८८	वृधं	वृधं
,,	अवसा	अवसा
,,	माक्ष	माक्ष
,,	स्थिरै	स्थिरै
,,	स्तनू	स्तनूभि
२८९	नीयते	नींयते
,,	शऽस्ता	शऽस्ता
२९१	ऊष्मण्या	ऊष्मण्या
,,	चादित्यैः	चादित्यैः
२९६	मंग्ते	मंग्ने
२९८	मनु	मनुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धं
,,	सूर्य	सूर्य
३०८	मित्रा	मित्रा
३१०	ड्या॰	ड्य॰
,,	द्रंवयो	द्रंवयो
३१२	चक्षु	चक्षु
३१९	श्रेणिशो	श्रेणिशो
,,	दाशुषे	दाशुषे
३२०	बृहतीः	बृहतीः
,,	उषासान	उषासानक्ता
,,	यजध्यै	यजंध्यै
३२२	रजतनामी	रंजतनाभी
३२५	जनाना-	जनाना
३२६	स्समि	स्संमि-
,,	रभियम्	रभिश्रियं
३२७	वृष्णो	वृष्णो
,,	सत्पते	सत्पते
३२८	श्रायंन्त	श्रायंन्त इव
३३०	बर्हिरैषो	बर्हिरैषामा
३३३	त्वमिंन्द्र	त्वमिंन्द्र
३३४	आशासते	आशासते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धं
३३६	रळ	रक्ष
३३८	रीयंते	रीयते
,,	अरेणवस्सु	अरेणवस्सु
,,	पथिभि	पथिभिः
,,	अप्नैस्वती-	अप्नंस्वती
३३९	उद्यौः	उत द्यौः
,,	आध्र	आर्ध्रे
,,	त्रीणिं	त्रीणिं
,,	धारयेंन्	धारयन्
३४०	बाधामहे	बाधामहे
,,	एषत्र	एषव
३४१	ऋता	ऋंता
,,	गृतो	जा ग्रतो
,,	देव	देवं
३४२	दुरितानि	दुरितानि
,,	राजन्यं	राजन्यं
३४३	भिषजं	भिषजं
३४४	प्रज्ञाताय	प्रज्ञानाय
,,	वित्तमर-	वित्तधमा
,,	ऋतयै	ऋतयें
३४८	श्वेक्रे	श्वंक्रे
३४९	किमंस्यासीत्	किमंस्यासीत्
,,	रिक्षेः	रिक्षः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुटं	अशुद्धं	शुद्धं
,,	परिधय	परिधय
३५१	नतस्य	नतस्यं
,,	पूर्वोहं	पूर्वोह
,,	यंत्रदेवा	यत्रदेवाः
३५२	सवितातें	सवितातें
,,	विंसु	विंसुं
३५५	वह	वहं
३५६	प्रपद्ये	प्रपंद्ये
३५७	वच्छा	यच्छा
३५८	शोचिषे	शोचिषे
३६०	वाहु	बाहुभ्यां
३६१	मखायं	मखस्यं
३६२	दक्षिणतः	दक्षिणतः
३६६	यजुंभ्यः	यजुर्भ्यः
३६७	नृम्णाभिं	नृम्णानिं
२६९	स्योधि	स्येधि
३७०	वश्वै	वैश्व
३७१	प्रवृत्कः	प्रवृंक्तः
३७२	चतुर्थे	चंतुर्थे
३७३	सौत्रैत्येन	सौत्रंत्येन
,,	मज्जभ्य	मज्जभ्यः
३७६	सपयैं	सर्षमगात्
,,	अन्धन्द्रमः	अन्धंतमः
,,	इति	इतिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बृहदारण्यकोपनिषम्

पुटं	अशुद्धं	शुद्धं
१	महिमा	महिमा
२	वायुं	वायुं
४	पश्यति	पश्यति
,,	मनाः	मेनाः
५	ष्यन्तीति	ष्यन्तीति
६	यस्माचा	यस्मात्कस्मात्
,,	पद्वेद	यद्वेव
८	ओषति	ओपति
९	सेककं	त्येकैकं
१०	ह्यतत्	ह्येतत्
,,	दीयमाने	दीयमाने
११	क्षत्रात्	क्षत्रात्
,,	शौद्र	शौद्रं
१२	मयत्त	मयते
,,	कर्म	कर्म
१३	श्लोकः	श्लोकाः
,,	त	तं
१४	मिति	मिति
,,	पृष्ठत	पृष्ठतः
,,	न्त	न्त
,,	ज्ञास्य	ज्ञास्यं
१५	षोळ	षोळश्या
१६	तन्मा	तन्मा
,,	दैवः	दैवः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठं	अशुद्धं	शुद्धं
१८	दद्धि	तद्धि
,,	सहो	सहोवाचा
२०	मुपा	मुपास्तेप्रति
,,	पमभा	मभो
२१	एतमेव	एतमेव
२२	शभी	शयी
२४	मूर्व	मूर्त
२५	णवतां	णवतां
,,	नेति	नेति
२६	क्षयं	क्षत्रं
,,	वेदेदं	वेदेदं
,,	ञ्छ	ञ्छ
२७	यन	यन
,,	नन्दाना	नन्दानां
२७	यमा	यमा
,,	तेतो	तेजोम
३१	ईयने	ईयते
३२	रासु	रासु
३४	समु	समु
३[illegible]	अन्ता	अनन्ता
३[illegible]	मोऽहं	अमोहं
,,	तेनसा	तेऽसाविति
,,	समिंगपति	समिंजयति

————

103983

कांगड़ी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

GURUKUL KANGRI LIBRARY

	Signature	Date
Acces on		6-7-2000
Class on		1-9-2000
Cat on		1-9-2000
Tag etc		"
Filing		16-9-2000
E.A.R.		20-9-2000
Any other		1-9-2000
Checked		5-9-2000

ARCHIVES DATA BASE
2011 - 12

220,169
103983

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar